Subject—Vedic Mantras in eulogy of the presiding deities of the twenty-seven asterisms to be used when offering is made on fire.

Beginning:

हरिः ।

अग्निर्नः पातु कृत्तिका नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासं जुहोतन । यस्य भ न्ति रश्मयो यस्य केतवो यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभिसंवसानोऽग्निर्नो देवस्सुविते दधातु स्वाहा ।

End:

व्युष्टयै नक्षत्राय उदेष्यते। उद्यते उदिताय। हरसे भरसे। अदित्यै प्रतिष्ठायै। विष्णवे यज्ञाय प्रतिष्ठायै स्वाहा॥

भ्राजसे। तेजसे। तपसे। ब्रह्मवर्चसाय सूर्याय। नक्षत्रेभ्यः प्रतिष्ठायै।

Colophon—Nil.

Author:

Remarks—The rites of Homa to be performed on each asterism are described in the work. The following additional information is also furnished in Malayalam:—

"ഔരാണ്ടെ തികയിന്ന അട്ടപ്പുറന്നാന്നാം പക്ഷം മൂന്നും കഴിഞ്ഞാൽ നവോനവഃ എന്നുതുടങ്ങി ഏഴപക്ഷവുംചെയ്താൽ അജ്യാഹുതി ചന്ദ്രമസേ എന്ന ഏഷം കഴിഞ്ഞാൽ അഗ്നേ സ്വാഹാ എന്നു തുടങ്ങി ഇരുപത്താറും ചെയ്യു. എഷ പക്ഷമിരുപത്താറാജ്യാഹുതിയുമൊച്ചെയ്യേണം"

॥ नक्षत्रोपचरणविधिः [भाषा] ॥

22 B. NAKṢATROPACARAṆAVIDHI.

(Bhāṣā)

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—7. 8 lines on a page and 32 letters in a line. Script—Malayāḷam. No. of Granthas—110 Incomplete.

Subject—Veda.

Beginning:

ഒരു ചകവും ചെയ്താൽ ആജ്യാഹുതി ചന്ദ്രമസേ എന്നവ. എന്നും കഴിഞ്ഞാൽ അഗ്നയേ സ്വാഹാ എന്നു തുടങ്ങി ഇരുപത്താറും ചെയ്തു സ്വിഷ്ടകൃൽ തുടങ്ങി എല്ലാം പ്രസിദ്ധമാം.

End:

ചമൃത പ്ലാശ് സ്വിഷ്ടകൃല്ലക്ഷണം സ്രാവഃ പരിഹോമമിദം വചഃ യന്മൃൽസൗഗ്രാമയാജം ച പാശം ചിത്തം യസ്യ ച ।

Colophon:

Author:

Remarks—This work is found between the Ms. of Yajurvedanaksatrāstakā and that of Mahāvrata. The language used is a mixture of Sanskrit and Malayālam. This was not mentioned in the Revised Palace Catalogue as a separate work as it is closely connected with the Yajurvedanaksatrāstakavākyam which precedes it.

॥ महाव्रतम् ॥

22 C. MAHĀVRATAM.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—17. 7 lines on a page and 28 letters in a line. Script—Malayālam. No. of Granthas—200. Complete.

Subject—Veda.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । अथ महाव्रतं व्याख्यास्यामः । अथशब्दोऽत्र मङ्गळार्थः । महाव्रतम् । इन्द्रो वै वृत्रं हत्वा महानभवत् । यन्महानभवत् । तन्महाव्रतमभवत् । तन्महाव्रतस्य महाव्रतत्वम् ॥

End:

.. स्वस्त्ययनं वै जातवेदः स्या स्वस्तितायै स्वस्त्ययनमेव तत् कुरुते । इमं स्तोममर्हते । जातवेदस इति जातवेदस्यम् । समानोदर्कि समानोदर्कि वा एतत् । इति हि तस्य महाव्रतस्याह्नो रूपमनुवर्णितम् ।

Colophon:

स्वस्त्यस्तु । हरिः । ॐ ॥

Remarks—The Ms. is worn out. It describes the Mahāvrata. It is the source of the Vratakhanda of Hemādri.

॥ यजुस्संहिताभाष्यम् ॥

23. YAJUSSAMHITĀBHĀṢYAM.

(Vedārthaprakāśa).

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—113. 9 lines per page and 54 letters per line. Script—Grantha. No. of Granthas—3400. Incomplete.

Subject—Commentary on Veda.

Beginning:

हरिः ॐ ।

कमलाकुच (करतूरीमस्तूरी ? विस्तारकस्तूरी) वासितोरसम् ।
सम्पूर्णचन्द्रसुभगं भजे नरहरिं हरिम् ॥

कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः ।
ब्राह्मणं कल्पसूत्रे द्वे मीमांसां व्याकृतिं तथा ॥
उदाहृत्याथ तैः सर्वैर्मन्त्रार्थः स्पष्टमर्प्यते ।

ननु कोऽयं वेदो नाम । के चास्य विषयप्रयोजनसम्बन्धाधिकारिणः । कथं वा तस्य प्रामाण्यम् । न खल्वेतस्मिन् सर्वस्मिन्नसति वेदो व्याख्यानयोग्यो भवति । अत्रोच्यते— इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते । अनुभूयमानस्य स्रक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वमनागतस्य च तथात्वमनुमानम् । एवं तर्हि भाविजन्मगतमप्यनुमानमिति चेन्न । तद्विशेष्यस्यानवगमात् । न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः । कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमुमर्थं वेदव्यतिरेके नानुमानसहस्रेण तार्किकशिरोमणिरप्यवगन्तुं शक्नोति । तस्मादलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः ।

End:

तत्र पुरोनुवाक्या— अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम इति । अग्ने त्वं दर्शपूर्णमासेष्टिफलरूपायायनायास्मानति सुमार्गेण नय.... देह देव त्वं विश्वा ।

Colophon:

इति माधवीयवेदार्थप्रकाशे त्रयोदशानुवाकः ।

Author—Mādhava (Sāyana).

Remarks—The author is the commentator on Ṛksamhita as well

॥ रुद्राध्यायभाष्यम् ॥

24. RUDRĀDHYĀYA BHĀṢYAM.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—61. 6 lines per page and 36 letters per line. Script—Tamil Grantha. No. of Granthas—800. Complete.

Subject—An elaborate exposition of Śrī Rudra Sūkta.

Beginning:

रुद्रभाष्यम्। अतः परमग्निकाण्डमग्न्याधेयम्। तत्र चरमायामिष्टकायां शतरुद्रीयं जुहोति नमस्ते रुद्रमन्य इति। रुद्रो वा एष यदग्निः स एतर्हि जात इति ब्राह्मणम्। अत्र श्रुतिस्मृतिपुराणादिषु प्रसिद्धं मोक्षस्वर्गविद्यारोग्यायुष्यादिफलानि बहूनि विद्यन्ते। तेषु केषुचित् प्रयोगविशेषा... ... .

नम इति प्रह्वार्थे। रुद्र इति रोदयति सर्वमन्त्यकाल इति रुद्रः। रुजं संसारं द्रावयति रुद्रः। अशुभद्रावको वा। जहार पुनर्भवमिति वा रुत् प्रणवः, तेन आत्मानं प्रतिपादयतीति वा रुद्रः। मन्यव सर्वेषां हिंसा... ... ...

End:

सार्वभौमकरं होमं कलशस्थापनं तथा।
जातिस्मरक्रियापुण्यं सर्वमुक्तमशेषतः॥
अपमृत्युजयं कर्म राज्ञामेव विशेषतः।
सर्वमेतदनेनैव साध्यं तद्भक्तियोगतः॥
इत्येकादशोऽनुवाकः।
सर्गात् पुरा निरालोकं यदेतन्निष्फलं परम्।
चिदानन्दमयं ज्योतिः स आद्यः केवलः शिवः॥

* * * *

* * * *

रुद्राध्यायजपात् मद्यस्तेऽपि यान्ति परां गतिम् ।
इति ब्रह्मोत्तरखण्डे रुद्राध्यायजपप्रशंसाभिहिता ।

Colophon:

रुद्रभाष्यं समाप्तम् ।
ॐ शिवाय परमगुरवे नमः । साम्बपरब्रह्मणे नमः । शुभमस्तु ।
हरिः ॐ ।

Author—In the Rudrādhyāya published in the Ānandāśrama Series, Poona, this commentary is attributed to Bhaṭṭa Bhāskara.

Remarks—The style adopted is similar to that in Sāyaṇācāryas Rudrādhyāyabhāṣyam.

॥ शाखालक्षणम् ॥

25. ŚĀKHĀLAKṢAṆAM.

Substance—*Palm leaf.* Size—$5\frac{3}{4}'' \times \frac{3}{4}''$. Leaves—76. 4 lines on a page and 18 letters in a line. Script—Malayālam. No. of Granthas—350.

Subject—Definitions of Vedaśākha based on Varṇa, Svara etc.

Beginning:

श्रीगणेशाय नमः । अविघ्नमस्तु ।
गजाननयतीशाय भक्तविघ्नप्रणाशिने ।
नमो गणे(श)रूपाय विष्णवे दशवाहवे ॥

जगत्संभूतिसंरक्षासंहारैकविनोदिने ।
नमो भगवते तस्मै चिदानन्दाय विष्णवे ॥
मुद्गलो गालवो गार्ग्यः शाकल्यः शैशिरस्तथा ।
पञ्चैते शौनकाः शिष्याः शाखाभेदप्रवर्तकाः ॥

शैशिरस्य तु शिष्यस्य शा(कटा)यन एव च ।
सर्वज्ञं सर्वकर्तारमाचार्यं तु प्रणम्य च ।
शैशिरोऽहं प्रवक्ष्यामि शाखाया लक्षणं विधिम् ॥
त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः ।

End:

त्रैष्टुब्जागतयोः षष्ठनवमे अक्षरे लघुनी प्राय अष्टमदशमे गुरुणी । गायत्रस्य पञ्चमसप्तमे लघुनी षष्ठः गुरुः । वैराजस्याष्टमनवमे लघुगुरुणी । सर्वेषु प्रथमवर्णाः कान्तिम...लघुद्वयम् ।

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अधिकारोऽतिदेशश्च षड्विधं सूत्रलक्षणम् ॥
सुनिपुणमभिधध्वं बुद्धिमन्तः कति स्युः
पणिकुलमणिबद्धाध्यायसूत्राणि कीदृक् ।
पशुपतिरपि वक्षोगाहिचारूपकल्पसौ
........मलशशिमौलिः सज्जटोद्भासिताङ्गः ॥

Colophon:

Author—Śaiśira (disciple of Śaunaka).

Remarks—The leaves of the Ms. are not numbered in order. The following passages,

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । उदात्तश्चानुदात्तश्च....
............लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ।

occurring in the middle, point to the commencement of another work. One leaf ends thus:—

"इति याज्ञवल्क्यशीक्षा समाप्ता। नमः शिवाय नमो नारायणाय श्रीकृष्णाय नमः। हरिः हरिः।"



॥ श्रीसूक्तभाष्यम् ॥

26 A. ŚRĪSŪKTABHĀṢYAM.

Substance—Palm leaf. Size—9" × 1¾". Leaves—11. 12 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—85.

Subject—An exposition of Śrī Sūkta leading to prosperity.

Beginning:

श्रीमहागणपतये नमः।

अथ श्रीसूक्तभाष्यं लिख्यते। हिरण्यवर्णाम्। श्रीर्नाम हिरण्यवर्णामित्येतत् सूक्तं पञ्चदशर्चमपश्यत्। सैव देवता। अनुष्टुप् प्रथमस्तृचा। प्रस्तारपङ्क्तिश्चतुर्थी। पञ्चमीषष्ठ्यौ त्रिष्टुभौ। उत्तमा बृहती। शेषा अनुष्टुभः। लिङ्गोक्तदैवतं वा। हिरण्यवर्णा हिरण्यस्य वर्ण इव वर्णो यस्याः सा हिरण्यवर्णा।

End:

पुरुषान् सामर्थ्याचकारो द्रष्टव्यः। पुरुषांश्च परिचारकमनुष्यांश्चाहं लभेयम्। हे जातवेदः, तां लक्ष्मीं मदर्थमावहेति सम्बन्धः। यस्याः प्रसादात् सर्वसम्पत्समृद्धिर्भवति तां लक्ष्मीं मम मदर्थं हे जातवेद आवहेति समस्तार्थः।

Colophon:

श्रीसूक्तभाष्यं समाप्तम्।

Author:

Remarks—At the close of the work is a verse defining Gāyatri. Besides, the Ms. contains three other works, catalogued as 26 B. C. & D. It is very much decayed and appears to be about 400 years old.

॥ गायत्रीव्याख्या ॥

26 B. GĀYATRĪVYĀKHYĀ.

Substance—Palm leaf. Size 9″×1¾″. Leaves—2. 6 lines on a page and 20 letters in a line. Script—Malayāḷam. No. of Granthas—15.

Subject—A disquisition on Brahmajñāna and Brahmasvarūpa based on Gāyatri.

Beginning:

अथ गायत्र्या व्याख्यानं लिख्यते।

येदा यत्रैव तिष्ठन्ति देवाः कर्माणि चाग्नयः।
लोकाश्च तं महामन्त्रं व्याख्यास्यामि गुणातिगम्॥

आत्मा ब्रह्मेति विज्ञानमस्मिन् मन्त्रे विवक्षितम्।
स य इत्यादिवाक्येषु यथा तदिह वर्ण्यते ॥
भर्गो ब्रह्मेति विज्ञेयं विज्ञानानन्दलक्षणम् ।
तद्धीमहीति विज्ञानं ज्ञाने ब्रह्माहमद्वयम् ॥

End:

मण्डलान्तर्गतं देवं विराड्ब्रह्मेति शाब्दितम् ।
उपासेऽहं प्रयत्नेन स मां धर्मे प्रयोजयेत् ॥
पूर्वपूर्वासमर्थस्य ह्युत्तरोऽर्थो विधीयते ।
त्रयोऽप्यर्था इह ज्ञेया अन्येऽपि ब्रह्मवादिभिः ॥
सूक्ष्मार्थप्रतिपत्त्यर्थं स्थूलानां शेपता यथा ।
यो देवः सवितास्माकं धियो धर्मादिगोचराः ॥
प्रेरयेत् तस्य यद् भर्गस्तद्वरेण्यमुपास्महे ।

Colophon:

अक्षरं यत् परिभ्रष्टं मात्राहीनं तु यद् भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥ [हरिः]

Author:

Remarks—A simple and lucid exposition of *Gāyatri* in *Kārikas*.

॥ त्रिष्टुब्व्याख्यानम् ॥

26 C. TRIṢṬUBVYĀKHYĀNAM.

Substance—Palm leaf. Size—9″×1¾″. Leaves—3. 6 lines on a page and 20 letters in a line. Script—Malayālam. No. of Granthas—25.

Subject—A commentary on '*Jātavedase Sunavāma*' Ṛk.

Beginning:

श्रीगणपतये नमः। अथाखिलमन्त्रसारभूतस्य त्रिष्टुभोव्याख्यानं लिख्यते। जातवेदसे प्रज्ञा वा धनं वा वेदः। उत्पन्नप्रज्ञाय उत्पन्नधनाय वा अग्नये सुनुवाम अभिषवं कुर्मः। तं सोमं उक्तप्रकारेण सोमद्रव्येणाग्नि यजेमहि इत्यर्थः।

End:

अरातीयतः तद्विरोधिनः अविद्याकामादीन् वेद जीवतत्त्वविमर्शिनी बुद्धिर्निर्दहेत्। उत्तरार्धेच दुरितान्यज्ञानतत्कार्याणि भेदप्रतीतिनिमित्तभूतान्यज्ञानतत्कार्याणि अपोह्य ज्ञानेन ब्रह्मात्मैक्यमनुभवाम इत्यर्थः।

Colophon—Nil.

Author:

Remarks—The work begins with the words त्रिष्टुभोव्याख्यानं लिख्यते, but really comments upon the Ṛk जातवेदसे सुनवाम in Triṣṭub metre.

॥ पुरुषसूक्तव्याख्या ॥

26 D. PURUṢASŪKTAVYĀKHYĀ.

Substance—Palm leaf. Size—9" × 1⅞". Leaves—17. 6 lines per page and 20 letters per line.

Script—Malayālam. No. of Granthas—130. Incomplete.

Subject—An elucidative description of the Supreme Being on the basis of the Puruṣasūkta.

Beginning:

यतः प्रपञ्चसम्भूतिविभूतिपरिभूतयः ।
भवन्ति तं हरिं वन्दे जगतामादिकारणम् ॥
दुर्ज्ञानं पौरुषं सूक्तं व्याकरोमि यथामति ।
श्रुतिस्मृतिपुराणानि सेतिहासानि वीक्ष्य च ॥
विलोक्य पूर्वभाष्याणि पूर्वाचार्यकृतानि च ।
श्रीमच्छास्त्रं सुदुर्ज्ञानं साक्षान्नारायणेरितम् ॥
तदप्यालोच्य च तथा गुरूणाञ्चोपदेशतः ।
स्वमनीषिकया चात्र न किञ्चिदभिधीयते ॥
सुखग्रहार्थं भाष्याणि केवलं संक्षिपाम्यहम् ।
उक्तज्ञानेष्वशक्तानामनुक्तोक्तौ तु का कथा ॥
नद्यलब्ध्वानुगमनः क्रोडारोहाय रोदिति ।
अर्थानां विप्रकीर्णानां संक्षेपेणावधारणम् ॥
सुखग्रहार्थमिदं हि पण्डितानां बहुश्रुताम् ।
तदेतत् पौरुषं सूक्तं यजुःष्वष्टादशर्चकम् ॥
ऋग्वेदे षोडशर्चं स्यात् पञ्च वाजसनेयके ।
सप्तर्चं सामवेदे तु तथैवाथर्वणेष्वपि ॥
एतेषु याजुषं वेदमवलम्ब्य वदाम्यहम् ।
उक्तञ्च मोक्षधर्मे * * *
* * * * *

अस्य सूक्तस्य जप एव मोक्षस्य पन्था इति । एवमृषिच्छन्दोदेवतादीन्युक्त्वा सूक्तमवतार्यते । सहस्रशीर्षा पुरुष इति । सहस्रं शि-

रांसि यस्य सः सहस्रशीर्षा । शीर्षञ्छन्दसीति शिरःशब्दस्य शीर्षन्नादेशः । सहस्रशब्दोऽनन्तवचनः ।

End:

अत्र के परिधित्वेन ध्याता आसन् ते समित्वेन । मैत्रायण्युपनिषदि मेघवर्णने .... पृथिव्यप्तेजोवाय्वाकाशाहङ्कारबुद्धयः परिधित्वेन ध्याता आसन् । तथा पृथिव्यादिभूतानि पञ्चतन्मात्राश्च.......

Colophon—Nil.

Author:

Remarks—The Nos. 209—212 D. C. S. M. Madras Vol. I, Part II are Puruṣasūktas but the beginning given there differs. This may be another commentary on the same sūkta.

The author refers to certain other works and authors. Eg.

Works	Authors
मोक्षधर्मः	शौनकः
यमस्मृतिः	मनुः
पाद्मपुराणम्	
स्कान्दपुराणम्	

The first 9 pages of the Ms. describe the greatness of the Puruṣasūkta. Seven leaves are devoted to Navanitaprāśana, etc., written in old Malayāḷam.

॥ षड्विंशब्राह्मणम् ॥

27. ṢADVIMŚABRĀHMAṆAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—51. 9 lines per page and 26 letters per line. Script—Tamil Grantha. No. of Granthas—750. Incomplete.

Subject—Description of Karmas pertaining to the Sāmaveda.

Beginning:

ब्रह्म च वा इदमग्रे सुब्रह्म चास्ताम् । ततः सुब्रह्मोदक्रामदथ ह देवा यज्ञेन ब्रह्म पर्यगृह्णतान्निर्वं ब्रह्मामावादित्यः सुब्रह्म तद् देवा यज्ञस्य सन्धावन्नैच्छन्नेव वै यज्ञस्य सन्धिर्यत्रैव उत्तरस्तस्मादुत्तरे तिष्ठत्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयति ।

End:

सूर्याय स्वाहा सर्वग्रहाधिपतये स्वाहा किरणपाणये स्वाहेश्वराय स्वाहा सर्वपापशमनाय स्वाहेति व्याहृतिभिर्हुत्वाथ साम गायेत् ॥ १२ ॥

Colophon:

इति षड्विंशब्राह्मणे पञ्चमप्रपाठके द्वादशः खण्डः । इति पञ्चमः प्रपाठकः ।

Author:

Remarks—This work has been printed at Calcutta. Mādhavācārya, the commentator on Veda designates it as the 2nd Brāhmana. The scribe explains its propriety at the close thus:—

अथा(सो ? सौं) षड्विंशं सुप्रसिद्धाचार्यो वेदभाष्यकारः सायणामात्यः षडध्यायीति ताण्ड्याख्यमाद्यं ब्राह्मणं विंशतिप्रपाठकात्मकमिदं हि द्वितीयं परिशिष्टरूपं षडध्यायि, ततश्चानयोः सङ्कलनया षड्विंशतित्वं सुलभम्। अत एवास्य ताण्ड्यपरिशिष्टग्रन्थस्य षड्विंशेति नाम चेति तदाशयः। तदीयभाष्ये च तथैव छेदाः। परं मूलग्रन्थे तु न क्वापि तथोपलभ्यते। प्रत्युत पञ्चप्रपाठकात्मकत्वमेवैतस्य सर्वत्र। अस्तु तावद् यथायथं मूलभाष्ययोः प... छेदानैक्यपरं श्रुतिसंख्यानां तु नेत्थमसामञ्जस्यपरमपरमपीह चित्रं, यदेतद्ब्राह्मणान्तिमे 'सोऽधस्तादि'त्यादि, 'सः सर्वे'त्यादि चेमे खण्डे भाष्यकृता कथं न परिगृहीते, नापि व्याख्याते स्तश्चैते सर्वमूलपुस्तकेषु। तत्र च काचिदध्यायाद् बहिरेकं द्वितीयमिति. क्वचिदध्यायान्तिमत्वेनैवैकादशं द्वादशमिति वा। अत्र परं च वक्तव्यं, यदस्यैव शेषाध्यायभागे मणिदरणाद्यद्भुतदर्शने यथायथं शान्तिर्विहिता। अत एवास्यापरं नामाद्भुतब्राह्मणं चेति। अथेहेदमपि ज्ञाप्यमस्ति। यदत्र लब्धादर्शदोषा यावच्छक्यं तिरोहिता अपि राजन्त एव। तत्र न वयं तिरस्करणीयाः साधु विचक्षणीयैः। किञ्च मुद्राकरदोषेष्वपि प्रायस्तथैव शोधनादौ भ्रमप्रमादादीनामप्यस्ति सम्भवोऽस्तु तेषां वर्जनीयत्वासंभवात्। अत एव भट्टकुमारिलः—

> आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि।
> नहि सद्वर्त्मना गच्छन् स्खलितेष्व(ष्य ?)पोद्यते इति॥

The work is also known by the name Sāmaṣaḍviṃśabrāhmaṇa.

॥ षड्विंशब्राह्मणभाष्यम् ॥

28. ṢADVIMŚABRĀHMANABHĀṢYAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—163. 8 lines on a page and 22 letters in a line. Script—Tamil Grantha. No. of Granthas—1800. Complete.

Subject—An exposition of Ṣadvimśabrāhmana relating to Sāmaveda.

Beginning:

अथ षड्विंशब्राह्मणभाष्यम्। प्रथमः प्रपाठकः। ॐ नमः सामवेदाय।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः।
आदिशत् सायणाचार्यं वेदार्थस्य प्रकाशने ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यत
व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता।
व्याख्याता ब्राह्मणं चाद्यं प्रौढमाख्यातमादरात्।
अथ द्वितीयं षड्विंशब्राह्मणं व्याचिकीर्षति ॥

अस्मिन् ताण्ड्यशेषब्राह्मणे पूर्वाण्युक्तानि कर्माणि। उक्तानामपि ये भेदास्ते च पठ्यन्ति? । तत्र प्रथमं सुब्रह्मण्योच्यते। तत्र सवनत्रये विज्ञेयम्। ततो ब्रह्म कर्तव्यम्। ततो व्याहृतिहोमादिर्नैमित्तिकं

प्रायश्चित्तम् । ततः सौम्यचरुविधिः । ततो गृहिण्यवमानधर्माः ततः किञ्चित् प्रकीर्णकम् । ततो होत्राद्युपहवः । तत आर्त्विज्येषु ऋत्विगादिविधानम् । ततो नैमित्तिका होमाः । ततोऽध्वर्युप्रशंसा । ततो देवयजने विज्ञेयं कर्म । ततोऽवभृथः । ततः अभिचारसंज्ञका विवृतयः । ततो द्वादशाहस्तुतिः । अथ श्येनादिविधिः । ततो वैश्वदेवसत्रम् । इत्येवं प्रतिपाद्यमानार्थानामनुक्रमणिका । तत्र प्रथमं तदुत्तरे तिष्ठत्सुब्रह्मण्यः सुब्रह्मण्यामाह्वयतीति विवक्षयेदमाम्नायते । अग्रे सृष्ट्यादौ निरुपपदस्याग्रशब्दवदर्थत्वात् । इदं वक्ष्यमाणं ब्रह्म सुब्रह्म एते द्वे (सु?)ब्रह्मसुब्रह्मणी ते द्वे एवास्ताम् ....

End:

अथो एवं सामहोमानन्तरं अद्भुतादिसूचितो दोषः शाम्यत्येव । एष यथोक्तषष्ठाध्यायप्रतिपादित एष होमः शान्त्यर्थः ऐन्द्राद्यद्भुतसूचितदुरितशान्त्यर्थः । द्विरुक्तिरादरार्था, अध्यायपरिसमाप्तिद्योतनार्था वा ।

Colophon:

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे षड्विंशब्राह्मणाख्ये द्वितीयब्राह्मणे षष्ठाध्याये दशमः [कण्ठे? खण्डः] ॥ १० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥


इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे द्वितीये षड्विंशाख्ये ब्राह्मणे षष्ठाध्यायः समाप्तः ।

समाप्तश्चायं षड्विंशाख्यो ब्राह्मणग्रन्थः ॥

൭൨ ആലോഹി ൯൬൨

Author—Sāyanācārya.

Remarks—This has been printed at Calcutta. The Ms. No. 27 is the text and this is the *Bhāṣya* on it, beginning from Fol. 52. The *Bhāṣya* of the last two khaṇḍas of the text is missing. The table of contents of the text is given at the beginning of the *Bhāṣya*.



॥ सुखप्रदा (ऐतरेयब्राह्मणवृत्तिः) ॥

29. SUKHAPRADĀ.

(Aitareyabrāhmanavṛtti)

Substance—Palm leaf. Size—19″×2″. Leaves—165. 9 lines on a page and 48 letters in a line. Script—Malayāḷam. No. of Granthas—4500 Incomplete.

Subject—Detailed description of rules and sacrificial materials relating to Jyotiṣṭomayāga etc.

Beginning:

श्रीगणपतये नमः ।

विनायकः शूलपाणिर्मुकुन्दः
सूर्यो व्यासः शिवयोगीति ये षट् ।
तेभ्यो नमः सप्तविद्यामृतस्य
प्रदातृभ्यः स्वाश्रितवत्सलेभ्यः ॥
आद्या सर्वानुक्रमणी द्वितीया
महाव्रतं चोपनिषद्द्वयं च ।

महाव्रतं सूत्रमासां तृतीया ।
चत्वारिंशद्ब्राह्मणं वै चतुर्थी ॥
सूत्रं पञ्चम्यत्र षष्ठी तु गृह्यं
शाकल्यस्य संहिता सप्तमीति ।
इत्येतद् वै सप्तवेदामृताख्यं
दत्तं स्वयं गुरुभिः षड्भिरेतैः ॥
वेदानङ्गोपाङ्गपूर्णांस्तु वन्दे
यजुःसामाथर्वबाह्वृच्यरूपान् ।
तेषां प्रवक्तॄनपि शौनकादीन्
ब्रह्मादिका देवता ब्राह्मणांश्च ॥
छन्दःशास्त्रं व्याकरणं निरुक्तं
शिक्षा ज्योतिश्शासनं कल्पसूत्रम् ।
अङ्गानि षड् न्यायविद्यापुराणं
मीमांसनं स्मृतयश्चेत्युपाङ्गम् ॥
विनायको गुहप्रियो गिरीन्द्रजेशनन्दनः ।
सुरेन्द्रबृन्दवन्दितस्त्रिशूलपाणिरिन्दुभृत् ॥
श्रुतीस्तु गा ररक्ष यः स देवकीसुतः प्रभुः ।
समस्तलोकलोचनं च सूर्य इष्टहृद्विदः ॥
प्रणीतभारतामृतः पराशरात्मजो मुनिः ।
वरप्रदः स्मिताननः शिवाद्वियोगिनामकः ॥
इमे हि षट् प्रयान्तु मां सदा नमामि तानहम् ।
इमे हि मामयूयुजन् यथाश्रुतं वेदरिति ॥

* * * * *

* * * * *

किंवा कामक्रोधलोभाः शास्त्राणां प्रतिषेधताम् ।
किंवा पिपासतामर्थे स्वादुतामेति सागरः ॥
सुदुष्करतमं चेदं ब्राह्मणार्थोपवर्णनम् ।
मातुरङ्के निषण्णेन यथा बालेन चन्द्रमाः ॥
आहूयमानो नाभ्येति तद्वद् वेदार्थ ईप्सितः ।
तथापि गुरुपद्कोक्तेरेषा वृत्तिः प्रवर्तते ॥
ब्राह्मणारण्यकद्रष्ट्रे मातृशोकौघहारिणे ।
महीदासैतरेयाय नमो भूयो नमो नमः ॥
अत्रैतरेयर्षिमहेतिहासं पुराणवेदोदितमाहुरार्याः ।
आसीद् विप्रो यज्ञवल्को द्विभार्यस्तस्य द्वितीयामितरेति चाहुः ॥
स ज्येष्ठयाकृष्टचित्तः प्रियां तां मुक्त्वा द्वितीयामितरेति होचे ।
तस्यां जातोऽथ शिशुः संरुदन् स(सो?तृ) क्तो मात्रा दुष्ट तूर्णीं भवेति॥
अनेकजन्मस्मृतियोगभाजा मूकायितं तेन महात्मनापि ।

* * * *

महीप्रणीतासन आसनाच्च स्वाम्यासपत्नीमदनाशनाच्च ।
महादानाद्वेदरूपाच्च नाम त्रिधा निरुक्तं तु पृषोदरादि ॥
कथा चैषामहीदासैतरेयी श्रुता प्रोक्ता सा स्मृता पूजिता च ।
श्रुतान्वितैरास्तिकैः सर्वसाध्यैः प्रकल्पितेत्येयमाहुर्महान्तः ॥

प्रथमं तावद् दीक्षणीयां ज्योतिष्टोमाङ्गभूतामिष्टिं विधातुं तद्देवते अग्नाविष्णू स्तौति— " ॐ अग्निर्वै देवानामवमः " । अवमः प्रथमः, मुख्यमित्यर्थः । यदिन्द्राग्नी अवमस्यां पृथिव्यामिति यथा । वक्ष्यति च "अग्निर्मुखं प्रथमो देवतानाम् " इति ।

End:

तत् तत्र शंसति यत् । एनसः पापात् सर्वस्मात् । एनान् सत्रिणः होता प्रमुञ्चति तत् । ... .

Colophon:

इति षड्गुरुशिष्यविरचितायां महीदासैतरेय-
ब्राह्मणवृत्तौ सुखप्रदायां त्रयोविंशोऽध्यायः ॥

Author—Ṣadguruśiṣya. Other works by the same author are:—

(1) Āśvalāyanaśrautasūtraṭīkā.

(2) Vedārthadīpikā.

(3) Ṛgvedasarvānukramaṇīvṛtti.

(4) Siddhāntakalpavalli.

The introductory verses disclose that the author's six preceptors blessed him with *Saptavedamṛta* viz.—Sarvānukramaṇī, Mahāvratam Upaniṣaddvayam, Mahāvratam sūtram, Catvārimśat-brāhmaṇam, Sūtram, Gṛhyam, and Śākala-samhita.

The author acknowledges his indebtedness to the commentaries of Govindasvāmin, Kṛṣṇa, and others in the following line,

"गोविन्दस्वामिकृष्णादिभाष्यदृष्टार्थभाषिणी."

Remarks—C. O. M. L. No. 4. contains 30 chapters. It is known from the following verse that the original consists of 40 chapters:—

"अग्निर्वा इति ह्यारभ्य स्तृणुते स्तृणुतेऽन्तिकम् ।
चत्वारिंशाख्यमध्यायं चत्वारिंशदिहेति उण् ॥
प्रतापते तस्य वृत्तिर्नाम्ना चैषा सुखप्रदा ।"

The last page of the Ms. gives the number of

Granthas in the Samhita. Chapters 1 to 16 and 20 to 23 are complete. There are only portions of Chapters 17 and 27. The Ms. is about 400 years old and worn out.

॥ सुखप्रदा (ऐतरेयब्राह्मणवृत्तिः) ॥

30. SUKHAPRADĀ.

(Aitareyabrāhmanavrtti)

Substance—Palm leaf. Size—$22\frac{1}{2}'' \times 2''$. Leaves—110 9 lines per page and 76 letters per line. Script—Malayālam. No. of Granthas—4800. Incomplete.

Subject—Same as No. 29.

Beginning—Same as No. 29.

End:

न त्वनाशयतात् । वीर्यं गर्भस्य रेतसः सत् ।
तस्मात् सद्रिेता वाजी सद्विरेतायरेतो ....

Colophon:

इति ब्राह्मणवृत्तौ सुखप्रदायां षोडशोऽध्यायः

Author—Ṣadguruśisya.

Remarks—Chapters 1 to 16, complete and 17, incomplete.

॥ श्रौतम् ॥

॥ अग्निहोत्ररक्षामणिः ॥

31 A. AGNIHOTRARAKṢĀMAṆI

Substance—Palm leaf. Size—14″ × 2¼″. Ff.—1 A —8 A. 11 lines per page. 55 letters per line. Script—Malayāḷam. No. of Granthas—300. Complete.

Subject—Details of the rites and time of performance of the *Agnihotra*, in accordance with Āpastamba's School.

Beginning:

हरिः श्रीगणपतये नमः । श्रीगुरुभ्यो नमः ।
यं सन्तः फलदं मत्वा यत्नात् कर्माणि कुर्वते ।
चिदम्बरेशमालम्बे तं सदाम्बिकया सह ॥
सुखबोधाय बालानामग्निहोत्रस्य कर्मणः ।
आपस्तम्बोदीरितस्य विवेकः क्रियते मया ॥
सायं सूर्यस्याग्रदृष्टयंशौ भानोः प्राक् कृत्स्ननाशतः ।
प्रातस्तूपसि तस्य प्राक् कृत्स्नमण्डलदर्शनात् ॥

End:

इत्थं प्रदर्शितान्यत्र प्रायश्चित्तानि कानिचित् ।
ज्ञेयानि स्वयमन्यानि सूत्रभाष्यादिवेदिभिः ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणभारद्वाजकुलतिलकश्रीम-दनन्तसोमयाजिवरतनयस्य रामचन्द्रदीक्षितस्य कृतावग्निहोत्र-रक्षामणौ पञ्चमो मयूखः ॥ श्रीसाम्बशिवचरणाभ्यां नमः ॥

Author—Rāmacandra Dīkṣita.

Remarks—Kāmakotidīkṣita, son of Nārāyana Somayāji, has also written a work of the same title. (Vide, p. 804 Vol. II, D. C. S. M. Madras).

॥ अग्निहोत्ररक्षामणिः (सटीकः) ॥

31 B. AGNIHOTRARAKṢĀMANI

with

Tilaka Vyākhyā.

Substance—Palm leaf. Size—14″ × 2¼″. Leaves—8 B—55 B. 11 lines per page and 55 letters per line. Script—Malayālam. No. of Granthas—1900. Complete.

Subject—Same as No. 31 A.

Beginning:

प्रारिप्सितप्रतिबन्धिविघ्नविघाताय स्वेष्टदेवतां नमस्करोति—

यं सन्तः फलदं मत्वा यत्नात्कर्माणि कुर्वते ।

चिदम्बरेशमालम्बे तं सदाम्बिकया सह ॥

सन्तो महात्मानः । यं फलदं यज्ञादिकर्मफलदायिनं मत्वा अचेतनानां कर्मणां फलप्रदत्वानुपपत्तेः कर्मणाराधितः परमेश्वर एव फलप्रद इति निश्चित्येत्यर्थः ।

End:

निमित्तानां नैमित्तिकानां च बहुत्वात् भृङ्गग्राहिकया सर्वेषां वक्तुम-
शक्यत्वात् सूक्तभाष्याद्युक्तन्यायानुसारेण स्वयमेव बोद्धव्यानि ।
अतः स्वग्रन्थे न्यूनत्वशङ्का न कार्येति भावः । इति सर्वमवदातम्।

Colophon—Same as No. 31 A

Author—Rāmacandra Dīkṣita.

Remarks—It seems that Rāmacandra Dikṣita abridged the Agnihotrakarmas enjoined by Āpastamba in the form of Kārikās and commented on the same.

॥ अग्निहोत्रप्रायश्चित्तविधिः ॥

31 C. AGNIHOTRA-PRĀYAŚCITTAVIDHI.

Substance—Palm leaf. Size—14″ × 2¾″. Leaves—56 A—76 B. 11 lines on a page and 56 letters in a line. Script—Malayālam. No. of Granthas—750. Incomplete.

Subject—*Expiatory rites to be done when the* sacrifices are performed against the dictates of the Vedas.

अथ प्रायश्चित्तान्युच्यन्ते । श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे
विधीयते । श्रुतौ लक्षणमात्रमेव (चिसि?विधि) मात्रस्यैव प्रायश्चित्तो ...
तस्माद् यस्य हविषः क्षायतीत्यत्र द्वयोर्बहूनामपि क्षामे प्रायश्चित्तम् ॥

End :

प्रातरहुतेऽग्निहोत्रे भ्रियमाणे आहवनीये तदा न कालावृत्तिः। उपस्युपोदये वा होमः कार्य इति न कालापगजया ? प्रायश्चित्तम्। आहवनीयानुगमनादि पूर्ववत् कृत्वा प्रातर्होमं कृत्वानुगतेष्टिर्मित्रादिर्वा अनन्तरमेव पि.....

Colophon :

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीगुरुभ्यो नमः । श्रीसरस्वत्यै नमः । श्रीपार्वत्यै नमः । श्रीसाम्बपरमेश्वराय नमः ललिताम्बिकायै नमः ।

1039-ஆ மார்கழி மீ 30-உ காமலா ராமசாஸ்திரியன் எழுதினது.

Author :

Remarks—This work is of great service to Purohitas.

॥ आपस्तम्बश्रौतदीपिका ॥

32. ĀPASTAMBAŚRAUTADĪPIKĀ.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—185. 11 lines per page and 60 letters per line. Script—Tamil Grantha. No. of Granthas—7500. Incomplete.

Subject—Explanation of the Śrauta Sūtras of

Āpastamba, giving the proper time and context of using the hymns of *Vidhi* and *Arthavāda*.

Beginning:

यं स्वं मनोरथमवाप्तुमुपोढविघ्नं
यस्य प्रसादमनवाप्य न शक्नुवन्ति ।
पद्मासनप्रभृतयः प्रथमेऽपि देवा-
स्तद्वस्तु हस्तिमुखमस्तु मम प्रसन्नम् ॥

आज्ञा श्रुतिस्मृती यस्य यस्य यज्ञाः सभाजनम् ।
नमः परस्मै विश्वस्मात् तस्मै श्रीवत्सवक्षसे ॥
आदिमं ब्रह्मणः कोशं मध्यस्थितपरावरम् ।
अपास्ताशेषपाप्मानमापस्तम्बमुनिं स्तुमः ॥

अस्यापस्तम्बसूत्रार्थप्रज्ञानज्ञानसंशयान् ।
सूत्रदीपिकयादित्यं (वृत्त्या) रुद्रदत्तः परास्यति ॥
सन्तु ये सुविवेक्तारः सन्तः स्युर्गुणसाक्षिणः ।
रत्नं रत्नमिति ग्राह्यं मूल्यं किं तस्य गृह्यते ॥

अत्रभगवान् आपस्तम्बः समस्तलोकहितचिकीर्षया विध्यर्थवादमन्त्रात्मकविविधवेदभागव्याकीर्णं विविक्तानेकशाखाव्यासक्तं च विश्वस्य वैतानिकस्य कर्मणो याजुर्वेदिकं प्रयोगं व्याचिख्यासुः तत्र सर्वत्र प्रथमभाविनोऽग्न्याधेयस्यापि इष्ट्यपेक्षत्वात् सर्वेष्टीनां च दर्शपूर्णमासप्रकृतित्वात् समाम्नाये दर्शपूर्णमासमन्त्राणामेव प्राथम्यात् तस्यैवाग्रे व्याख्यानं दर्शयति—अथातो दर्शपूर्णमासौ व्याख्यास्याम इति ।

End:

भारद्वाजः । तत्राह—सुत्या यदग्निहोत्रकालमभ्यतीयात् साय-मग्निहोत्रमभ्यतीयात् सायमग्निहोत्रप्रभृत्यग्निहोत्राणि अतिपदादि प्रतिजुहुयात् । यथाप्रकृति जुहुयादिति सन्तिष्ठतेऽग्निष्टोमः गतः ।

Colophon:

इति सप्तमः पटलः ।

इति भट्टरुद्रदत्तप्रणीतायां आपस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां त्रयोदशः प्रश्नः समाप्तः । शुभमस्तु । श्रीरामचन्द्रपरब्रह्मणे नमः ॥

Author—Bhatta Rudradatta.

Remarks—This is the same as No. 1062 of the D. C. S. M. Madras, Vol. II. The beginning is not found therein.

॥ आपस्तम्बश्रौतप्रयोगदीपिका ॥

33 A. ĀPASTAMBAŚRAUTAPRAYOGADĪPIKĀ.

Substance—Palm leaf. Size—22″ × 2½″. Leaves—185. 12 lines per page and 78 letters per line. Script—Malayālam No. of Granthas—10800.

Subject—The treatment of Śrautaprayogas of the Kṛṣṇayajurveda.

Beginning:

वेदवेद्याय देवाय निगमैः संस्कृतात्मने ।
नमो विज्ञानदेहाय शिवाय परमात्मने ॥

आपस्तम्बाय मुनये नमः सूत्रकर्त्रे पुरा ।
चूडामणिरयमभ्येत्य ब्रह्मभूयमुपेयुषे ।

आपस्तम्बीय . . . सूत्रस्य धूर्तस्वामिव्याख्यानानुसारेण शास्त्रान्तरसिद्धान्तानपेक्षितानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासावारभ्य विश्वसृजामयनपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते । सोमान्तानि नित्यानित्यानि अफलार्थिनामपि कर्तव्यानि नैमित्तिकं ह्येतद्गणसंस्तुतमिति वचनात् । सर्वाङ्गोपसंहारात् समर्थस्यापि कर्तव्यानि ।

End :

संवत्सरं गुरुमपि प्राशान्न प्रत्यवरोहेत् । अभियुक्तस्य यावज्जीवं क्रमेणोढां शूद्रां संवत्सरेणोपेयात् । संवत्सरं पक्षिमांसस्यापि न भक्षणम् । मस्तिष्कं मस्तकमांसं, तस्यायान्न . . . . अग्निचिद्भेति? । न वापेत् । यस्माद् देशानां . . . . . . कृतं तत् स्थापनमावर्तते । वायव्येन पशुनेव संवत्सरादर्वाक् सोमेन यजेत । अन्यासामपि स्त्रीणामुपगमनं क्षत्रियवैश्यविषये । पक्षिमांसप्रतिषेधः सा . . . . न्य उक्थ्यविषय इति केचित् ।

समाप्तश्चाग्निचित्यः क्रतुः । तत्र श्लोकः—

यदा त्वनभिषेकः स्यात् सम्पातावनयो नहि ।
ऋचो हुत्वा प्रभृतैश्च दर्भैस्तरणमेव च ॥
आग्नेयाद्याः पशोः काले न कल्पेन विधीयते ।
एकादशाथ यूपे वाप्येकेनापि (न) लभ्यते ॥

Colophon :

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥
इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां प्रये-

गदीपिकायामग्निचयनं समाप्तम् । हरिः ओम् । हरये नमः ।
शुभमस्तु ॥

(पञ्चमः पटलः) (On leaf 88)

൧൦൭൯- മാണ്ടു ചിത്തിരെ മാസം ൧൨-നു എഴുതിത്തീൎന്നു.

ഗ്രന്ഥം സൂക്ഷിപ്പു രാമശാസ്ത്രികൾ എഴുതിയതു.

Author—Traividyavṛddha. He resided in the village of Tiruppantāl near Kumbhakonam.

Remarks—The Ms. contains three other works also, catalogued as 33 B, C and D.

॥ वाजपेयकारिका ॥

33 B. VĀJAPEYAKĀRIKĀ.

Substance—Palm leaf. Size—22″ × 2½″. Leaves—6. 12 lines per page and 62 letters per line. Script—Malayālam. No. of Granthas—300. Complete.

Subject—The rites of the Vājapeya sacrifice.

Beginning :

शुभमस्तु ।

त्रिकाण्डमण्डनकृता वाजपेयस्य कारिका ।
जीयात् सर्वोत्तरा लोके ह्यापस्तम्बानुसारिणी ॥
वाजपेयविधिं वक्ष्ये सर्वविद्वदनुज्ञया ।
आपस्तम्बानुसारेण...न ह्यविपर्ययः ॥
वाजपेय इति प्रोक्तो नित्योऽसौ जीवतश्च सः ।
कामाधिकार एवैवमक्रियायां हि दुःखदः ॥

अतो वा नित्यवत् प्रोक्तेन जीवदधिकारतः ।
ऋद्ध्यर्थं वापि यजते ब्राह्मणः क्षत्रियोऽपि वा ॥

End :

सर्वेषां वयसा संख्या सम्भूयैतादृशी विदुः ।
सहस्रं पञ्चचत्वारिंशत् ...श्चितचतुष्टयम् ॥
अस्मिन् पक्षे यजुर्युक्तरथदानं न विद्यते ॥
आश्वलायनमार्गेण दक्षिणाक्लृप्तिरुच्यते ॥
तत्रया दक्षिणा पूर्वगणैः सप्त निरूपिताः ।
एवं सप्तदशैवैते तेभ्यः सप्तदश गणाः ॥
यद्युत्तरेषु दशसु क्षण एव न सम्भवेत् ।
पूर्वसप्तकमध्ये तु लब्धमन्यस्य पूरयेत् ॥
अन्ये दश गुणान् पूर्वैः सप्तभिः पाक्षिका विदुः ।
समं विभागतो वापि दक्षिणानां विदुर्बुधाः ॥
हरिः ॐ । श्रीगुरुभ्यो नमः । श्रीरस्तु ॥

Colophon—Nil.

Author—Trikāṇḍamaṇḍana.

Remarks—It is supposed that Trikāṇḍamaṇḍana is a title of Bhāskaramiśra Somayājin, the author of the Vājapeyakārikā.

॥ श्रौतसूत्रम् ॥

33 C. ŚRAUTASŪTRAM.

Substance—Palm leaf. Size—$22\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—$1\frac{1}{2}$. 11 lines on a page and 57 letters in a line.

Script—Malayālam. No. of Granthas—100. Incomplete.

Subject—Śrautasūtra of Āpastamba dealing with the Vājapeya sacrifice.

Beginning:

शरदि वाजपेयेन यजेत ब्राह्मणो राजन्यो वार्थकामो नित्यवदेके समामनन्ति । प्रजापतिमाप्नोति । तस्य षोडशिवत् कल्पः । सप्त सप्तदशो भवति । सप्तदश दीक्षास्तिस्र उपसदः एकविंशीं प्रसूतः । त्रयोदश चात्र दीक्षाः । तिस्र उपसदः । सप्तदशीं प्रसूतः । सप्तदशारत्निर्वैदो यूप ।

End:

मस्रिरसीति । तयाश्वान् समवाक्षिणोत्यनभ्यामादयन्त इतरे रथा॰ पश्चादनुयान्तिवाजिनो वाजिन्धावतेति चतसृभिर्धावतोऽनुमन्त्रयतेऽग्निरेकाक्षरेति यावत् स्वजिति ? यजमानं वाचयति लक्षणं प्राप्योदञ्च आवृत्य प्रदक्षिणमावर्तन्ते मितद्रव इति चतसृभिः प्रत्यायवतोऽनुमन्त्रयते ।

Colophon—Nil.

Author—Āpastamba.

Remarks—Vājapeya sacrifice helps the performer in the attainment of Svārājya.

॥ आपस्तम्बश्रौतप्रयोगः ॥

33 D. ĀPASTAMBAŚRAUTAPRAYOGA.

Substance—Palm leaf. Size—22″ × 2½″. Leaves—7. 11 lines per page and 64 letters per line.

Script—Malayālam. No. of Granthas—300. Incomplete.

Subject—Description of Vājapeya sacrifice.

Beginning:

अमा वाजस्य प्रसवोजिगम्यादिति प्रत्याहृतेपु हुत्वा नैवारम-चम्रापयति सहस्रवांस इति । त्रे पाश्व (?) निमार्ढि यं वस्तासत्या सन्धाभूदिति दुन्दुभिविमोचनीयं जुहोति ॥

End:

श्वेत यतो० श्वेतच्छत्रमस्यस्तीति श्वेतच्छत्री । इइशब्दो वाक्य-पूरणार्थो वा विज्ञायते । ब्राह्मणवचनविधानार्थम् । नन्यास्य इति । किश्चार्थान्तरमेतद् विधीयते । तन्नित्यगुणविकार इति गुणविधाना-र्थम् । तस्माद् गुणपर ....रन्यथा वाक्यभेदप्रसङ्गात् । छत्रं च विभक्तस्य गुणमिति ।

Colophon:

द्वितीयः पटलः । वाजपेयक्रतुः समाप्तः । राजा स्वर्गकामो राजसूयेन यजेत ॥

Author:

Remarks—In the revised Palace Catalogue it is stated that Rāmāṇḍar is the author. He is also called 'Rāmāgnicit' (Vide p. 520 C. C.)

॥ श्रौतभाष्यम् ॥

34. ĀPASTAMBAŚRAUTABHĀṢYAM.

Substance—Palm leaf. Size—$12\frac{3}{4}'' \times 2''$. Leaves—130. 10 lines on a page and 50 letters in a line. Script—Grantha. No. of Granthas—4050.

Subject—An elaborate exposition of Āpastamba's Śrautasūtra discussing the rituals according to the different Śākhās.

Beginning:

शुभमस्तु । श्रीमहागणपतये नमः । सरस्वत्यै नमः ।

शरणागतहृत्पद्मतरुणारुणसारथिः ।
शरणं रघुनाथो मे करुणावरुणालयः ॥

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । अथोपोद्घात । यज्ञं व्याख्यास्याम इति परिभाषायां यज्ञजातिवचनशब्देनैकविंशतिसंस्थस्य यज्ञस्य व्याख्या(तः ?) प्रतिज्ञाता । कथमेकविंशतिसंस्थो यज्ञ इति चेत् । सप्त पाकयज्ञसंस्थाः, औपासनहोमो वैश्वदेवं पार्वणमष्टका मासि श्राद्धं सर्पबलिरीशानबलिरिति सप्त हविर्यज्ञसंस्थाः ॥

End:

यद्यपि मानं सर्वव्यापद्वा भूर्भुवस्सुवरित्याहवनीयजुह्वार्थ ? ति । अतः समाप्ता व्याहृतयः । सर्वप्रायश्चित्तमेकाहुतिः । अनुद्रुत्येति वचनादाहवनीय एव उपदेश एकैकया व्याहृत्या एकैकस्मिन्नग्नौ पूर्ववद्धोमः । जुहुयादिति । द्विरुक्तिः प्रपाठकपरिसमाप्त्यर्था ॥

Colophon:

इति धूर्तस्वामिनः कृतौ आपस्तम्बश्रौतभाष्ये सप्तमः प्रश्नः समाप्तः ॥ ७ ॥ हरिः ॐ । पञ्चमः पटलः परिसमाप्तः । नवमः प्रश्नः समाप्तः । हरिः ॐ । शुभमस्तु । शुभमस्तु । श्रीगुरुभ्यो नमः । सरस्वत्यै नमः । महागणपतये नमः ।

൧൦-മാണ്ടു് വൈകാശിമാസം ൧൫-ാം ൦ചാവ്വാഴ്ച
വെങ്കിട്ടരാമയ്യർ കൈയ്യാൽ എഴുതി തീർന്നു.

Author—Āpastamba—Text.

Dhūrtasvāmin—Commentary,

Remarks—There are 9 praśnas in this work. A few leaves are left blank at the end. Sāmānya sūtrabhāṣya and Baudhāyanasūtrabhāṣya also are works by the same commentator.

॥ आश्वलायनगृह्यम् ॥

35. ĀŚVALĀYANAGṚHYAM.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—58. 6 lines on a page and 26 letters in a line. Script—Malayāḷam. No. of Granthas—525. Complete.

Subject—Domestic rituals, dealing with the 16 *Vedic saṃskāras.*

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

उक्तानि वैतानिकानि । गृह्याणि वक्ष्यामः । त्रयः पाकयज्ञाः । हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः । अथाप्यृच उदाहरन्ति यः समिधा य आहुती यो वेदेनेति ॥

End:

स्थालीपाकं सर्वहुतम् । बर्हिराज्यं चानुप्रहृत्य धूमतो गाव आनयेत् । शन्तातीयं जपन् पशूनां मध्यमियान्मध्यमियात् ।

नमः शौनकाय नमः शौनकाय ॥

Colophon :

इत्याश्वलायनगृह्ये तृतीयोऽध्यायः ।

Author—Āśvalāyana (prior to the 6th Century B. C.)

Remarks—Āśvalāyana was a disciple of Śaunakācārya, the author of *Smṛti, Śikṣa* and other works in the *Vedic* line.

॥ आश्वलायनगृह्यसूत्रम् ॥

36 A. ĀŚVALĀYANAGṚHYASŪTRAM

Substance—Palm-leaf. Size—18½″ × 2″. Leaves—1—11. About 11 lines per page and 68 letters per line. Script—Malayālam. No. of Granthas—500. Complete.

Subject—Gṛhya. Rules for the observance of domestic rituals.

Beginning and End : Same as No. 35.

Colophon :

इत्याश्वलायनगृह्ये चतुर्थोऽध्यायः ।

अक्षरं यत् परिभ्रष्टं मात्राहीनं तु यद् भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥
गोदवर्मणाच्युतशिष्येण लिखितमिदम् ।

Author—Same as No. 35.

Remarks—This work has been published with the Vṛtti Anāvila of Haradatta (Vide No. 78, T. S. S.). Four other works are attached to the Ms. and are catalogued as 36 B, C, D & E.

॥ ऋक्सर्वानुक्रमणी ॥

36 B. ṚKSARVĀNUKRAMAṆĪ.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—12—23. About 11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—500. Complete.

Subject—An Index to Ṛṣis, Devatas, Metres etc., of the Ṛgveda.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ॐ अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतच्छन्दांस्यनुक्रमिष्यामो यथोपदेशम् । नह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणा(र्षेयं)यच्छन्दोदैवतविज्ञानाध्यापनाभ्यां श्रेयोऽधिगच्छत्येताभ्यामेवानेवंविदोऽयातयामानि छन्दांसि ....

End:

मानुष्टुभं संसं चतुष्कं संवननः संज्ञानमाद्याग्नेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुप्। तदेतत् सूक्तसाहस्रं ससप्तदशकं सापादादिकम्॥

Colophon:

नमो ब्रह्मणे नमो ब्रह्मणे नम आचार्येभ्यो नम आचार्येभ्यो नमः शौनकाय।

Author:

Remarks—From the line "सर्वानुक्रमणी सैषा कात्यायनमुनेः कृतिः।" *occurring in Vedārthadipikā*, a commentary on the work by Ṣadgurusisya it is clear thatthe author is Kātyāyana. A similar reference is also seen in the Deccan College Ms. of Sarvānukramaṇika (Vide page 25. D. C. G. C. M. Deccan College, Poona.)

॥ छन्दःशास्त्रम् ॥

36 C. CHANDAŚŚĀSTRAM.

Substance—Palm leaf. Size—18½" 2". Leaves—2; 24 & 25. About 11 lines per page and 66 letters per line. Script—Malayālam. No of Granthas—100.

Subject—Description of Vedic metres,

Beginning:

धी श्री स्त्री । वेरा । सार्यकगुहार । वसुधार्धसाते स्वक् । कदा सज । किं वेद । नहसनं । गृल् । गन्ते । प्रादिपरः । हि । लौ सः । ग्लो । अष्टौ । पशवः ।

End:

तद्गुणितं द्विघ्नं तदन्तानां एको नेयाः परे पूर्णं परे पूर्णमिति ।

Colophon:

इति पैङ्गले छन्दःशास्त्रे अष्टमोऽध्यायः ।

Author—Piṅgaḷācārya. He may be identical with the author of Pāṇinīyaśikṣā referred to in No. 6 E.

Remarks—This has been printed.



॥ ऋग्वेदपादलक्षणम् ॥

36 D. ṚGVEDAPĀDALAKṢAṆAM.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaf—1(26). 11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—50.

Subject—Same as 6 B.

Beginning:

ॐ ऋक्षु पादाः सांकेतिका भवन्ति । दुराम्नाताश्चापि भवन्ति । केचित् तदनुसदन्त्ये ? दं निबोधताचार्येण शौनकेनेङ्गितं यत् संपातेऽप्येति पादान्तो देववान्सप्तविंशकमेतेन मित्रावरुणेन पुयाकवः सुताः स चा ।

End:

पादादिप्नेति तत् पदम् ।

त्रिंशतं प्रकृतान्येतदर्वाश्वं त्वेत्पृगुत्तमा ।

इन्द्रस्वा (?) इन्द्रस्वाहा चैतसिन्निमं कार्मं तथा शुनम् ॥

यथा वार्मं त्रिरेवावामानुपूर्व्यं प्रचक्षत इति ।

Colophon:

शौनकाय नमः श्रीशौनकाय नमः ।

Author:

Remarks—Same as 6 B, but containing more variants in reading.

॥ ऋग्वेदपदलक्षणम् ॥

36 E. ṚGVEDAPADALAKṢANAM.

Substance—Palm leaf. Size—18½" × 2". Leaves—27—35. About 11 lines per page and 68 letters per line. Script—Malayālam. No. of Granthas—375. Incomplete.

Subject—Prescription of Lakṣana to keep the words of the Ṛgveda in tact.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ॐ शार्यातस्य प्रभृता विसर्जनीयाः । नमागरजिति दामाः । धारावरा इति मृगा भीमाः प्रभ्रनृता इति सुनृताः । इन्धूर्यमिति चोदयः । विप्रस्य मेध्यातिथेरिति मेध्यातिथेः यस्ते स्वर इति स्वं यो यो...शृन्ताम्य इति भक्षाः इन्द्रं नमस्य इति नमस्याः ।

End:

नूनं देवेभ्यो यमच्छावर्जं समापाद्यान्युत्तरेषु पकारेराधेरथोग्रादिवांजा ऋतश्च अङ्गस्त्वादुप्रेति च पूर्ववद्यावनिङ्गयन् त्रिक्रममेस्मृ(?) कुर्यात् इच्छन्ति न कामिनन्ति महीमहे प्रब्रह्म जोहवीति ।

Colophon—Nil.

Author:

Remarks—A few unconnected sentences of the type of,

'स्वरान्ताः समाप्ताः', 'नग्रगृह्यं समाप्तम्', 'एकपदं समाप्तम्', 'एकारं समाप्तम्', 'ककारं समाप्तम्' ।

are found in the Ms

॥ आश्वलायनगृह्यभाष्यम् ॥

37. ĀŚVALĀYANAGṚHYABHĀṢYAM.

Substance—Palm leaf. Size—7"×1½". Leaves—232. 7 to 9 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—2500.

Subject—A gloss on the aphorisms of Āśvalāyana in relation to domestic rituals.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु । श्रीशौनकाय नमः ।

नमस्कृत्य सरस्वत्यै गुरुभ्यश्चैव सर्वशः ।

शौनकं तु विशेषेण प्रणम्य प्रयतः शुचिः ॥

अर्थनिसरणार्थं तु किञ्चिद् वक्ष्यामि... ।

... ... तिष्ये यथास्मृतम् ॥

गृह्याणां यानि सूत्राणि तेषां चादौ यथान्ततः ।

ग्रहणं वक्ष्यते यत्तु तदेतत् सूत्रमुच्यते ॥

उक्तानि वैतानिकानि । गृह्याणि वक्ष्यामः । तत्रेदं प्रतिज्ञासूत्रम् । उत्तरत्रास्य विधिर्विस्तरेण वक्ष्यते । गृह्याणीति । गृहभवानि यानि कर्माणि तानि गृह्याणि । तत्रायं गृह-

End

प्रतिषेधः क्रियते । एवमादि सर्वीयन्नाभ्यापद्येतेति इदं तु प्राण-संशयं नाभ्यापद्येतेत्येतदुक्तं भवति । महद्वै + ज्ञायते । यन्महद् भूतं स्नातकस्तस्मान्नाभ्यापद्येतेत्येतदुच्यते ।

Colophon

इत्याश्वलायनगृह्यव्याख्याने प्रथमोऽध्याय ।

इति गृह्यव्याख्याने द्वितीयोऽध्याय ।

Author

Remarks—The Ms ends abruptly at the close of the 9th Khanda in the 3rd Chapter The Revised Palace Library Catalogue mentions Bhagavaddevasvami as the author

The Colophon 'इति देवस्वामिकृते आश्वलायनगृह्यभाष्ये' found in transcript No 380 of C O M L corroborates this view

---

॥ आश्वलायनगृह्यव्याख्या ॥

38 A ĀSVALĀYANAGRHYAVYĀKHYĀ.

Substance—Palm leaf Size—11"×1½ Leaves—90 9 lines per page and 42 letters per line.

Script—Malayāḷam. No. of Granthas—2000. Complete.

Subject—Domestic rituals.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आश्वलायनमाचार्यं प्रणिपत्य जगद्गुरुम् ।

देवस्वामिप्रसादेन क्रियते वृत्तिरीदृशी ॥

उक्तानि वैतानिकानि । गृह्याणि वक्ष्यामः । वैतानिकान्युक्तानि । अतः परं गृह्याणि वक्ष्यामः । वितानोऽग्नीनां विस्तारः, तत्र भवानि वैतानिकानि । स्वभव(ना)ग्निसाध्यानि कर्माणीत्यर्थः । गृहनिमित्तोऽग्निर्गृह्यः ।

End:

अन्ये शन्तातीयशब्दवन्ति सूक्तानि शन्तातीयशब्देनोच्यन्त इति व्याचख्युः । कानि तानीळे द्यावापृथिवी इदं हनमेपाम् । उक्तदेवा अत्र इहितमित्येतानि । शं न इन्द्राग्नी इतीदं शन्ता(ती)यं .... न्तलक्षणं द्विर्वचनम् । नमः शौनकाय नमः शौनकाय ।

Colophon:

इत्याश्वलायने नारायणीये चतुर्थोऽध्यायः ।

Author—Nārāyaṇa.

Remarks—This has been printed at Bombay. Devasvāmin mentioned in the introductory verse may be identical with the reputed Bhāṣyakāra.

॥ व्रतखण्डव्याख्या ॥

38 B. VRATAKHAṆḌAVYĀKHYĀ.

Substance—Palm leaf. Size—14" × 1⅞". Leaves—4. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—75.

Subject—Same as No. 38 A.

Beginning:

एताद्विदं + अहः । यान्येतानि महाव्रतवर्जितानि अनुक्रोशन्तान्यहानि तानि मन्त्रब्राह्मणसूत्राध्ययने(न) तदर्थज्ञानेन च विदित्वा तेषामह्नामेकाहाहीनस्वाभावं च यो वेद, स एत—

End:

तैषाद्य—पूर्वाणां येऽधीतपूर्वास्ते तस्मिन् कालेऽधीयीरन् श्राव .... परावधि तैषी पूर्णमासी पूर्वावधिर्यस्य कालस्य स काल इति ।

Colophon:

हरिः ॐ शुभमस्तु ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Author:

Remarks—Vratakhandavyākhyā is not a separate treatise, dealing as it does with only a Khanda in relation to Mahānāmrivrata found in certain Sūtras. Āśvalāyana does not deal with that holy ceremony at length.

॥ गृह्यसूत्रम् (तात्पर्यदर्शनोपेतम्) ॥

39 GṚHYASŪTRAM
with
the commentary Tātparyadarśana.

Substance—Palm leaf. Size—14¾″ × 2″. Leaves—112. 10 to 13 lines per page and 36 letters per line. Script—Tamil Grantha. No. of Granthas—2500. Complete.

Subject—Aphorisms on domestic rituals by Āpastamba with a concise gloss.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यो वर्णैरिज्यते नित्यैः कर्मभिश्चोदितैर्निजैः ।
तेभ्योऽपवर्गदो यश्च तं नमाम्यद्वयं हरिम् ॥
आपस्तम्बमुनिं वन्दे मन्दधीहितकाम्यया ।
योऽन्वष्टेयपरार्थानां क्रमकल्पमकल्पयत् ॥
यत्कृतं वेदवद् भाष्यमाद्रियन्ते विपश्चितः ।
स कपर्दी चिरं जीयाद् वेदवेदार्थतत्त्ववित् ॥
सुदर्शनार्यैः कुरुते गृह्यतात्पर्यदर्शनम् ।
केवलं वैदिकश्रद्धाघोरितो मन्दधीरपि ॥

श्रीगुरुभ्यो नमः । अथ कर्माण्याचाराद्यानि गृह्यन्त । अथ आनन्तर्यार्थः । तदर्थं पूर्ववृ(त्तान्त ? त्त)मुच्यते । इह हि यज्ञा एकविंशतिभेदाः । तत्र च औपासनहोमो वैश्वदेवं पार्वणमष्ट.....

End:

केचित । निदधाति प्रतिष्ठापयति । परिधिवचनाच्च तस्याश्मनः प्रच्यावनं न कर्तव्यमिति । दधातीति द्विरुक्तिः प्रश्नपरिसमाप्तिसूचनार्था । तत्र श्लोकः—

इत्थं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ।
कृतं भाष्यानुसारेण यथामति यथाश्रुतम् ॥
अत्रानुक्तं दुरुक्तं वा मतेर्मान्द्याच्छ्रुतस्य वा ।
सन्मार्गप्रवणानां नः क्षन्तुमर्हन्ति पण्डिताः ।

Colophon :

इति गृह्यतात्पर्यदर्शने अष्टमः पटलः समाप्तः । हरिः ॐ । शुभमस्तु । श्रीमते हयग्रीवाय नमः । श्रीरामजयम् ॥

Author—Sūtra—Āpastamba.
Vyākhyā—Sudarśanārya.

Remarks—The work has been published at Kumbhakonam in Tamil script. The important treatises of Sudarśanārya are:—

Āhnikasāra, Bhāgavatapurāṇabhāṣya, Śrautaprakāśika etc. Kapardin referred to in the introductory verse is the reputed author of Āpastambaśrautasūtrabhāṣya, Bhāradvājagṛhyasūtrabhāṣya etc.



॥ धर्मसूत्रम् (उज्ज्वलोपेतम्) ॥

40. DHARMASŪTRAM
with
the commentary Ujjvalā.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—74. 9 lines per page and 64 letters per line. Script—Malayālam. No of Granthas—2700.

Subject—Codification of rules regulating the social and religious observances.

Beginning :

प्रणिपत्य महादेवं हरदत्तेन धीमता ।
धर्माख्यप्रश्नयोरेषा क्रियते वृत्तिरुज्ज्वला ॥

अथातः सामयाचरिकान् धर्मान् व्याख्यास्यामः । अथशब्द आनन्तर्ये । अतःशब्दो हेतौ । उक्तानि श्रौतानि (ग्रा ? गृ)ह्याणि च कर्माणि । तानि च वक्ष्यमाणान् धर्मानपेक्षन्ते । कथम् । आचान्तेन कर्तव्यम्, पवित्रपाणिना कर्तव्यम्, यज्ञोपवीतिना कर्तव्यम्, इति वचनाद् आचमनशौचादीनपेक्षन्ते ।

End :

तृणच्छेदनलोष्टविमर्दनष्ठेवनानि चाकारणात् । तृणच्छेदनादीनि नाकारणात् कुर्यात् । ष्ठेवनस्य कारणं प्रतिश्यायादि । इतरत्र मृग्यम् । यश्चान्यत् परिचक्षते । यश्चान्यदेवं युक्तमार्याः परिवर्जयन्ति । तदप्यक्षक्रीडादि वर्जयेत् । द्विरुक्तिः प्रश्नपरिसमाप्तिकृता ।

Colophon :

इति (हास ? हर) दत्तविरचितायां धर्मप्रश्नोज्ज्वलायामेकादशपटलेन प्रथमप्रश्नः समाप्तः । हरिः ॐ । शुभम् ।

Author : Text—Āpastamba.

Commentary—Haradatta.

Remarks—The Dharmasūtra of Āpastamba comprises two *praśnas.* The Ms. contains only the 1st *praśna* with commentary.

॥ धर्मसूत्रम् (उज्ज्वलोपेतम्) ॥

41. DHARMASŪTRAM
with
the *commentary Ujjvalā.*

Substance—Palm leaf. Size—15" × 1¾". Leaves—55. 11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—1800. Incomplete.

Subject—Same as No. 40.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पाणिग्रहणादधि गृहमेधिनो व्रतम् । पूर्वस्मिन् प्रश्ने आद्ययोः पटलयोः प्रायेण ब्रह्मचारिधर्मा उक्ताः । उत्तरेष्वष्टसु सर्वाश्रमाणाम् । एकादशे समावृत्तस्य । इदानीं पाणिग्रहणादारभ्य कर्तव्यानि कर्माण्युच्यन्ते । पाणिर्यस्मिन्नहनि गृह्यते तत् पाणिग्रहणम् । अधिशब्द ऊर्ध्वार्थे वर्तते । तस्मादूर्ध्वं गृहमेधिनो गृहस्थाश्र(म ? मे) वसतो यद् व्रतं कर्तव्यं, जात्येकवचनम् । तदुच्यते । पाणि ....

End:

स्त्रीभ्यः स(प्तप ? र्वेच)र्णेभ्यश्च धर्मविशेषान् प्रतीयादित्येक इत्येके । उक्तव्यतिरिक्ता धर्मा धर्मशेषास्तान् स्त्र्यादीनामपि सकाशात् प्र(दी ? ती)याद् इत्येके मन्यन्ते । यतः प्रतिजनपदं प्रतिकुलं च भिन्नास्तथैव प्रत्येतव्याः । तत्र द्राविडाः कन्या (मेष ?) मेषस्थे सवितरि आदित्यपूजामाचरन्ति भूमौ मण्डलमालिख्येत्यादीन्युदाहरणानि । द्विरुक्तिरध्यायसमाप्त्यर्था ।

Colophon :

इति हरदत्तमिश्रविरचितायां धर्मव्याख्यायामुज्ज्वलायां द्वितीयप्रश्ने एकादशः पटलः । इति द्वितीयप्रश्नः समाप्तः । हरिः ॐ । शुभमस्तु । अविघ्नमस्तु । श्रीमते वेदान्तगुरवे नमः ।

प्रयोजयिता मन्ता कर्तेति क्षेत्रं परिगृह्य चरिते यथापुरम् । भृत्यानामनुपरोधेन । व्याख्यातः सर्ववर्णानाम् । अथाप्यस्य प्रजा किं भूयांसि पानीयमनिच्छन् । तस्यारण्यमाच्छादनं विहितं चत्वार आश्रमाः मासि श्राद्धे तिलानां द्रोणं द्रोणं गौरसर्षपाणां चूर्णानि कारयित्वा । विलयनं मथितम् । पिण्यकं खड्गोपस्तरणसहदेवमनुष्या । एतेन देशकुलधर्मा व्याख्याताः । जीवन् पुत्रेभ्यो दायं विभजेत् समं स(त्रीर्णां? वेवर्णानां)पूर्वशास्त्रविहितायां शक्तिविपयेण द्रव्याणि दत्त्वा इतरेषां वर्णानां भिक्षणे मित्रं श्वोभूते यथामनसं तर्पयित्वा येन कृतावसथा स्यात् । स एष प्राजापत्यः कुटुम्बिनः जात्याचारसंशये सर्वविद्यानामप्युपनिषदाम् । शय्यादेशकालिङ्गना आर्याः प्रयता वैश्वदेवैः । अपि वा लेपान् प्रक्षाल्य । पाणिग्रहणादधि गृहमेधिनो व्रतम् । पाणिग्रहणादार्या जात्याचार येन कृता भिक्षणे सवर्णा सह विलयनं चत्वारो व्याख्याताः क्षेत्रमेकादश । पाणिग्रहणादित्येक इत्येके । श्रीगुरवे नमः । श्रीमते वेदान्तगुरवे नमः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीवासुदेवाय नमः । श्रीसरस्वत्यै नमः ।

Author—Same as No. 40.

Remarks—This Ms. is a continuation of No. 40. The second *prasna* is completed herein. After the colophon one paragraph is inserted regarding the Dharmasūtra—a treatise on Smṛti.

॥ श्रौतप्रायश्चित्तप्रदीपिका ॥

42. ŚRAUTAPRĀYAŚCITTAPRADĪPIKĀ.

Substance—Palm leaf. Size—18"×1½". Leaves—72. 8 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—2500. Incomplete.

Subject—Description of the expiatory rites in Śrauta.

Beginning:

... ...

... ...

अत्रोपवासस्तु अर्थान्निवर्तते । प्रयोगक्रमः पूर्ववदेव । एव-मिष्टिं समाप्य प्रणयनादि पुनर्दर्शेष्टिः कर्त्तव्या । केचित्तु दधि पयो वा यदार्तिगतं प्रणयनादि तन्त्रेण सह तेनैव पुनर्यागं कुर्वन्ति । इतरयोरदुष्टत्वात् । अपरे तु यदार्तिगतं तस्य स्थाने पूर्वोक्तेन प्रकारेण पुरोडाशं कृत्वा प्रातर्देहिन सह यागं कृत्वा तदानीमेव वत्सापकरणादि तदेव हविरुत्पाद्य तेन च यागं कृत्वा पार्वणहो-मादिशेषं सर्वेषां तन्त्रेण कुर्वन्ति । केचित् त्वेवमाहुः यद्यपि अन्यतरार्तावपि ब्राह्मणे पुनर्याग उक्तः , तथापि सूत्रकारे-णानुक्तत्वादन्यतरार्त्तौ न पुनर्यागः । तस्य स्थाने पुरोडाशा-न्निरुप्य पूर्ववद् यागमात्रं कर्त्तव्यमिति ।

End:

अनलदग्धारिप्परा(?)नलोज्ज्वलैः ... ... तायै ॥

Colophon—Nil.

Author—Varadādhiśayajvā.

यस्य प्रसादान्मूकोऽपि भवत्यागमपाण्डितः ।

... ...

......वंशदासेन वरदाधीशयज्वना ।

क्रियते सोमपेनैषा प्रायश्चित्तप्रदीपिका ।

बालानां सुखबोधाय ... ...

... ... पुनरुक्तयः ॥

From the above lines seen in Transcript No. 2238 of H. H. The Maha Raja's Palace Library, the author of the work is known to be one Varadādhīśa. We also learn that he performed the soma sacrifice. C. C. (Page 550) makes mention of one Varadarāja, the author of Yājñaprāyaścittavyākhyā. The Adyar Library Catalogue (Part I, page 74) refers to Śrautaprāyaścittapradīpikā of Varadarāja.

Remarks—The work deals with the expiatory rites for shortcomings in the performance of the Darśapūrṇamāsa and other sacrifices according to the different sūtrakāras. It is based on Śrautasūtras and Brāhmaṇas. It is very old and worn out.

॥ श्रौतप्रायश्चित्तविवरणम् ॥

43. ŚRAUTAPRĀYAŚCITTAVIVARAṆAM.

Substance—Palm leaf. Size—14" × 1½". Leaves—114. 7 lines per page and 40—42 letters per line. Script—Malayālam. No. of Granthas—2000.

Subject—Discussion on the expiatory rites relating to yajñas.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

यत्तद् ब्रह्म जगद्बीजमामनन्त्यागमोक्तयः ।
श्रीमच्छिवकराग्रामवास्तव्यं वस्तु तत् स्तुमः ॥

अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । अथशब्द आनन्तर्यार्थः । उक्तानि दर्शपूर्णमासादीनि श्रौतानि कर्माणि । अनन्तरं तेषां करणेऽन्यथाकरणे वा प्रायश्चित्तानि व्याख्यास्यामः । अतःशब्दो हेत्वर्थः । यस्माद् दर्शपूर्णमासादिकर्मणां सकलावगतिर्वैगुण्यावगतेर्हेतुस्तस्मादिति । तत्र प्रथमं मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । मन्त्रेणाम्नातानि गणेनाम्नातानि च मन्त्रगणाम्नातानि । कानिचिन्मन्त्रेणावगम्यन्ते कानिचिद् गणेन । ब्रह्म प्रतिष्ठा मनस इत्येवमादीनां प्रायश्चित्तत्वं मन्त्रसामर्थ्यादवगम्यते ।

End:

अतस्तदेवावपृष्टं मित्रो जनानित्यादिना हुत्वान्यान् वेत्यादि । यदि पूर्वस्यामाहुत्यामहुतायामुत्तराहुतिं तनोति यदि वे.................

पूर्वमाहुतिमभिजुहुयात् । यत्रि वेत्थे(ननप्नुतः ? वनस्पत) इत्यादिना समिधमादध्यात् । स्कन्ने यदि स्रुचि शेषमेव पुनर्जुहुयात् । अथान्यान् दुग्ध्वेत्यादि । यान् पुरा प्रयाजेभ्य इत्यादि । गर्भं स्रवन्तीमित्यादिनाग्निहोत्रस्थालीं स्रवन्तीमभिमन्त्र्य विधुं दद्राण-मिति सन्दध्यादिति भगवानापस्तम्बः ।

Colophon:

इति गोपालकृते यज्ञप्रायश्चित्तविवरणे
तृतीयप्रश्ने नवमोऽध्यायः ।
समाप्तश्चायं ग्रन्थः ।

इत्थं याज्ञिपु चिन्तसुः रममाणश्चकार हत इमात् वैचम्य्या सीकीद् व्याख्याद् गोणे यज्ञाङ्गलक्षणः (?) ।

यो यवष्ट्वत्येत्वन देवतान्यजति चरुपुरोडाशसोमादिभावं
गत्वा यो हूयतेऽग्नौ वहति तदखिलं योऽग्निभावं दधानः ।
सन्तसो देवतात्मा पितरिति निखिलं काङ्क्षितं यश्च कर्त्रे ।
तश्नो यज्ञमूर्तिर्दिशतु शिवकरग्रामवासी शिवो नः ॥ (?)

हरिहरहिरण्यगर्भेभ्यो नमः ।

अस्ति सह्याद्रिपादेषु तीरे पश्चिमवारिधेः ।
केरलाख्यो जनपदः सुसमृद्धजनाकुलः ॥
यः स्वबाहुबलेनैव वरुणादाहृतः पुरा । जामद् हरिहर (?)

Author—Gopala.

Remarks—The Ms. comprises three *prasnas* containing 11, 10 and 9 chapters respectively. It is decayed.

' उक्तानि दर्शपूर्णमासादीनि श्रौतानि कर्माणि । अनन्तरं तेषा-मकरणेऽन्यथाकरणे वा प्रायश्चित्तानि व्याख्यास्यामः '

It was perhaps on the above basis that the title was given as Śrautaprāyaścittavivaraṇa in the revised Palace Catalogue. But from the colophons it is seen that the name is Yajñaprāyaścittavivaraṇa. The author praises the *mahas* that presides over the Śivakaragrāma, at the opening of the work. In the beginning of the second chapter he says,

"वटतरुनिकटनिषण्णं
विघटितभजमानमोहमहिमानम् ।
प्रणमत शिवकरवसतिं
शिवकरमीशं जगत्त्रयाधीशम्" ॥

and at the beginning of the 7th chapter, adds,

" नमामि दक्षिणामूर्त्तिं वटमूलनिवासिनम् ।
कृता शिवकरे येन वसतिः करुणालुना ॥ "

He thus eulogises Śankara, the presiding deity of the Śivakaragrāma.

Two additional leaves are attached to the Ms. dealing with other subjects, one relating to the Goddess Durga and the other regarding the rituals of the Agnistoma, in old Malayālam.

॥ श्रौतप्रायश्चित्तशतद्वयी [सव्याख्या] ॥

44. ŚRAUTAPRĀYAŚCITTAŚATADVAYĪ.

Substance—Palm leaf. Size—9″ × 1¾″. Leaves—88. 10 lines per page. 25 letters per line. Script—Tamil Grantha. No. of Granthas—1400.

Subject—The expiatory rites connected with Śrauta.

Beginning:

महागणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

आपस्तम्बमुनिं नत्वा प्रायश्चित्तशतद्वयीम् ।
बालानां सुखबोधाय व्याकरिष्ये यथामति ॥
नैमित्तिकेषु श्रुतिलक्षणेषु सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्या ह्यनुसृत्य सम्यक् सुखाय बोधाय विविच्यते तत् ॥

हविर्यज्ञप्रायश्चित्तेषु च मन्दबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते, तदेव प्रायश्चित्तं तेषां स्पष्टावबोधार्थं स्वरूपतो विषयतश्च विविच्य प्रदर्श्यते । यद्यपि सूत्रेष्वस्पष्टं तद् व्याख्याने स्पष्टं भवति । तथापि भाष्ये वृत्तौ च व्याकीर्णतया दुर्ज्ञातस्य भाष्यानुसारेण क्रमेणैकत्र संगृह्य प्रतिपादने मन्दबुद्धीनां सुखावबोधो भवतीति तदर्थोऽयमारम्भः ।

End:

नैमित्तिकेष्टेरिह शक्त्यभावे
पूर्णाहुतिस्तत्र च देवतार्थे ।
स्रुवाहुतिर्वा हृदयेऽनुचिन्त्यो
यज्ञेश्वरो यज्ञमयश्च विष्णुः ॥

यत्र च रूपं नैमित्तिकं विधीयते । तत्र तदशक्तौ स्वरूपं च प्रागेवास्याख्यातम् । तदभावे स्रुवाहुतिः कर्तव्या । सर्वेषु प्रायश्चित्तेषु यज्ञमयो विष्णुः स्मरणीयः ।

(अनक्तपत्राः ? अनुक्तमन्त्रा) प्यपारिस्पुटं यत्

तद् भाष्यवृत्त्यादिषु बोधनीयम् ।

तत्राप्यनुक्तं तु तदुक्तरीत्या

यथानिमित्तं स्वयमूहनीयम् ॥

तावस्मिन् सर्पाग्रहे ? प्रायश्चित्तानि तुल्येन प्रतिपादयितुं शक्यन्ते । विस्तरे पुरुषाणां प्रमादादिदोषावश्यम्भावेन गहने कर्ममार्गे नानाविधस्खलनसम्भवात् । अतस्तत्राप्यनुक्तं सूत्रभाष्याद्युक्तन्यायानुसारेण तत्तन्निमित्तानुगुणं स्वयमेवोहनीयमिति सिद्धम् ।

Colophon:

वत्सकुलभूषणश्रीवेङ्कटवाजपेययाजिनः प्रायश्चित्तशतद्वयीव्याख्यानेऽग्न्यनुगमना(नि ? दि) प्रायश्चित्तनिरूपणं नाम प्रथमं प्रकरणम् ।

वत्सकुलभूषणश्रीवेङ्कटेश्वरकृतौ शतद्वयीव्याख्या समाप्ता ।

Author—Veṅkaṭeśvara.

Remarks—This is a commentary on Prāyaścittaśatadvayī, a work comprising 209 verses dealing with the *prāyaścittas* enjoined by Āpastamba. It is seen from the D. C. S. M. Madras (pages 794 and 795, Vol. II) that there is another work of the same name by Bhāskara.

॥ श्रौतप्रायश्चित्तसंग्रहः ॥

45. ŚRAUTAPRĀYAŚCITTASAṄGRAHA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—162. 9 lines per page and 26 letters per line. Script—Malayalam. No. of Granthas—2400. Complete.

Subject—A compilation of expiatory rites (Śrauta.)

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

विघ्नेशं दक्षिणामूर्तिं भारतीन्द्रगुरूनपि ।
प्रणम्य श्रौतविषयं प्रायश्चित्तं विचिन्त्यते ॥
स्वबुद्धिशुद्धये यत्नः क्रियते स तु कुत्रचित् ।
प्रयोगसौकर्यायापि स्याचेदत्यर्थमर्थवान् ॥
यत्तद्द्राधूळकमतव्याजेन गुरुभिः कृतम् ।
सर्वशाखोपचारार्थं चित्तसारनिबन्धनम् ।
यद्यद्बौधायनमते चोपकारि भवेदिह ।
तद् विविच्य(च)बालानामुपकाराय लिख्यते ॥
विविच्य वचने तत्राप्यावापोद्धारसम्भवात् ।
क्रियतेऽत्र यथायोगं यतस्तद्विषयो मया ॥
विनाशः प्राय इत्युक्तश्चित्तं सन्धानमुच्यते ।
विनष्टस्य तु सन्धानं प्रायश्चित्तपदेरितम् ॥
विष्यपराधे कुर्यात् प्रायश्चित्तं विधिस्तु कर्मैव ।
अपराधस्त्वस्यादकरणमयथाकृतिर्वापि ॥
वैधे कर्मण्यवैधानुष्ठानात् तद्विफलं भवेत् ।

प्रायश्चित्ते कृते तस्य साफल्यमुपजायते ।
प्रायश्चित्तं प्रकुर्वीत दोषोत्पत्तेरनन्तरम् ॥
सामान्येनादितः कालो विशेषे विहितोऽपि वा ।
न प्रतीक्ष्यो वसन्तादिर्नष्टाग्नेराहितौ यथा ॥
यद्यापन्नसमाधानं यश्चाप्यापत्तिनिष्क्रयः ।
तयोरप्यवधानेन सर्वत्र करणं भवेत् ॥


End :

रा दाने । ला दाने । वा गतिगन्धनयोः । एभ्यो धातुभ्यो डप्रत्ययो भवति । य र ल व । शमिमुषीसतिहाभ्यो मुलोपश्च । शम् उपशमने । एभ्यो धातुभ्यो डप्रत्ययो भवति । मुलोपश्च । श ष स ह । कायतिपिबत्योः कपौ च । कै शब्दे । पा पाने । आभ्यां धातुभ्यां डप्रत्ययो भवति । तत्सन्नियोगेन क प इत्येतावादेशौ भवतः ।

Colophon :

इति प्रायश्चित्तसंग्रहे अष्टमोऽध्यायः ।

Remarks—The work contains 9 chapters. It begins with the expiatory rites connected with Āgrayanaisti and ends with Pisadajyagrahana. The closing portion is in Malayālām The words "തെക്കാട്ട യോഗീശ്വരൻ ബോധകിയതു്" are found on a detached leaf at the commencement of the work.



॥ श्रौतसूत्रम् ॥

46. ŚRAUTASŪTRAM.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 2''$. Leaves—104. 7—9 lines on a page and 36 letters in a line. Script—Malayāḷam. No. of Granthas—1900.

Subject—Aphorisms on the theological rituals (of the Ṛgveda) by Āśvalāyana.

Beginning:

आग्नेयान्यां वैष्णवीम् । उक्ता देवताः। तासां याज्यानुवाक्या ...

... ...
... ...
... ...

यो अद्य वामान्यं दिवो मातरिश्वा जभारेति ।

End:

कण्वो नामाङ्गिरसा जमिळकाण्वेति घोर ... ...
... ...

Colophon:

इति आश्वलायनसूत्रे एकादशोऽध्यायः ॥

Author—Āśvalāyana.

Remarks—The Ms. is nearly 500 years old and worn out. The first few leaves are missing. The work is divided into two parts, the Pūrvaṣaṭka and Uttaraṣaṭka, each comprising six chapters. It begins from the 5th *khaṇḍika* of the first chapter and ends with a part of the 12th

chapter. The printed book (A. S. Calcutta) contains only the portion up to the 2nd sūtra in the 7th kāṇḍa of the 7th chapter. The Adyar Library Catalogue (Part I, page 55) mentions the same work with the vṛtti of Nārāyana, while No. 2697 of the Madras Triennial Catalogue (Vol. II, Part I C.) embodies only the Pūrvaṣatka.



॥ श्रौतसूत्रम् ॥

47. ŚRAUTASŪTRAM.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 2''$. Leaves—144. 9 lines on a page and 46 letters in a line. Script—Malayālam. No. of Granthas—3700. Complete.

Subject—Same as No. 46.

Beginning:

श्रीमहागणपतये नमः। ओं नमः शिवाय। अविघ्नमस्तु। हरये नमः। अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामोऽग्न्याधेयप्रभृतीन्याह वैतानिकानि। दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तन्त्रस्य तत्राम्नातत्वाद् दर्शपूर्णमासयोर्हविष्यामन्त्रेषु हो......स्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद्विहारं प्रपद्यते।

End:

पुरोहितप्रवरा राज्ञामथ यदि सार्षं प्रवृणीरन् मानवैलपौरूरवसेति सत्राणि तान्यदक्षिणानि ज्योतिष्टोमः पृष्ठमम ... यः सहस्रदक्षि-

णोऽन्यो वा प्रज्ञातदक्षिणो दक्षिणावता पृष्ट्वा निशमयेरन्निति विज्ञायते । स एव हेतुः प्रकृतिभावे प्रकृतिभावे ।

Colophon:

नमो ब्रह्मणे । नम आचार्येभ्यः । नमः शौनकाय । नमः शौनकाय ।

इत्याश्वलायनसूत्रे द्वादशोऽध्यायः ।

गणपतये नमः । सरस्वत्यै नमः । वेदव्यासाय नमः ।

अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥
नारायणेन लिखितमिदं पुस्तकम् ।
यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश नारायण नमोऽस्तु ते ॥
कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥

Author—Āśvalāyana.

Remarks—This Ms. is complete and contains 12 chapters. After the close of the work are found 13 leaves, one leaf describing the method of preparing medicated oils and the remaining 12 leaves dealing with the Agnyanvādhāna etc. Agnyanvādhāna begins thus:—

"गं गणपतये नमः । अविघ्नमस्तु । अमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवति स पुरस्तादेव ... ... ।"

॥ श्रौतसूत्रं पद्धतिसहितम् ॥

48. ŚRAUTASŪTRAM
with
the commentary Paddhati.

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—59
11—12 lines on a page and 64 letters in a line.
Script—Malayāḷam. No. of Granthas—2700.
Incomplete.

Subject—Aphorisms of Kātyāyana with commentary, on rituals belonging to the Śukḷayajurveda.

Beginning:

हरिः ॐ ।

ब्रह्माणमथ विष्णुं च शिवं गणपतिं तथा।
अम्बिकां शारदां चापि वन्दे विघ्नोपशान्तये ।
कात्यायनं नमस्कृत्य गुरून् श्रीश्रीपतींस्तथा।
पितरौ भाष्यकर्तृंश्च पितृभूत्यादिसंज्ञकान् ॥
कात्यायनप्रणितेऽस्मिन् सूत्रे यज्ञप्रकाशके ।
प्रजापतेस्तनूजोऽहं कुर्वे व्याख्यामिमां स्फुटम् ॥
जयन्ति ते गुरोर्वन्द्याः श्रीपतेः पादपांसवः ।
येषां प्रसादादज्ञोऽपि चापलं कर्तुमुद्यतः ॥
आलोच्य सूत्रभाष्यादि क्रियते संग्रहो यतः ।
स्वकल्पितत्वशङ्कात्र न कार्या विबुधैरतः ॥

इह पुण्यो वै पुण्येन कर्मणा भवति (14—60—20—14)
तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनेति ।

(14—70—20—25)अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिभिर्वाक्यैः कर्मणां स्वर्गापवर्गादिश्रेयःसाधनत्वं प्रतीयते। तानि चाग्निहोत्रादिकर्माणि वेदवाक्यैकवेद्यानि। वेदवाक्यानि चानेकशाखावस्थिततया स्वतश्च प्रतिवाक्यं नानाविधपरस्परविरुद्धार्थस्फुरणेन दुर्बोधार्थानि बहुभिरर्थवादवाक्यैर्मिश्रितानि। तथाहि— अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्र किं स्वर्गो होमाय, उत होमः स्वर्गाय। तथा अग्निहोत्रशब्दो गुणविधानार्थो नामधेयं वेति। यथा सर्वे संवत्सरं दीक्षाभिरेतीत्यादौ [12—30—30—11] कश्चित् संवत्सरशब्दस्य मुख्यार्थत्वं सहस्रसंवत्सरादौ, [12—30—30—10] तस्यैव गौणत्वम्। अर्थवादमिश्रपाठाद् विध्यर्थवादसन्देहोऽपि भवति किमयं विधिरुतार्थवाद इति। यद्यपि जैमिनिशबरस्वामिकुमारिलप्रभृतिभिर्मीमांसायां तानि वाक्यानि सन्देहनिरासपूर्वकं यथार्थं व्याख्यातानि सन्ति, अधीतशास्त्राणां च तदर्थावगमोऽपि सुकर एव। तथापि तेषां नानाशाखाव्यवस्थितत्वेनेदानीन्तनैः सर्वैः पुरुषैरध्येतुं ज्ञातुं वाऽशक्यत्वात् तदधीनं कर्मणां ज्ञानं दुश्शक्यमिदानीन्तनानामिति मत्वा परमकारुणिको भगवान् कात्यायनाचार्यो नानाशाखागतविधिवाक्यसंग्रहरूपं कल्पसूत्रं प्रणीतवान्। तत्र पूर्वमधिकारादिकस्य सर्वकर्मसाधारणस्य निरूपणानन्तरं विशेषस्य दर्शपूर्णमासादेर्निरूपणं युक्तम्। अन्यथा प्रतिविशेषणमधिकारादिनिरूपणे ग्रन्थगौरवं स्यात्। तन्मा भूदिति कृत्वा प्रथमाध्याये यावत् किञ्चित् सर्वकर्मसाधारणं तदुपदिशति तत्रतदादिसूत्रम्——अथातोऽधिकारः॥

End:

सत्रेषु य ऋत्विजस्ते यजमाना इति यजमानानामृत्विक्पदार्थकर्तृत्वविधानाद् ब्राह्मणानामेव सत्राणि भवन्ति न क्षत्रियवै-

श्यानाम् । ब्राह्मणानामप्येककल्पानाम् वैश्यराजन्ययोर्गृहपतित्वेऽपि नाधिकारः । ब्रह्मसामादिकल्पभेदेन ब्राह्मणैः सह विरोधात् । सहस्रसंवत्सरं सत्रं मनुष्याणामपि भवति । संवत्सरशब्देन लक्षणया वृत्याहः प्रतीयमानत्वात् । अतः सहस्रसंवत्सरे सहस्रं सौत्यान्यहानि भवन्ति ।

Colophon:

इति प्रथमस्य षष्ठी (क ? ख)ण्डिका ।

Author—The commentator was a disciple of Śrīpati and the son of Prajāpati.

Remarks—The work with the commentary has been printed at Benares. The commentator refers to Karkācārya, one of the Bhāsyakāras at the end of the second Khaṇḍikā.

In the colophons of the works on pages 3186, 3187, 3215, 3245, 3246, 3262 & 3263 (Vol. III D. C. S. M. Madras) is seen the following.

"... ...प्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ" ... ...

So it is presumed that the commentator is Yājñikadeva and that this commentary is called Paddhati. C. C. refers to a certain Yājñikadeva as the author of Kātyāyana's Śrautasūtrapaddhati called also Yajñikavallabhā, Uttarakriyāpaddhati, Darśapūrnamāsapaddhati, etc. (*Vide* Page 475).

॥ स्मृतिः ॥

॥ अगस्त्यप्रतिमादानविधिः ॥

49. AGASTYAPRATIMĀDĀNAVIDHI.

Substance—Palm leaf. Size—5"×1¾". Leaves—5. About 7 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—30.

Subject—Dharmaśāstra, describing the means of curing diseases, by the gift of Agastyapratimā.

Beginning:

अगस्त्यदानं वक्ष्यामि कृत्रिमादिभयापहम् ।
विषापहरणं सद्यो गरलादिभयापहम् ॥
तक्षकालकमुख्यादिशङ्खपद्मादिवासुकिम् ।
मण्डूकं मण्डलीदुष्टक्षुद्रसर्पभयादिकम् ॥
तत् सर्वं नश्यति क्षिप्रमाखुवृश्चिकसम्भवम् ।

... ...

End:

अस्मिन् देहे स्थितं रोगं विषकृत्रिमसम्भवम् ।
तत् सर्वं नश्यति क्षिप्रमगस्त्यमुनिदानतः ॥
आयुर्बलं च कान्तिश्च अग्निपाटवमेव च ।
देहि त्राहि मुनिश्रेष्ठ आरोग्यं कुरु(ते ? मे)सदा ॥
सुवर्णत्रयदक्षिणां दद्यात् भक्तिपरायणः ।
नीरोगी जायते रोगी कृत्रिमादिभयाच्च्युतः ॥
अगस्त्यस्य प्रदानेन पुत्रपौत्रान्वितः सुखी ।

Colophon:

इति कृत्रिमरोगहरागस्त्यदानविधिः । कृत्रिमादिभयापहम् ।

Author:

Remarks—The revised Palace Catalogue names the work Agastyapratimādānavidhi while the colophon mentions Agastyadānavidhi.



॥ आशौचनिर्णयः (सव्याख्यः) ॥

50. ĀŚAUCANIRṆAYA

with commentary.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—39. 6 lines per page and 20 letters per line. Script—Malayālam. No. of Granthas 300. Incomplete.

Subject—Smṛti delimiting the period of pollution.

Beginning:

प्राणस्त्री सवित्री दशदिनसहितैस्तैर्विशुद्धा प्रदिष्टा यातेऽपेऽपि उक्तकाले आनियतसमये गृह्यकर्माणि सा अयोग्या । निर्जीवापत्यसूश्चेद् दिनदशकमतीत्य अखिलं कर्म कुर्यात् ।

End:

दिक्षु नमोन्तैः विश्वेभ्यो देवेभ्यः साध्येभ्यः मरुद्भ्यः इत्यणुभिः पिण्डत्रयं संस्थाप्यम् । विश्वेभ्यो देवेभ्यो नमः साध्येभ्यो नमः मरुद्भ्यो नमः ॥ १५२ ॥

Colophon—*Nil*.

Author: ...

Remarks—The name of the work is given in accordance with the revised Palace Catalogue. Some leaves in the beginning, middle and end are missing.

॥ आशौचाष्टकवृत्तिः ॥

51. ĀŚAUCĀṢṬAKAVṚTTI.

Substance—Palm leaf. Size—$6\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—21. 8—9 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—250. Complete.

Subject—Practical application of rules pertaining to Āśauca.

Beginning:

गणपतये नमः। अविघ्नमस्तु।

शम्भुर्दिशतु नः शूली मङ्गलं लोकमङ्गलः।
पार्वतीवल्लभः स्थाणुः पिनाकी वृषभध्वजः॥
विघ्नं विघ्नविनाशाय प्रणम्याथ सरस्वतीम्।
आशौचाष्टककर्तारं नत्वा वररुचिं तथा॥
आशौचाष्टकसम्प्रोक्तप्रयोगं वच्मि साम्प्रतम्।
अज्ञानतमसान्धानां जनानामुपकारकम्॥

तत्राशौचं तावद् द्विप्रकारं—जन्मनिमित्तं मरणनिमित्तं च। तत्र तावन्मरणनिमित्तमुच्यते। आद्येषु त्रिषु मासेषु गर्भिण्या गर्भनाशे त्रिदिनमाशौचं स्यात्... ... ...

End:

अथ जन्माशौचमुच्यते। तत्र सपिण्डानां दशाहम्। सोदकानां त्रिदिनम्। इदमाशौचं सन्निधावेव। यद्यतीते श्रुतं भवति, तद्युभयोरपि स्नानमेव। तत्रातिकालजं न स्यात्। पूर्वाशौचे दशदिनं यदि पतेत्, तर्हि......... ... ... प्रेताशौचवत् त्रिरात्रपरिपूर्तिः कर्तव्या। मातापित्रोस्तु दशदिनेनैव शुद्धिर्भवति। तत्र कुमारे जाते गोभूहिरण्यादीनां प्रतिग्रहो ब्राह्मणैः कर्तव्यः। तत्रात्मपुत्रपितृभ्रातृव्याणां स्त्रीप्रसूतौ दशाहेनैव शुद्धिर्भवति। तदप्युक्तम्—

"आत्मपुत्रपितृभ्रातृपितृव्याः स्त्रीप्रसूतके।
दशाहेनैव शुद्धिः स्यादन्यत्र (तु)त्र्यहं भवेत्॥" इति॥

Colophon:

इति जन्माशौचप्रयोगः। इत्यष्टमश्लोकः। हरिहरहिरण्यगर्भेभ्यो नमः नमः शिवाय। आशौचाष्टकवृत्तिः समाप्ता। शिवमस्तु।

Author:

Remarks—The Ms. is nearly 300 years old and decayed. It is different from the Āśaucāṣṭakavyākhyā, published as No. 37 of the T. S. S.

॥ कर्मविपाकप्रायश्चित्तसुधानिधिः ॥

52. KARMAVIPĀKAPRĀYAŚCITTA-SUDHĀNIDHI.

Substance—Palm leaf. Size—5″ × 1½″. Leaves—155. 6 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Expiatory rites for sinful acts done intentionally or otherwise.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन विम्बितां चित्तभित्तिषु ॥
अस्ति श्रीसंगमक्ष्मापः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रिलोकी प्रतिविम्ब्यते ॥
अस्य मन्त्रिशिरोरत्नमस्ति मायणसायणः ।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिवीम् ॥
तेन मायणपुत्रेण सायणेन मनीषिणा ।
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावता ॥
कृतानां विविधानां च ज्ञानतोऽज्ञानतोऽपि वा ।
इह रोगनिदानानां कर्मणां निष्कृतिं ब्रुवे ॥
अयुक्तमिति मे भाति नन्वेतदुपपादनम् ।
अनारब्धफलेषु स्यात् समारब्धफलेषु वा ॥

End:

दारिद्र्याख्यान्महारोगान्मुक्तो मर्त्योऽभिजायते ।

तस्मादवश्यं कर्तव्यं दानहोमादिकं नरैः ।
दारिद्र्यरोगाभिभूतैस्तस्माद्रोगात् प्रमुच्यते ॥

Colophon:

इति कर्मविपाकप्रायश्चित्तसुधानिधौ दारिद्र्यरोगहरप्रकरणम् ।

Author—Māyanasāyaṇa, son of Māyana and minister of Saṅgama. This is the famous Śayanācārya of Vijayanagar.

Remarks—The work is composed in metrical form. It is incomplete and contains *prakaraṇas* 1—43 only. 17 leaves are left blank at the end.



॥ कर्मविपाकमहार्णवः ॥

53. KARMAVIPĀKAMAHĀRṆAVA.

Substance—Palm leaf. Size—19" × 2". Leaves—176. 10 lines per page and 48 letters per line. Script—Tamil Grantha (Leaves 1—98). Malayāḷam (Leaves 99—176). No. of Granthas—5000.

Subject—Expiatory rites for diseases resulting from sinful deeds.

Beginning:

नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ॥ १ ॥
प्रवालाद्रिप्रस्थद्युतिनिचयपर्यायवपुषे
नमो विघ्नश्रेणीविघटनविनोदाय महते ।

जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रणतफलसिद्धिप्रतिभुवे ॥ २ ॥

यदिन्दिरानाथपुरन्दराद्यैराराधितं भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणारविन्दं वन्दामहे मत्कुलदेवतायाः ॥ ३ ॥

प्रकृष्टचलकुण्डलस्तबकमृष्टगण्डस्थलं
महाहिमाणिमेखलं मरतकाङ्कुरश्यामळम् ।
करोतु करुणां सदा कलितबर्हिबर्हाङ्कुरं
महः किमपि मोहनं कपटशैशवं कैशवम् ॥ ४ ॥

शम्भौ कृतागसि कषायकषं ब्रुवाणा
कुण्ठीकृताधरसनाथनियन्त्रणेन ।
मानेन मानमभिगच्छति या ददातु
सा पार्वती हरविभक्ततनुः शिवं वः ॥ ५ ॥

आसीदसीमगुणलब्धगुणाम्बुराशा-
वुद्यत्प्रभूतशुभकीर्तिनयप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसंनिविष्टः
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥ ६ ॥

तस्यात्मजो हरद्पाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्तिः ।
दानेन यः सुकृतिनां क्षितिपः स दैन्यं
सैन्यं च वैन्यसदृशः प्रतिभूपतीनां ॥ ७ ॥

सुतोऽस्य जातः सुकृतोन्नतस्य न तस्य कश्चित् सदृशो बभूव ।
यमच्छलस्तुत्यमवेक्ष्य तातो नाम्ना हरिश्चन्द्र इति व्यधत्त ॥ ८ ॥

तस्यात्मजोऽभूदतुलप्रतापः
साधारणो भूमिपतिर्वदान्यः ।

अभूतपूर्वामवनीश्वराणा-
मजीजनद् यो जगति स्वकीर्तिम् ॥ ९ ॥
बन्धच्छिदाभिदुरकीर्तिमिहान्वितार्थो
कृत्वा परत्र च तथैव विधातुमिच्छुः।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्तिमचीकरद् यः ॥ १० ॥
अस्यात्मजः श्रीमदनेन राजा
नाम्ना च रूपेण च सङ्गतार्थः ।
रोषारुणे चक्षुषि यद्विपक्षः
सर्तव्यरूपत्वमवा(स?प)कामः ॥ ११ ॥
सर्वायः कृत्वाना ? रामान् धर्मायतनानि सेतुबन्धांश्च ।
कृत्वा स्वकीर्तिमात्रं.........दीदृशमूर्तिभेदेन ॥ १२ ॥
परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रदानम् ।
मदनेन महीभृताथ तेन
प्रथिता नूतनभोजराजकीर्तिः ॥ १३ ॥
पुत्रेषु सत्स्वपि कलत्रयुगेऽथ तस्य
पुत्रौ जगत्त्रयविसृत्वरकीर्तिपूरौ ।
तार्क्ष्यौ(?)प्रियावतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणौ विनीतौ ॥ १४ ।
उदारशीलौ सुमनोविलास-
मनोज्ञवृन्दावनकेलिलोलौ ।
यशोदया वर्धितमङ्गलाङ्गौ
यौ रामकृष्णाविव सम्प्रतीतौ ॥ १५ ॥

यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमितरः कृतसद्गुणोऽपि ।
दा(ना?ता)निदानमखिलार्थिजनार्थसिद्धेः
कीर्तिर्दिगन्तविततता च यतस्तदीया ॥ १६ ॥

अप्रतिमल्लः पृथ्व्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मान्धा(ता?तृ)गुणो मान्धाता गीयते जगति ॥ १७ ॥

सोऽयं सुकृतविधाता रिपुकुलजेता तनोति मान्धाता ।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महार्णवं नाम ॥ १८ ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरा(चा?)र्यचरितः श्रीपेद्दिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्तमते नये च सपदे वाक्ये कृती वर्धते ॥ १९ ॥

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं व्याघारण्यप्रवरमुनिशिष्यस्य भणितिः ॥ २० ॥

श्रुतिस्मृतिपुराणानि समालोक्य यथामति ।
निबध्यते समासेन निबन्धोऽयं महार्णवः ॥ २१ ॥

दुष्कर्मपाकजनितामयकर्शितानां
सत्कर्म शर्मकरमित्युदितं मुनीन्द्रैः ।
तत्सद्गजातमिति रोक्तिविधानपेक्षं
वक्ष्यामि रोगनिखिलार्तिनिवर्हणाय ॥ २२ ॥

तत्र तावद् वक्ष्यमाणमकलकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेकयुक्तैर्द्वाद(श)कयुक्तैर्द्वादशवार्षिकादिप्रायश्चित्तव्याधिप्रकृतिदानादि कर्तव्यम् । अत्र केचिद् व्यवतिष्ठन्ते । तथाहि—

End :

अतो मेषगृहीतस्य तद्दोषशान्तये हिरण्यं श्वेतवस्त्रं चेत्यादिना प्रोक्तो बलिर्देयः । नालकरक्षन्तं (?) पक्वान्नमित्यादिना स्कन्दग्रहहरोक्तो बलिर्देयः । मेषग्रहोद्देशेन बलिदाने मन्त्रमाह—

प्रगृह्णीष्व बलिं चेमं मेषग्रह महाग्रह ।
आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महाबल ॥

Colophon :

End of Taranga:

इति पण्डितपारिजातकठोरमल्लेत्यादिविरुदविराजमानश्रीमदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाके... ... ...तरङ्गः ।

End of Part I ·


इति कर्मविपाकः समाप्तः । हरिः ॐ । शुभमस्तु ।

രാമകൃഷ്ണൻ സ്വഹസ്തലിഖിതം. ശ്രീരാമജയം.

इति कर्मविपाकमहार्णवः समाप्तः । हरिः ॐ ।

Author—Bhattaviśvesvara, son of Śrī Peddi Bhatta. He admits that he passed off his own works under the appellations of his patrons, Māndhātā and Madanapāla, the famous kings of the Lāta family.

The geneology of that family is given below :—



Madanapāla the plausible author of the Madanavinoda (Madanapālavinodanikhaṇḍu) is the father of Māndhātā. He was also the patron of Bhaṭṭa Viśveśvara, the author of Madanapārijāta. The date of Viśveśvara may be fixed as the latter half of the 14th Century. C. C. gives Ṭaka in lieu of Lāṭa (Vide Page 425). The following are the well-known works of Viśveśvara:—

Madanapārijāta.
Mahādānapaddhati.
Mahārṇavakarmavipāka.
Smṛti Kaumudi.
Subodhinī (Commentary on the Vyavahārādhyāya of Vijñāneśvara).

Remarks—The author quotes profusely from the Karmavipāka of Śātātapa and is much indebted to that work. He quotes authorities from

Karmavipākasaṅgraha, Bodhāyanasūtra, Āśvalāyanasūtra, Ṛgvidhāna, Skāndapurāṇa, Karmavipākasamuccaya, Bhaviṣyapurāṇa Vṛddhagautamasmṛti and other works,

---

॥ कर्मविपाकमहार्णवः ॥

54. KARMAVIPĀKAMAHĀRṆAVA.

Substance—Palm leaf. Size—14½" × 1¾". Leaves—163. 6—8 lines per page and 44 letters per line. Script—Old Malayālam. No. of Granthas—4000. Incomplete.

Subject—Same as No. 53.

Beginning—Same as No. 53 but the verses 11 and 12 are omitted.

End:

क्षीरदधिमधुमर्पिःपूर्णानि दद्यादाहिताग्नये ब्राह्मणायालंकृताय वासोयुगेन प्रच्छादयेदिति अस्यार्थः । वैशाख्यां पौर्णमास्यामिति । एतच्चो(क्त)कालान्तराणामुपलक्षणार्थम् । देशक०

Colophon.

इति श्रीपण्डितपारिजातकठोरमल्लेत्यादिबिरुदविराजमानश्री-

मदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाके... ...तरङ्गः ।

Author—Same as No. 53.

Remarks—In No. 53 the 6th *Taraṅga* deals with Rudravidhi, and the 7th with Puruṣasūktavidhi. In this Ms. Puruṣasūktavidhi occurs in the 6th *Taraṅga* and Rudravidhi at the close. The order of the prakaranas also is different. The work comes to a close with the Netrakuṣṭhaharaprakaraṇa. The Ms. is decayed and is about 200 years old.

॥ कालनिर्णयः ॥

55. KĀLANIRṆAYA.

Substance—Palm leaf. Size—$13\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—130. 10 lines on a page and 46 letters in a line. Script—Malayāḷam. No. of Granthas—4000. Incomplete.

Subject—Determination of the auspicious time for the performance of Vedic rites.

Beginning:

हरिः । श्रीगणपतये नमः अविघ्नमस्तु ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।

यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् मज्जनतीर्थसङ्गिनि पुनः सद्वृत्ततीर्थत्रयम्।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकृष्णमव्याहतम् ॥
सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वसहः।
अष्टव्यक्तिकलाधरो नवनिधिः पुण्यदशप्रत्यय-
स्साचीन्द्रान्वयधुरन्धरो विजयतां श्रीबुक्कणक्ष्मापतिः ॥
व्याख्याय माधवाचार्यो धर्मान् पाराशरानथ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥
व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम्।
सर्वेषां तत् प्रथमसुखदं भारतीतीर्थमाहु-
स्तद्ध्यानान् मे विपुलमनसो निर्णये शक्तिरस्ति ॥
अर्थो न क्रम्यते श्लोकैरखिलो निर्णिनीषितः।
तानेवानुतिष्ठासुर्निस्सन्देहः प्रवर्तताम् ॥
ततो मीमांसु(?)चित्तस्य समाधानाय तत् पुनः।
विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात् ॥
पञ्च प्रकरणान्यत्र तेषूपोद्घातवत्सरौ।
प्रतिपद्दिष्टतिथयो नक्षत्रादिरिति क्रमः ॥
उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यताम्।
ईश्वरो नित्यकालात्मा चिन्तनीयः सुकर्मसु ॥

End:

पुत्री तु नोपवसेत्। तदाह नारदः—

संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही ॥ इति ॥
ग्रस्तास्तमये तु पुत्रिण्यप्युपवास एवमहोरात्रं न भोक्तव्यमिति भोजनप्रतिषेधात् ।

Colophon:

इति ग्रहणनिर्णयः ।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
शुभमस्तु ।

Author—Mādhavācārya.

Remarks—This has been published by the Royal Asiatic Society, Bengal.

—:o.—

॥ कालादर्शः ॥

56. KĀLĀDARŚA.

Substance—Palm leaf. Size—14¾" × 2". Leaves—133. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3700. Complete.

Subject—Same as No. 55.

Beginning:

श्रीमहागणपतये नमः ।
ब्रह्मादयो यदङ्गगा युगादिकालादिभेदाश्च यदीयभेदाः ।
कालाय कंसान्तकमूर्तयेऽहं नित्याय तस्मै विभवे नतोऽस्मि ॥

वाणीगणेशामरेन्द्रमौलिमाणिक्यनीराजितपादपद्मौ ।
अविघ्नमाविष्कृतभक्तलोकमनोरथावन्वहमानमामि ॥
विश्वेश्वराच्चार्यपदारविन्दप्रणामवित्तार्जितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी कालं विनिर्णेष्यति मन्दबुद्ध्यै ॥
ननु स कालः क्वोपयुज्यते । यो निर्णीयत इति । अत्राह—
कालो विधिवशाद् दर्शपूर्णमासादिकर्मसु ।
अङ्गत्वेनेष्यते तस्मादसौ निर्णीयते मया ॥

End :

पशुबन्धश्चाग्निष्टोमः कर्तव्यावुत्तरायणे ।
एतत्त्रयविकाराश्च द्वादशाहादयस्तथा ॥
अग्नीषोमीयमाम्नाय्यविकारान् सोमतः परम् ।
सोमयागविकारांश्च कुर्यादिष्टिभ्य उत्तरम् ॥
आरम्भो ह्यग्निहोत्रस्य सौम्यायन उदीरितः ।
दृष्ट्वा पुरातनपुराणवचांस्यशेष-
मन्वादिकस्मृतिवचांसि विविच्य तत्त्वम् ।
सांवत्सरागमवचांसि च कालतत्त्वं
निर्णीयते स्म कृतिना कविवल्लभेन ॥
यज्ञकालनिर्णयप्रकरणश्लोकाः ॥ ६२१ ॥

Colophon :

इत्यादि(त्य)भट्टोपाध्यायस्य कविवल्लभापरनाम्नो ग(र्भ? र्ग)कुलतिलकस्य कृतिषु कालादर्शो नाम कालनिर्णयः समाप्तः ।
भोः कोविदाः कृतधियः कविवल्लभस्य
विज्ञापनं शृणुत वो रचितः प्रणामः ।
कालस्य निर्णयकरीं कृतिमस्मदीया·

मेनां निरस्तमदमत्सरमाद्रियध्वम् ॥
विज्ञानयोगिनो विश्वरूपाचार्यस्य निश्चयम् ।
गृह्यस्य धर्मयोर्भाष्यं तथा स्मृतिमहार्णवम् ॥
विश्वादर्शं निदर्श च धवलां स्मृतिचन्द्रिकाम् ।
अथापरार्कं कल्पतरुं शिवस्वामिमतं तथा ॥
बालरूपं स्मृतिरत्नं मञ्जूषां मानवं मतम् ।
स्मृतिसंग्रहणं धर्मप्रदीपं कारणागमम् ॥
ज्योतिषाणि च तन्त्राणि वास्तुतन्त्रं समीक्ष्य च ।
न्यायैः सम्यग् विचार्यायं कालादर्शो मया कृतः ॥
अत्रत्यवचनानां ये मूलं पृच्छन्ति पण्डिताः ।
तैस्तु प्रेक्ष्या इमे ग्रन्था इति दत्तं मयोत्तरम् ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । श्रीगुरुभ्यो नमः । शुभमस्तु ॥

Author—Āditya-Bhaṭṭopādhyāya, surnamed Kavivallabha, belonged to Gargagotra. He is also known as Āditya Sūri. He was a disciple of Viśveśvarācārya.

Remarks—The work is composed in the style of Dharmapradīpam, and Smṛtiratnamañjūṣā.

॥ दत्तनिरूपणम् ॥

57 DATTANIRŪPANAM

Subs,ance—Palm leaf Size—18¾"×2" Leaves—16
9 lines per page and 48 letters per line
Script—Malayalam No of Granthas—550
Subjec —Rights and privileges of persons adopted

Beginning

इदं त्वपरं चिन्त्यते—

यः प्रदत्तोऽपि पुत्रार्थं जातकर्मादिवर्जितः ।
नामा गच्छति पुत्रत्व कथं वा रिक्थभाग् भवेत् ॥
त(द्व)द्दत्ता च या कन्या पतित्वं सप्तमे पदे ।
तथैव दत्तपुत्रस्य पुत्रत्व जातकादिभिः ॥

इति स्मृतिसारकात्यायनवचनाभ्या जातकर्मादिसकलक्रियाणां जननेन कृताना प्रतिग्रहीत्वापि पुनरनुष्ठयतया विहितानामकरणेन दत्तस्य पुत्रत्वमेव नास्तीत्युक्तत्वात् भ्रातृपुत्रपरिग्रहेऽपि जात कर्मादिसंस्काराः पुनः कर्तव्या न वा ।

End

नित्यत्वादिभेदः पुत्रिकापुत्रक्षेत्रजादीनामप्यस्ति । तत्र च सत्याषाढसूत्र प्रमाणम् । नित्यद्व्यामुष्यायणाना द्वयोरनित्याना च द्व्यामुष्यायणवादिति सूत्रद्वयनित्यानित्यद्व्यामुष्यायणदत्तक्षेत्रजपुत्रिकापुत्रादिपरमेव व्याख्यातृभिर्व्याख्यातमित्यन्यत्र विस्तरः । व्यवहारमयूखे च दत्तद्वैविध्यमुक्त, तदग्रे प्रपञ्चयिष्यते ।

Colophon

इति दत्तमीमांसोक्तद्वैविध्यनिरूपणम् ।

श्रीगुरुभ्यो नमः । शुभमस्तु ।

Author:

Remarks—It is seen from the first as well as the last sentence of the Ms. that the work is a portion of the Dattamimāmsā which has been published at Calcutta. It refers to Ujjvala in the following lines :

" तथाहि—सगोत्रस्थानीयान्न परेभ्यः समाचक्षीतेत्यापस्तम्बधर्मवचनमिदं चोज्ज्वलायामेवं व्याख्यातम् । "

Ujjvala may be identical with that of Haradatta.

॥ दानमयूखः ॥

58. DĀNAMAYŪKHA.

Substance—Palm leaf. Size—24" × 2". Leaves—141. 7 lines per page and 72 letters per line. Script—Malayālam. No. of Granthas—1000. Complete.

Subject—Smṛti (description of the rites of Dāna like Dhānya-Parvata—the mountain of grains).

Beginning:

श्रीगणपतये नमः ।

यः कामठेन कायेन दध्रे मन्थरमारभे ।
तं द...थीमाराध्य पर्वतापणिपद्धतिम् (?) ॥
साम्प्रतं (वः ?च) पुराणोक्तपर्वतदानप्रयोगः प्र (स्तू) यते । पुलस्त्यः--
प्रथमो धान्यशैलस्तु द्वितीयो लवणाचलः ।
गुळाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः ।
सप्तमो घृतशैलः स्याद्र ... शैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद् दशमः शर्कराचलः ॥ इति ।

तत्र धान्यपर्वतस्य सर्वपर्वतप्रकृतित्वात् प्रयोगः प्रथमतः प्रक्रम्यते ।

End:

ब्रह्माण्डपुराणोक्तप्रकारेण रुद्रैकादशतिलदानं करिष्ये । तत्रैकादशरुद्रपूजां ब्राह्मणपूजां च करिष्ये इति संकल्प्य प्रधानपात्रादारम्य तिलोपरिस्थितसुवर्णपद्मेषु एकादश रुद्रानावाह्य पूजयेत् । पूजाप्रकारः— मृगव्याधाय नमः शर्वाय नमः नैर्ऋताय नमः अजैकपदे नमः अहिर्बुध्नियाय नमः ।

Colophon:

इति मी।मां(?)शंकरभट्टात्मजनीलकण्ठभट्टकृते दानमयूखे षोडशमहादानादीनि समाप्तानि । हरिः ॐ । शुभमस्तु । श्रीरङ्गनायक्यै नमः । श्रीमते रामानुजा(यै ? य) नमः । श्रीमते वेदान्तगुरवे नमः । सरस्वत्यै नमः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

൧൦൫൭-ാംമാണ്ടു് ഇടവമാസം ൨൯-ാംനു എഴുതിത്തീൎന്നു. രാമാശാസ്ത്രിയരാൽ സ്വഹസ്തലിഖിതം. ദാനമയൂഖം സമാപ്തം. ശ്രീവാസുദേവായ നമഃ. ശ്രീലളിതാംബികായൈ നമഃ. ശ്രീ ഗുരുഭ്യോ നമഃ. വേദവ്യാസായ നമഃ.

Author—Nīlakaṇṭha Bhaṭṭa, son of Śaṅkara Bhaṭṭa as is evident from the following verses on Fol. 52,

" यो लीलया सन्तनुतेऽत्र विश्वं
(नक्या ? तत् पा) लयत्यात्मनि विश्वरूपे ।
लयं न(य)त्याशु च पूर्णरूपः
शिवं त(तो ? नो)त्याशु रविर्ममासौ ॥

श्रुतिस्मृतीवाक्यपुराणजातं
तत्तन्निबन्धानपि सन्निबद्धान् ।
श्रीशंकरस्यात्मज एव दाने
श्रीनीलकण्ठो विवृणोति कृत्यम् ॥ "

Remarks—The work has been published at Benares.

॥ धर्मप्रवृत्तिः ॥

59. DHARMAPRAVṚTTI.

Substance—Palm leaf. Size—$17\frac{1}{2}'' \times 2''$. Leaves—133. 9—10 lines per page and 6 letters per line.

Script—Grantha. No. of Granthas—4500. Complete.

Subject—Description of the purificatory rites such as Śauca, Tithī, Tīrthasavana etc.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यस्मिन् रामे स्वप्रकाशे जगदेतच्चराचरम् ।
सृष्टिस्थित्यन्तमाप्नोति तं भजे गुरुरूपिणम् ॥
नारायणं नमस्कृत्य वाग्देवीमपि कामदाम् ।
गणनाथं गुरुंश्चापि धर्मसंरक्षणाय वै ॥
धर्मप्रवृत्तिः क्रियते कलौ नारायणेन तु
विदुषां कर्मनिष्ठानां संमतिर्धर्मवर्धनी ॥
आलोक्य धर्मशास्त्राणि मन्वादिरचितानि च ।
आश्वलायनसूत्रं च वृत्तिं नारायणीं तथा ॥
सारमेव समुद्धृत्य स्मृतीनां वचनान्यथ ।
सिद्धान्तानि ? समूलानि समादाय तथैव च ॥
वचनानि सतां चैव वचनानि मनीषिणाम् ।
ग्रन्थेऽस्मिन् लिख्यते(?)तानि धर्मप्रवृत्तिसंज्ञिके ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वासां निर्णयानप्यसंशयान् ॥
यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान् निबोधत ।
धर्मसंरक्षणार्थाय तस्मिन् देशे वसेद् द्विजः ॥

उषःकाले समुत्थाय चिन्तयेदात्मनो हितम् ।
स्मृत्वा नारायणं देवं स्तोत्राण्यपि च संजपेत् ॥
अथ मौनम् ।

End :

तैलाभ्यङ्गं न दुष्येत संक्रान्तिग्रहणादिषु ।
तैलाभ्यङ्गमिति प्रोक्तं मङ्गलस्नानमुच्यते ॥
उत्सवादौ प्रकर्तव्यं सर्वदा शुभकाङ्क्षिभिः ।

Colophon:

इति श्रीमन्नारायणविरचितायां धर्मप्रवृत्तौ स्थालीपाकादि-मङ्गलान्तप्रकरणं समाप्तम् ॥

हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । श्रीपद्मनाभो रक्षतु ।

यस्मिन् रामे स्वप्रकाशे जगदेतच्चराचरम् ।
सृष्टिस्थित्यन्तमाप्नोति तं भजे गुरुरूपिणम् ॥
यादृशी पुस्तकं दृष्ट्वा तादृशी लिखितं मया ।
अबद्धं वा सुबद्धं वा क्षन्तुमर्हन्ति पण्डिताः ॥
स्मृत्यन्तरे—

अन्यगोत्राय यो दत्तः स एव जनकस्य च ।
गोत्रे न विवहेत् कन्यां तत्पुत्रादेर्न दोषभाक् ॥
भुक्त्वोच्छिष्टं न्यसेद् भूमौ यजमानेति मन्त्रतः ।

... ...

... ...

शुभमस्तु । श्रीगुरुभ्यो नमः । श्रीभूनीलासमेतअनन्तपद्मना-भस्वामिने नमः ।

நாராயணர் அய்யர் இடம் இருந்து பெயர்த்தெழுதினது.

Author—Nārāyana.

Remarks—The Ms. contains 14 Prakaranas. The subject dealt with on each page is given on the margin. This has been published at Belgaum.

॥ धर्मसूत्रम् (मिताक्षरासहितम्) ॥

60. DHARMASŪTRA with Mitāksara.

Substance—Palm leaf. Size—19″ × 2″. Leaves—125. 10 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—1350.

Subject—Rights and duties relating to Varnas and Āśramas.

Beginning:

हरिः ओम् । शुभमस्तु ।
नमो रुद्राय यद्धर्मशास्त्रं गौतमनिर्मितम् ।
क्रियते हरदत्तेन तस्य वृत्तिर्मिताक्षरा ॥
ओं वेदो धर्ममूलम् । कर्मजन्याभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः । तस्य मूलं प्रमाणम् । वेदो मन्त्रब्राह्मणात्मकः । जातावेकवचनम् । चत्वारो वेदा ऋग्यजुःसामाथर्वात्मकाः । वेदा एव सर्वधर्मे प्रमाणम् ।

End:

तेषां मध्ये यो धर्मं तत्त्वतो वेत्ति, स ज्ञानाभिनिवेशाभ्याम् । अभिनिवेशस्तात्पर्येणानुज्ञानं ज्ञानेनाभिनिवेशेन च केवलानुष्ठायिभ्यो विशेषेण स्वर्गं लोकमवाप्नोतीति धर्मो धर्मः आदित आरभ्यैवान्तो धर्म उक्तः । द्विरुक्तिः समाप्तिद्योतनार्था ।

Colophon:

इति हरदत्तमिश्रीयायां गौतमीयवृत्तौ मिताक्षरायामष्टाविंशोऽध्यायः । मिताक्षरा समाप्ता । हरिः ओम् । शुभमस्तु ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । श्रीरामजयम् ॥

Author—Text—Gautama. Commentary—Haradattamiśra. The name of the commentator is seen as both Haradatta and Haradattamiśra. Haradatta was the son of Rudrakumāra and brother of Agnikumāra.

Remarks—The leaves begin from Fol. 15. The work has been published in the Ānandāśrama Series, Poona.

॥ धर्मसूत्रम् ॥

61. DHARMASŪTRAM.

Substance—Palm leaf. Size—19″×2″. Leaves—14. 10 lines per page and 56 letters per line. Script—Tamil Grantha. No. of Granthas—500 Complete.

Subject—Aphorisms on Dharmaśāstra, dealing with Law, Religion, Custom, Duty etc.

Beginning:

हरिः ॐ। शुभमस्तु।

वेदो धर्ममूलम्। तद्विदां च स्मृतिशीले। दृष्टो धर्मव्यतिक्रमः साहसं च महतां न तु दृष्टार्थे। अपरदौर्बल्यात्। तुल्यबलविरोधे नो उपनयनम्।

End:

धर्मिणां विशेषेण स्वर्गं लोकं धर्मविदाप्नोति ज्ञानाभिनिवेशाभ्यामिति धर्मो धर्मः। ऊर्ध्वं पितुर्देवरवत्यामुदकयोगक्षेमकृतां सप्त॥ २९॥

Colophon:

हरिः ॐ। शुभमस्तु। गौतमधर्मः समाप्तः। संपूर्णः। श्रीगुरुभ्यो नमः। श्रीरामजयम्।

Author—Gautama.

Remarks—This Ms. discloses the text, of No. 60. Prof. Macdonell is of opinion that the date of its composition is prior to the 5th century B.C. (Vide Page 250, History of Sanskrit Literature, 1913 Edition). The work has been published in the Ānandāśrama Series, Poona.

॥ निर्णयसिन्धुः ॥

62. NIRṆAYASINDHU.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—396. 10 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—10000. Complete.

Subject—Smṛti-determining the period of Āśauca and the date of performance of religious rites.

Beginning:

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः । सरस्वत्यै नमः ।
कारुण्यैकनिकेतं गीतं सीतालतायुक्तम् ।
विश्वामित्रान्ववायव्रततिसमालम्बशाखिनं वन्दे ॥ १ ॥
लक्ष्मीसहायं कल्पद्रु(मतलं रदित?तलरञ्जित)गोकुलम् ।
बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥ २ ॥
वेदार्थधर्मरक्षार्थं मायामानुषरूपिणम् ।
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥ ३ ॥
यत्पादसंस्मृतिः सर्वामङ्गलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान् नुमः ॥ ४ ॥
सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ।
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥ ५ ॥
बिन्दुमाधवपादाब्जलोलम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥
हेमाद्रिमाधवमते प्रविचार्य सम्य-

गालोच्य तत्त्वमथ तीर्थकृतां परेषाम् ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥ ७ ॥
सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥ ८ ॥

तत्र संक्षेपतः कालः षोढा । अब्दोऽयनमृतुर्मासः पक्षो दिवस इति । तत्र अब्दो माधवमते पञ्चधा । सावन· सौरश्चान्द्रो नाक्षत्रो बार्हस्पत्य इति ।

End:

ततोऽष्टशतं प्रणवं नारायणः परं ब्रह्मेति जप्त्वा प्रणवव्याहृत्या गायत्र्या तद्भस्माब्धि तीर्थे क्षिप्त्वा (स्नात्वा)नाच्छुचिः । नास्यान्यदौर्ध्वदेहिकम् ॥

Colophon:

इति श्रीभट्टरामेश्वरसूरिसुतश्रीभट्टनारायणसूरिसू(नोः?नु) (श्रीरामकृष्णभट्टात्मज) कमलाकरभट्टविरचिते निर्णयसिन्धौ तृतीयपरिच्छेदः समाप्तः । हरिः । शुभमस्तु । श्रीपद्मनाभार्पणमस्तु । श्रीगुरुभ्यो नमः ।

Author—Kamalākara Bhatta, son of Rāmakrsna Bhatta.


Remarks—This work has been published by the Nirnaya Sagar Press, Bombay. The portion appended to the printed book is not seen in this Ms. After the words, नास्यान्यदौर्ध्वदेहिक are seen 5 lines beginning with,

"त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते" इति उशनःस्मृतेः ।

The colophon in the printed book is more elaborate and contains the following stanza,

"वसुऋतुऋतुभूमिते गतेऽब्दे नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं रघुपतिपादसरोरुहेऽर्पितश्च" ॥

indicating the author's date to be 1668 of the Vikrama Era (1611 A. D.) The geneology of Kamalākara Bhaṭṭa is given below:



The other works of the author are:—

Pūrtakamalākara, Śūdrakamalākara, Kamalākarāhnika, Śāntikamalākara and Vivādatāṇḍava.

॥ बालक्रीडाव्याख्या ॥

63 A. BĀLAKRĪḌĀVYĀKHYĀ.

Substance—Palm leaf. Size—18½"×2". Leaves—36. 10 lines per page and 68 letters per line. Script—Malayālam. No. of Granthas—1530. Incomplete.

Subject—An elucidative exposition of Bālakrīḍā—the commentary on Yājñavalkyasmṛti.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । ॐ ।
(कः?) यस्माज्जातं जगद्यस्मिँल्लीयते यत्र तिष्ठति
सच्चिदानन्दवपुषे नमस्तस्मै परात्मने ॥
वासुदेवं जगद्योनिं सर्वधीवृत्तसाक्षिणम् ।
ब्रह्मविष्णुशिवाह्वानिर्गतं सृष्ट्या तु ... ... ॥
... तां व्यासं ... स्कुर्मो गुरूनाद्यं मनुं योगीश्वरं तथा ।
धर्मवक्तॄन्नमस्याम(स्याम?)स्तद्व्याख्यातॄंश्च सत्तमान् ॥
जैमिनिप्रमुखांश्चान्यान् वेदशास्त्रार्थपारगान् ।
यत्प्रसादादयं लोको धर्ममार्गस्थितः सुखी ॥
भवभूतिसुरेशाख्यं विश्वरूपं प्रणम्य तम् ।
याज्ञवल्कीयधर्मार्थविवृतिर्या कृतामुना ।
वयं यथोपदेशं तद्व्याख्याने प्रयतामहे ॥
तत्कृतेरतिगाम्भीर्यात् तदर्थाविष्कृतौ वयम् ।
असमर्थास्तथाप्यत्र यत्नो मद्बुद्धिशुद्धिकृत् ॥
यदि चान्योपकाराय भवेदेषा कृतिः कृता ।
सुतरामर्थवत्येव यत्नो नोऽपि महोदयः ॥

प्रारिप्सितधर्मव्याख्यानस्य श्रेयोनिमित्तत्वात् "बहुवं भवतो भ्रातृव्य" इति श्रुतेः श्रेयांसि बहुविघ्नानीति(वत्?च) स्मृतेर्विघ्नबाहुल्यात् तन्निवृत्त्यर्थम् ।


"मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥"

इति स्मृतेर्मङ्गलाचारयुक्तानामेवानेकजन्मकृताशुभनिवृत्तेः स्वधर्मवैगुण्येन सर्वकार्यसिद्धेः शिष्टसमाचाराच्चादौ मङ्गलाचरणं कार्यं

The colophon in the printed book is more elaborate and contains the following stanza,

"वसुऋतुऋतुभूमिते गतेऽब्दे नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं रघुपतिपादसरोरुहेऽर्पितश्च" ॥

indicating the author's date to be 1668 of the Vikrama Era (1611 A. D.) The geneology of Kamalākara Bhaṭṭa is given below:



The other works of the author are :—

Pūrtakamalākara, Śūdrakamalākara, Kamalākarāhnika, Śāntikamalākara and Vivādatāṇḍava.

॥ बालक्रीडाव्याख्या ॥

63 A. BĀLAKRĪḌĀVYĀKHYĀ.

Substance—Palm leaf. Size—18⅓" × 2". Leaves—36. 10 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—1530. Incomplete.

Subject—An elucidative exposition of Bālakrīḍā—the commentary on Yājñavalkyasmṛti.

॥ याज्ञवल्क्यस्मृतिः (बालक्रीडोपेता) ॥

63 B. YĀJÑAVALKYASMṚTI
with
the commentary Bālakrīḍā.

Substance—Palm leaf. Size—18½"×2". Leaves—121. 11 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—5650. Incomplete.

Subject—A code of civil and religious laws by Yājñavalkya.

Beginning:

वेदविद आचक्षते । तत् समाचरेदिति । शङ्खोऽप्याह—श्रुतिविरोधे त्रैविद्यसमवायेषु निर्णय इति । यथाबलेपं शास्त्रतस्तेऽनुब्रूयुरिति च ।

End:

स्मृत्यन्तरे च ब्रह्महसुरापगुरुतल्पगेत्युक्त्वा मातृपितृयोनिसम्बन्धगा इत्युक्तम् । स्नुषायां गवि च तल्पगोऽत्रकर इति च । तद(नु?)समञ्जसं स्यात् । अतः पूर्वैव व्याख्या ज्यायसी । मातुः सपत्नीति चासवर्णाभिप्रेता । इतरासु तु ....

Colophon:

इति परमभट्टारकयाज्ञवल्क्यप्रणीते धर्मशास्त्रे विश्वरूपकृतबालक्रीडायां प्रथमोऽध्यायः ॥

Author—Viśvarūpācārya, also known as Bhavabhūti is the commentator. This is clear from the following line found in the beginning portion of the Ms. No. 63 A.

मन्वानः, "ईशानः सर्वविद्यानाम्" इति श्रुतेः "ज्ञानं महेश्वरादिच्छेत्" इति च स्मृतेर्महेश्वरस्वरूपानुस्मरणनमस्काररूपमङ्गलाचरणं करोति — यो बिभर्तीति ।

End :

अधिकारान्तरग्रहणत्वात् प्रकृतप्रत्यभिज्ञानासम्भवाच्च । तच्च दर्शितं कुण्डपायिनामयने "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इत्यत्र। यद्यप्यग्निहोत्रशब्दस्य नित्याग्निहोत्रवाचितया प्रसिद्धत्वान्नित्याग्निहोत्रमस्य समासगुणपि? रत्र सा भवति तथाप्यत्रान्योन्यान्वययोग्यानां वादानामेकवाक्यतयान्वयव्युत्पत्तिसिद्धत्वादविरोधायाग्निहोत्रिकधर्मलक्षणार्थतया तच्छब्दोपपत्तिः । प्रकरणान्तरस्थत्वाच्च न प्रकृतप्रत्यभिज्ञा । अतः कर्मान्तरमत्र चोक्तम् ।

Colophon—Nil.

Author :

Remarks—The first 9 verses of the Yājñavalkyasmṛti form the Upodghātaprakaraṇa. This commentary comes up to a part of the 7th verse only. It is elaborate and explanatory. The name of the commentator is not known.

श्रीपतिं पार्वतीनाथं विघ्नेशं विघ्ननाशनम् ।
गुरून् पितॄन् स्वकान् वृद्धान् विप्रान् वेदविदस्ततः ॥
भगवन्तं भरद्वाजं प्रणम्य च कपर्दिनम् ।
ब्रह्मज्ञो विदुषामिष्टो भरद्वाजसमुद्भवः ॥
तत्समुद्भवीनयभवो यल्लुभट्टसुतः सुधीः ।
महाव्रतोऽध्वरी ब्रह्मनिष्ठे यल्लाजिनामतः ॥
वक्ष्याम्यहं परेतस्य चाहिताग्नेर्द्विजन्मनः ।
भारद्वाजीयसूत्रस्य पैतृमेधिकमञ्जसा ॥
तत्सूत्रमन्यसूत्राणि तत्तद्भाष्याण्यशेषतः ।
साङ्गिराचरितं पूर्वमाचारं च समाहितः(सतः) ।
विलोक्य विविधान् ग्रन्थान् प्रयोगप्रतिपत्तये ॥

अथातः पैतृमेधिकं दहनम् । अथ इदानीं मृतस्य कर्मोच्यते ।
पैतृकमिति कर्मनाम ....

End:

प्रीतिश्राद्धे विशेषेण पुत्रिणामपि कारयेत् ।
स्वमातृपितृवंश्यानामात्मसम्बन्धिनामपि ॥
स्व(मा?का)चार्यगुरूणां च पुत्रिणामपि कारयेत् ।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।
अमन्त्रकेण दग्धानां पुनर्दहनमिष्यते ॥
अलब्धात्मीयसूत्रस्तु श्राद्धान्तं परसूत्रतः ।
सपिण्डीकरणश्राद्धं स्वसूत्रेणैव नान्यतः ॥
कुर्यादिति शेषः ।

'भवभूतिसुरेशाख्यं विश्वरूपं प्रणम्य तम्'

Remarks—This is a commentary on the two chapters dealing with Ācāra and Vyavahāra respectively. The first is complete but the second not. On many leaves blank spaces are seen here and there. Bālakrīḍa of Viśvarupācārya has been published in two volumes as Nos. 74 and 81 of the T. S. S. and details as to the date etc. of Viśvarūpācārya are given in the prefatorial note thereof.



॥ भारद्वाजपैतृमेधिकम् ॥

64. BHĀRADVĀJAPAITṚMEDHIKAM.

Substance—Palm leaf. Size—18" × 2". Leaves—128. 10 lines per page and 54 letters per line. Script—Grantha. No of Granthas 4300. Incomplete.

Subject—The performance of Aparasaṁskāras of a Brahmin who had been observing Agnihotra and other rites.

Beginning:

तत्रादौ जलस्नानम् । अनन्तरं महासङ्कल्पः । मृत्तिकास्नानम् ।
समार्चनम् । विज्ञा (प) नप्रकारः ।

... ...

सर्वप्रायश्चित्तं समाप्तम् ।

श्रीपतिं पार्वतीनाथं विघ्नेशं विघ्ननाशनम् ।
गुरून् पितॄन् स्वकान् वृद्धान् विप्रान् वेदविदस्ततः ॥
भगवन्तं भरद्वाजं प्रणम्य च कपर्दिनम ।
ब्रह्मज्ञो विदुषामिष्टो भरद्वाजसमुद्भवः ॥
तत्समुद्भवीनयभवो यल्लुभट्टसुतः सुधीः ।
महाव्रतोऽध्वरी ब्रह्मनिष्ठ यल्लाजिनामतः ॥
वक्ष्याम्यहं परेतस्य चाहिताग्नेर्द्विजन्मनः ।
भारद्वाजीयसूत्रस्य पैतृमेधिकमञ्जसा ॥
तत्सूत्रमन्यसूत्राणि तत्तद्भाष्याण्यशेषतः ।
सद्भिराचरितं पूर्वमाचारं च समाहितः(सतः) ।
विलोक्य विविधान् ग्रन्थान् प्रयोगप्रतिपत्तये ॥

अथातः पैतृमेधिकं दहनम् । अथ इदानीं मृतस्य कर्मोच्यते । पैतृकमिति कर्मनाम ....

End:

प्रीतिश्राद्धे विशेषेण पुत्रिणामपि कारयेत् ।
स्वमातृपितृवंश्यानामात्मसम्बन्धिनामपि ॥
स्व(मा?का)चार्यगुरूणां च पुत्रिणामपि कारयेत् ।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।
अमन्त्रकेण दग्धानां पुनर्दहनमिष्यते ॥
अलब्धात्मीयसूत्रस्तु श्राद्धान्तं परसूत्रतः ।
सपिण्डीकरणश्राद्धं स्वसूत्रेणैव नान्यतः ॥
कुर्यादिति शेषः ।

शाखिनामपि सर्वेषामभावे स्वप्रयोगिणाम् ।
आपस्तम्बीयसूत्रेण कर्तव्यं मनुरब्रवीत् ॥

पराशरः—

देशान्तरे मृते विप्रे स्वसूत्रे परिवर्जयेत् ।
परसूत्रेण कर्तव्यं सपिण्डीकरणं विना ॥

Colophon :

श्रीरामो रक्षतु मां सदा । करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । शुभमस्तु । राम जय राम जय जय रामराम श्रीकृष्ण जय कृष्ण जय जय कृष्ण कृष्ण । श्रीरामार्पणमस्तु । ॐ तत्सत् ।

यल्लाजीव्याख्यानमिदं सर्वसंशयभेदनम् ।
उपकाराय लोकानां लिखितं पुस्तकं मया ॥
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

यल्लाजीयं समाप्तम् । शुभमस्तु । श्रीपद्मनाभस्वामिसहायम् । हरिः ॐ । शुभमस्तु । श्रीरामचन्द्रो रक्षतु ।

നവനീതഗോപാലകൃഷ്ണസ്വാമി സഹായം. ലക്ഷ്മീ
നൃസിംഹസ്വാമി സഹായം. ഹരിഃ ഓം.

Author—Yallāji, son of Yallu Bhatta of Talamudvinaya.

Remarks—On the second page of the 5th Fol. begins the work Yallājīya Bhāradvājapaitṛmedhikam. The preceding leaves deal with the Mahā-Saṅkalpa *that forms the* *pūrvāṅga* of the work. The subject discussed is given

on the margin and no continuity is maintained in the numbering of leaves. After the first 39 leaves there is a lacuna. Then the numbering begins from क and ends in न (1—20). 30 leaves are left blank and again 69 leaves are numbered in order.

॥ मनुस्मृतिः ॥

65. MANUSMṚTI.

Substance—Palm leaf. Size—18½″×2″. Leaves—16. 10 lines per page and 78 letters per line. Script—Malayālam. No. of Granthas—780.

Subject—Civil and religious laws relating to temporal concerns in general as well as those based on Varṇāśramadharma in particular.

Beginning:

हरिः ॐ । अविघ्नमस्तु । ॐ ।

मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन्! सर्ववर्णानां यथावदनुपूर्वशः ।
अन्तरप्रभवानां च धर्मान्नो वक्तुमर्हसि ॥
जरायुजाण्डजानां च तथा संस्वेदजोद्भिदाम् ।
भूतग्रामस्य सर्वस्य उत्पत्तिं प्रळयं तथा ॥

End:

द्वादश्यां जातरूपं च रङ्गकं रूप्यमेव च ।
ज्ञातिवैशिष्ट्यं त्रयोदश्यां चतुर्दश्यां तु कुप्रजाः ॥

प्रीयन्ते पितरश्चास्य ये शस्त्रेण रणे हताः ।
श्राद्धदः पञ्चदश्यां तु सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति मानवे धर्मशास्त्रे द्वितीयोऽध्यायः ।

Author—Manu.

Remarks—The Ms. is complete up to the end of the 2nd chapter but the last part of the 3rd chapter is missing. There is considerable difference between the readings found in this Ms. and those in the published editions with the commentaries of Medhātithi and Kullūkabhaṭṭa.



॥ मनुस्मृतिः ॥

66. MANUSMṚTI.

Substance—Palm leaf. Size—$10\frac{3}{4}'' \times 1\frac{1}{4}''$. Leaves—75. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1500. Incomplete.

Subject—Beginning—Same as No. 65.

End:


एवं प्रयत्नं कुर्वीत यानशय्यासनाशने ।
स्नाने प्रसाधने चैव सर्वालङ्कारकेषु च ॥
भुक्तवान् विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ।

Colophon:

इति मानवे षष्ठोऽध्यायः।

Author—Manu.

Remarks—The work is complete up to the close of the 6th chapter. But the 7th chapter falls short of 5 stanzas.



॥ मनुस्मृतिः ॥

67. MANUSMṚTI

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—75. *5 lines per page and 40 letters per line.* Script—Malayālam. No. of Granthas—950.

Subject—*Beginning*—Same as No. 65.

End:

एष शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च।
उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत॥
बालया वा युवत्या वा वृद्धया वापि योषिता।
न स्वातन्त्र्येण कर्तव्यं किञ्चित् कार्यं गृहेष्वपि॥
बाल्ये पितृवशे तिष्ठेत् पाणिग्राहस्य यौवने।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम्॥

Colophon:

इति मानवे चतुर्थोऽध्यायः ।

Author—Manu.

Remarks—The Ms. is very old and decayed. It contains the first 5 chapters. 21 stanzas are missing at the close of chapter 5. The last few leaves contain some quotations from the Ms. itself.

॥ मनुस्मृतिव्याख्या ॥

68. MANUSMṚTIVYĀKHYĀ.

Substance—Palm leaf. Size—12″ × 2″. Leaves—228. 7—9 lines per page and 30 letters per line. Script—Grantha. No. of Granthas—3500. Complete.

Subject—Same as No. 65.

Beginning:

श्रीमहागणपतये नमः ।

मनुमेकाग्रमिति । मनुः स्वायम्भुवः । तथाच वक्ष्यति–'स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पय'दिति । एकाग्रमवहितम् । अनेन वक्ष्यमाणेष्वर्थेषु सन्देहराहित्यमभिप्रेतम् । इदं वक्ष्यमाणम् । न केवलं त्रैवर्णिकानामेव, किन्तु शूद्राणामपीत्युक्तं सर्वशब्दग्रहणेन ......

End:

एवं प्रदर्शितस्य परमात्मज्ञानस्य फलमाह—एवं यः सर्वभूतेष्विति । आत्मना मनसा ब्रह्म परं पुरुषम् । शास्त्राध्ययनस्य फल-

महि—इत्येतन्मानवं शास्त्रमिति । यथेष्टां गतिमवाप्नुयात् । यथेष्टं फलमवाप्नोति ।

Colophon:

इति भारद्वाजगोत्रतिलकेन श्रीलक्ष्मणविचक्षणानुजेन श्रीनन्दनसूरिणा विरचिते मानवव्याख्याने द्वादशोऽध्यायः । समाप्तमिदं मानवव्याख्यानम् ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

காருசெஷு தைமாஸம் ௨௯ எழுதிமுடிந்தது

ലക്ഷ്മീപുരം ഗ്രാമത്തിൽ വെങ്കിടാദ്രിശാസ്ത്രിയവം പുത്രൻ വെങ്കിടേശ്വരേണ ലിഖിതമിദം പുസ്തകം.

श्रीगुरुमूर्तये नमः ।

Author—Śrīnandanasūri.

Remarks—The following passage,

इति लक्ष्मणाचार्यात्मजेन श्रीवीरमल्लप्रियसखेन श्रीनन्दनेन विरचिते मानवव्याख्याने प्रथमोऽध्यायः ।

occurring at the close of the first chapter proves that the author is Nandana Sūri, son of Lakṣmaṇācārya and a friend of Vīramalla. The colophons at the end of the 12th chapter show that he was a brother of Lakṣmaṇa Paṇḍita and that he belonged to the Bhāradvājagotra. The work has been printed at Bombay along with five other commentaries.



॥ याज्ञवल्क्यस्मृतिः (बालक्रीडोपेता) ॥

69. YĀJÑAVALKYASMṚTI
with
the commentary Bālakrīḍā.

Substance—Palm leaf. Size—17¼"×2". Leaves—40. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1500. One complete chapter only.

Subject—Same as No. 63 B.

Beginning:

श्रियः समुदयं प्राप्तुमिच्छता विजिगीषुणा समृद्ध्यै राज्ञा प्रयत्नादमित्रराज्यान्याच्छिद्य स्वराज्यं विवर्धनीयमित्युक्तम् । तत्रापि कष्टतमाः खल्वरयः कापटिककुयन्त्रव्यवहारिणो दस्यवः । तेभ्योऽपि राष्ट्रं रक्षणीयमित्येतदप्युक्तम् । अथेदानीं तदुद्धरणप्रकारविवेकार्थं व्यवहारनिरूपणं प्रस्तौति—

व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

ननु चैतत् प्रागेवोक्तम् "इति सञ्चिन्त्य नृपतिः" इत्यत्र । सत्यम् ।

End:

राज्ञा न्यायेन यो दण्डोऽगृहीतो वरुणाय तम् ।
निवेद्य दद्याद् विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥

यद्वा न्यायेनैव राज्ञा यो दण्डो गृहीतः, तमेव च सामर्थ्यात् स्वयमेव त्रिंशद्गुणीकृतं विप्रेभ्यो दद्यादिति । सर्वं चैतत् श्रुतिस्मृत्यनुसारान्याय्यमेवेत्यवसेयम् इति ।

प्रथमोदयानुरक्तो निखिलमलं मण्डलं कृत्वा ।
पालयति सततमुर्वीमतिबलवानेष नृपसविता ॥
इति निरस्तनिजव्यमनक्रमः कृतविपक्षचरित्रविपर्ययः ।
नृपतिराशु समुद्धृतकण्टको हरिरिवेष्टतमायतनं श्रियः ॥

Colophon :

इति याज्ञवल्कीये परमभट्टारकप्रणीते धर्मशास्त्रे वि-
श्वरूपकृतविवरणबालक्रीडायां द्वितीयो[ऽध्या]यः ।
अक्षरं यत्त परिभ्रष्टं मात्राहीनं तु यद् भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥
श्रीमरस्वत्यै नमः ।

Author—Text-Yājñavalkya Commentary—Viśvarūpācārya.

Remarks—The work has been published as No. 74 of the T. S. S. The Ms. contains only the chapter on Vyavahāra of the Yājñavalkyasmṛti with the commentary, 'Bālakrīdā'.

॥ याज्ञवल्क्यस्मृतिः [ऋजुमिताक्षरोपेता] ॥

70 YĀJÑAVALKYASMṚTI
with
the commentary Ṛjumitākṣara

Substance—Palm leaf. Size—14″×2′ Leaves—83.
12 lines per page and 72 letters per line.
Script—Malayālam. No of Granthas—4500,

Incomplete. Begins abruptly from the 20th verse, chapter 3 and extends to its close.

Subject—Same as No. 63 B.

Beginning :

पूर्णप्रसवकालजननाशौचमभिधायाधुना अप्राप्तकालगर्भ-निःसरणनिमित्तमाशौचमाह—

गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ।

स्रवतिर्यद्यपि द्रवद्रव्यकर्तृके परिस्पन्दे प्रयुज्यते । तथाप्यत्र द्रवाद्रवद्रव्यसाधारणरूपे अधःपतने वर्त्तते । कुतः, द्रवत्वस्य प्रथममास एव सम्भवात् तत्र च मासतुल्या निशा इति बहुवचनानुपपत्तेः । गर्भस्रावे यावन्तो गर्भग्रहणमासाः तत्समसंख्याका निशाः शुद्धेः कारणम् ।

End :

श्रुत्वैतद् याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्य स्वयम्भुवे ॥

एतद् ऋषिभिर्भाषितं श्रुत्वा योगीन्द्रोऽपि स्वनिर्मितधर्मशास्त्रधारणादिफलप्रार्थनोन्मीलितमुखपङ्कजः स्वयम्भुवे ब्रह्मणे नमस्कृत्य प्रणम्य भवत्प्राथितं सकलमित्थं भवत्वित्येवं किल भगवान् बभाषे ।

(१) व्रतप्रकरणम् (२) आपद्धर्मप्रकरणम्
(३) वानप्रस्थप्रकरणम् (४) कृच्छ्रादिलक्षणम्

Colophon :

इति श्रीभारद्वाजपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ तृतीयोऽध्यायः ।

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥

इति याज्ञवल्क्यमुनिशास्त्रगता विवृतिर्न कस्य विहिता विदुषः ।
प्रमिताक्षरापि विपुलार्थवती परिपिञ्चति श्रवणयोरमृतम् ॥

गम्भीराभिः प्रसन्नाभिर्वाग्भिर्न्यस्ता मिताक्षरा ।
अनल्पार्थाभिरल्पाभिर्विवृतिर्विहिता मया ॥

नासीदस्ति भविष्यति क्षितितले कल्याणकल्पं पुरं
नो दृष्टः श्रुत एव वा क्षितिपतिः श्रीविक्रमार्कोपमः ।
विज्ञानेश्वरपण्डितो न भजते किञ्चान्यदन्योपम-
श्चाकल्पं स्थिरमस्तु कल्पलतिकाकल्पं तदेतत्त्रयम्[1]॥

स्रष्टा वाचां मधुरवपुषां (वि?) शश्वदाश्चर्यसीम्नां
दातार्थानामविशयजुषामर्थिसार्थार्थनायाः ।
ध्याता मूर्तेर्मुररिजयिनो जीवतादार्कचन्द्रं
जेतारीणां तनुसहभुवां तत्त्वविज्ञाननाथः ॥

आ सेतोः कीर्तिराशे रघुकुलतिलकस्या च शैलाधिराजा-
दा च प्रत्यक्पयोधेश्चटुलतिमिकुलोत्तुङ्गरिङ्गत्तरङ्गात् ।
आ च प्राचः समुद्रान्नतनृपतिशिरोरत्नभाभासुराङ्घ्रिः
पायादाचन्द्रतारं जगदिदमखिलं विक्रमादित्यदेवः ॥

श्रीपार्वतीपरमेश्वराभ्यां नम ।

ओं नमः शिवाय । श्रीगुरुभ्यो नमः ।

Author—Vijñāneśvara Bhaṭṭāraka, son of Padmanābhabhbaṭṭopādhyāya. He refers to Vikramādityadeva who is none other than

Vikramāditya VI of the 11th century A. D. (vide page XIV, Introduction to Vol. III, C. S. M. G. C. A. S. Bengal).

Remarks—The following chronograms seen at the close of the work,

स्रग्धरा दुग्धतुष्टा, सुधी रघुनाथोऽयम्, सा श्रीः कृष्णेन सेव्या, मदनो युद्धतुष्टः, देशिको नळतुल्यः ।

are equivalent to the dates of the Kali Era 4649, 4666, 4668, 4630 and 4627 corresponding to 1548, 1565, 1567, 1529 and 1526 A. D. respectively.



॥ व्यवहारमाला ॥

71. VYAVAHĀRAMĀLĀ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—69. 11 lines per page and 44 letters per line. Script—Malayālam. No. of Granthas—1350.

Subject—A collection of citations from various Smṛtis arranged in order under different topics.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

नमस्ते नरसिंहाय भक्ताभिमतकारिणे ।
अजाय बहुरूपाय सर्गस्थित्यन्तकारिणे ॥
मनुमुख्यसरस्समुद्भवैः
सुकुमारैः प्रसवैर्वचोमयैः ।
त्रिदिवासिफलैर्नृपोचितां
रचयामि व्यवहारमालिकाम् ॥

नारदः—

मनुः प्रजापतिर्यस्मिन् काले राज्यमभूभुजत् ।
धर्मैकताना पुरुषाः सदासन् सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो न च मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्तितः ॥
द्रष्टा च व्यवहाराणां राजा दण्डधरः कृतः ।
व्यवहारान् दिदृक्षुस्तु ब्राह्मणैस्सह पार्थिवः ॥
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ।
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम् ॥
विनीतवेषाभरणः पश्येत् कार्याणि कार्यिणाम् ।
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ॥
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक् ।
धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ॥
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् ।
यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम् ॥
नयेत् तथानुमानेन धर्मस्य नृपतिः पदम् ।

कात्यायन —

सम्राड्विनाक सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥

श्रुतिस्मृतिविरुद्धं च भूतानामहितं च यत् ।
न तत् प्रवर्तयेद् राजा प्रवृत्तिश्च निवर्तयेत् ॥

End:

यमः—

पतितस्य धनं हृत्वा राजा पर्षदि दापयेत् ।
सर्वस्वं तु हरेद्राजा चतुर्थं चावशेषयेत् ॥
भृत्येभ्योऽनुसरन् धर्मं प्राजापत्यमिति श्रुतिः ।

नारदः—

यदा च कश्चित् तद् द्रव्यं ब्राह्मणेभ्यः प्रयच्छति ।
तद् राज्ञा स्वनुमन्तव्यमेष धर्मः सनातनः ॥
अन्यत्र काममुचिताद् भूमेः षड्भागसंज्ञितात् ।
बलतस्तस्य ... ... प्रजापालनवेतनम् ॥
शक्यं तत् पुनरादातुं यद्यद् ब्राह्मणसात्कृतम् ।
ब्राह्मणेभ्यस्तु यद् दत्तं न तस्य हरणं पुनः ॥
एष धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गवासस्तथा स्मृतः ॥
एवं सर्वानिमान् राजा व्यवहारान् समापयेत् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

Colophon:

इति व्यवहारमाला समाप्ता । शुभमस्तु

Author—The identity of the author cannot be ascertained from the work. Many authoritative citations are codified in it from Manusmṛti, Yājñavalkyasmṛti, Nāradīyamanusamhitā, Kātyāyanamatasaṅgraha etc. in

order to meet all temporal requirements. He gives no stanza of his own. A work of the same title with commentary has been published in Malayalam as No. IX of the S. M. M.'S. Trivandrum. There is remarkable difference between the readings in the textual portion of the printed edition and this Ms. Mahākavi Rao Sahib Ullūr S. Paramesvara Iyer, in his introduction, attributes its authorship to a Keralīya as the work has not gained currency outside Kerala. He presumes that the author may be an *Ampalavāsi* whose duties are confined to the temple.

Remarks—A few leaves are left blank at the end of the Ms. The work deals with the different aspects of *Vyavahāra* under the heads—*Nimitta*, *Kāla*, *Sabhālakṣana*, *Sabhyalakṣana*, *Āvedana*, *Divyakrama* etc. At the end of the different topics are seen the following colophons :—

व्यवहारमातृकाकाण्डं समाप्तम् । इति व्यवहारमालायां दिव्यं प्रकरणं समाप्तम् ।

The work throws light on the details of procedure in Courts of Law. It is included under the head "Nibandha Smṛti," (Vide Page 117 C. S. M. Adyar, part I). A chronogram 'इष्टा पेशल-शास्या' found after the colophon of No. 75 indicates that the work has had its origin, or was written, on the 25th Makaram 277.

॥ व्यवहारमाला ॥

72. VYAVAHĀRAMĀLĀ.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—137. 8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas 1500. Incomplete.

Subject—*Beginning*—Same as No. 71.

End:

बोधायनः—

मातुरलङ्कारं दुहितरः साम्प्रदायिकं लभेरन् । असंस्कृतसंस्कारः ।

कात्यायनः—

पैतामहं च पित्र्यं च यच्चान्यत् स्वयमार्जितम् ।

दायादानं विभागे तु सर्वमेतद् विभज्यते ।

नारदः—

यच्छिष्टं पितृदायेभ्यो दत्वर्णं पैतृकं च यत् ॥

Colophon—Nil.

Author—Same as No. 71.

Remarks—The Ms. is incomplete. It ends in असंस्कृतसंस्कारः in Dāyavibhāga. The transcript No. 457 of the C. O. L. contains some 288 verses in addition.



॥ व्यवहारमाला ॥

73. VYAVAHĀRAMĀLĀ.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—64. 10 lines per page and 36 letters per line. Script—Malayālam. No. of Granthas—1440. Incomplete.

Subject—Beginning—Same as No. 71.

End :

एवंविधानपोदेशान् गुल्मे स्थावरजङ्गमे ।
तस्करप्रतिषेधार्थं चोरैश्चाप्यनुचारयेत् ॥
वर्णस्वराकारभेदात् मन्दिग्याविनिवेदनात् ।
अदेशकालदृष्टत्वान्निवासस्य विशोधनात् ॥

Colophon—Nil.

Author :

Remarks—The Ms. contains only the portion up to the "Corāpahṛtadravyadānavidhi".

॥ व्यवहारमाला ॥

74. VYAVAHĀRAMĀLĀ.

Substance—Palm leaf Size—$11\frac{1}{4}'' \times 1''$. Leaves—125. 5—7 lines per page and 32 letters per line,

Script—Malayāḷam. No. of Granthas—1500. Incomplete. 10 verses are missing at the beginning.

Subject—Same as No. 21.

Beginning:

(सप्राड्विवाकः) सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥
श्रुतिस्मृतिविरुद्धं च भूतानामहितं च यत् ।
न तत् प्रवर्तयेद् राजा प्रवृत्तिं च निवर्तयेत् ॥
धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन पार्थिवः ।
समीक्षमाणो निपुणं व्यवहारगतिं नयेत् ॥

End:

... ... भागसंज्ञितात् ।
स तस्य विहितो राजा (धात्रा) प्रजापालनवेतनम् ॥
शक्यं तत् पुनरादातुं यद्यद् ब्राह्मणसात्कृतम् ॥
ब्राह्मणेभ्यस्तु यद्दत्तं न तस्य हरणं पुनः

यमः—

एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथा स्मृतः ।
एवं सर्वानिमान् राजा व्यवहारान् समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

Colophon:

इति व्यवहारमाला समाप्ता । ओं ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

Author—Same as No. 71.

॥ व्यवहारमाला ॥

75. VYAVAHĀRAMĀLĀ

Substance—Palm leaf. Size—14"×2". Leaves—55 10—12 lines per page and 56 letters per line. Script—Malayālam No of Granthas—2150. Complete

Subject—Same as No. 71.

Beginning—Same as No 71, but the invocatory portion is omitted herein

End—Same as No. 71 but with the addition of Yama, Nārada, etc. at the beginning of verses

Colophon :

इति व्यवहारमाला समाप्ता ।

अतिसूक्ष्मं वीक्ष्य मया लिखितां व्यवहारमालिकां कालात् ।
दृष्ट्वा पेशलशक्त्या वीक्ष्य जना शोधयन्तु नन्दन्तु ॥

अक्षरं यत् परिभ्रष्टं मात्राहिनं तु यद् भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥

Author

Remarks—The first stanza damaged The chronogram 'दृष्ट्वा पेशलशक्त्या' found in the colophon refers to the *Kalidina* 15,35,118 equivalent to 25th Makaram 277 M E This may point to the date of origin or transcription of the work

Script—Malayalam. No. of Granthas—1500. Incomplete. 10 verses are missing at the beginning.

Subject—Same as No. 21.

Beginning:

(सप्राड्विवाकः) सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥
श्रुतिस्मृतिविरुद्धं च भूतानामहितं च यत् ।
न तत् प्रवर्तयेद् राजा प्रवृत्तिं च निवर्तयेत् ॥
धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन पार्थिवः ।
समीक्षमाणो निपुणं व्यवहारगतिं नयेत् ॥

End:

... ... भागसंज्ञितात् ।
स तस्य विहितो राजा (धात्रा) प्रजापालनवेतनम् ॥
शक्यं तत् पुनरादातुं यद्यद् ब्राह्मणसात्कृतम् ॥
ब्राह्मणेभ्यस्तु यद्दत्तं न तस्य हरणं पुनः

यमः—

एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथा स्मृतः ।
एवं सर्वानिमान् राजा व्यवहारान् समापयन् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

Colophon:

इति व्यवहारमाला समाप्ता । ओं ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

Author—Same as No. 71.

॥ स्मार्तप्रदीपिका ॥

77. SMĀRTAPRADĪPIKĀ.

Substance—Palm leaf. Size—14¾″ × 2″. Leaves—99. 10 lines per page and 52 letters per line. Script—Grantha. No. of Granthas—3200. Complete.

Subject—The sixteen *samskāras* and the methods of their performance.

Beginning:

अथाश्वलायनानां सुखबोधाय नारायणीयादिग्रन्थानवलोक्य श्रीलक्ष्मीनृसिंहं नत्वा स्मार्तप्रदीपिकां वक्ष्ये । कर्ता स्नातो धौतानार्द्रवासा नैकवासा बद्धशिखो यज्ञोपवीती(चा)चान्तः कृतनित्यक्रियः शुचौ देशे प्राङ्मुख आसीनः कर्म कुर्यात् । कर्मान्तेऽप्याचामेत् ॥

End:

पौलस्त्यं ऋषिं तर्पयामि । कौण्डिन्यं तर्पयामि । प्रभातमौद्गल्य - आत्रेय - मैत्रेय - वत्स -श्रीवत्स - पराशर - च्यवन–नारद - गोपथ्य - पवित्रपाणि - वामदेव - पौण्डरीक - साकल्य सत्य - विश्वामित्र - कण्व - सुतीक्ष्ण - वायव्य - जलत्कार - अगस्त्य - वालखिल्य - गौतम - वसिष्ठ - सौदर्य - विष्वक्सेन - सौवर्ण- कुत्सबोधन - कासल्य - कपिल - जितकण्व - भरद्वाज - पौलस्य-भार्गव - याज्ञवल्क्य - शौनक - आश्वलायन - आपस्तम्ब - आङ्गिरस-बृहदश्व - जाबालि - मार्कण्डेय - संवर्तक..............ऋषितर्पणम् ॥ ४६ ॥

॥ सपिण्डीकरणप्रयोगः ॥

76. SAPIṆḌĪKARAṆAPRAYOGA.

Substance—Palm leaf. Size—7″ × 2″. Leaves—24. 10 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—350. Incomplete.

Subject—The rituals relating to Sapiṇḍīkaraṇa.

Beginning:

गणपतये नमः ।

अथ सपिण्डीकरणमुच्यते । तत्र संवत्सरे पूर्णे मृतस्य पितुः सपिण्डीकरणार्थं पूर्वेद्युरेव श्रुतशीलवृत्तसम्पन्नान् श्रौतस्मार्तप्रवर्तकान् मातृतः पितृतश्चाच्छा (?) भुक्तपितॄन् पञ्च ब्राह्मणान् कचित् स्थाने सन्निपात्य निमन्त्रयेत् ।

End:

तत्र प्रेतविप्रादीनामभिवादनं तु सर्वे पृथक् पृथक् कुर्युः । कर्मकरणा मन्त्राश्च तेन सह तैर्वक्तव्याः । अत ऊर्ध्वं मधुमतीश्रावणादिवीरप्रार्थनान्तस्य कर्मणः संक्षेपा० ....

Colophon—Nil.

Author:

Remarks—The work begins from Fol. 22 and ends on Fol. 45. The Ms. is about 200 years old.

—:o:—

॥ स्मृतिचन्द्रिका ॥

78. SMṚTICANDRIKĀ.

Substance—Palm leaf. Size—$18\frac{3}{4}'' \times 2''$. Leaves—112. 10—12 lines per page and 84 letters per line. Script—Malayālam, (Grantha Ff. 90—103). No. of Granthas—6500. Incomplete.

Subject—Vyavahāra (Litigation).

Beginning:

हरिः । श्रीगणपतये नमः ।

सरस्वतीपतिं वन्दे श्रियः पतिमुमापतिम् ।
एषां पतिं गणपतिं बृहस्पतिमुखान्मुनीन् ॥
पदे पदे प्रस्खलतां प्रदीपादिस्थितावपि ।
द्रष्टॄणां दृष्टिविषये चन्द्रिकात्र वितन्यते ॥

अथेदानीं व्यवहारकाण्डमारभ्यते । तत्रादौ व्यवहारस्वरूपं निरूप्यते । तत्राह बृहस्पतिः—

धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रकीर्तितः ॥

End:

"उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवसाये"दिति । तत्कर्मकरणे च दण्डमाह याज्ञवल्क्यः—"राजयानासनारोहदण्डो मध्यमसाहस" इति । कात्यायनोऽपि—

"राजक्रीडायुधे सक्ता राजवृत्त्युपजीविनः ।
अप्रियस्य च यो वक्ता वधं तेषां प्रवर्तयेत्" ॥

उत्पद्यमानप्रकृतिसम्भेदादौ राजा यत् कर्तव्यं, तदस्माभिः प्रागेवा-

Colophon :

(४३ तमे पत्रे) कात्कायनविश्वामित्रगोत्रा (न्वे ?) (न्वये)न चिन्दुकुरुवास्तव्यपुराणतिरुमलयज्वलनन्दनेन तिरुमलसोमयाजिना विरचिता शुभगस्मार्तप्रदीपिका मुदेऽस्तु मुदेऽस्तु । രുക്മിണീസത്യഭാമാസമേതശ്രീഗോപാലകൃഷ്ണസ്വാമി സഹായം. हरिः ओम् । शुभमस्तु । अथारम्भविवाहः स्यात । ശ്രീപത്മനാഭസ്വാമി സഹായം. शुभमस्तु ॥

हरिः ॐ । शुभमस्तु । पुराणवारिखण्डं समाप्तम् । श्रीरामचन्द्राय नमः । അനന്തപത്മനാഭസ്വാമി സഹായം. രുക്മിണീസത്യഭാമാസമേതശ്രീഗോപാലകൃഷ്ണസ്വാമി സഹായം. ലക്ഷ്മീനൃസിംഹസ്വാമി സഹായം. हरिः ॐ । शुभमस्तु ।

Author—Tirumalasomayājin son of Purāṇatirumalayajvala.

Remarks—The first page of the Ms. deals with the Āyuṣyahoma of Śaunaka. Smārtapradīpikā begins on the second page. The second chapter ends on Fol. 43. Tirumalasomayājin was surnamed Purāṇa Bhaṭṭa, whence his work "Āśvalāyanapurāṇa Bhaṭṭīya".

॥ स्मृतिचन्द्रिका ॥

78 SMRTICANDRIKĀ.

Substance—*Palm leaf* Size—18½ × 2 Leaves—112 10—12 lines per page and 84 letters per line Script—Malayalam, (Grantha Ff 90—103) No of Granthas—6500. Incomplete

Subject—Vyavahāra (Litigation)

Beginning.

हरि । श्रीगणपतये नमः ।

सरस्वतीपतिं वन्दे श्रियः पतिमुमापतिम् ।
एषां पतिं गणपतिं बृहस्पतिमुखान्मुनीन् ॥
पदे पदे प्रस्खलतां प्रदीपादिस्थितानपि ।
द्रष्टृणां दृष्टिविषये चन्द्रिकात्र वितन्यते ॥

अथेदानीं व्यवहारकाण्डमारभ्यते । तत्रादौ व्यवहारस्वरूपं निरूप्यते । तत्राह बृहस्पतिः—

धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रकीर्तितः ॥

End:

"उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत्" इति । तत्कर्मकरणे च दण्डमाह याज्ञवल्क्यः—"राजयानासनारोहदण्डो मध्यमसाहस" इति । कात्यायनोऽपि—

"राजक्रीडायुधे सक्ता राजद्रव्युपजीविनः ।
अप्रियस्य च यो वक्ता वध तेषां प्रवर्तयेत्" ॥

उरप्रमाणप्रकृतिसम्भेदादौ राज्ञा यत् कर्तव्यं, तदस्माभिः प्रागेव-

स्मिन् काण्डे चाभिहितमित्युपरम्यते । तेन प्रकीर्णाख्यपदस्य प्रतिपाद्यत्वं किञ्चिदेवेह प्रतिपादितम् । अवशिष्टमिह तत्र तत्र प्रसङ्गादुक्तमनुसन्धेयम् ।

Colophon:

इति श्रीसकलविद्याविशारदकेशवादित्यभट्टोपाध्यायसूनुयाज्ञिकदेवनभट्टोपाध्यायसोमयाजिविरचितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डं समाप्तम् ।

श्रीकेशवादित्यसमुद्भवस्य देवस्य शान्तद्विजराजमूर्तेः ।
सच्चन्द्रिकां प्राप्य सुखेन लोकाः कुर्वन्तु सर्वव्यवहारसिद्धिम् ॥

Author— Yājñikadevanabhaṭṭopādhyāya somayājin son of Keśavādityabhaṭṭopādhyāya.

Remarks—This work has been published in M. O. L. Series as Nos. 45 and 48, *omitting* the two introductory and two closing stanzas. Hemādri the author of Caturvargacintāmaṇi mentions this work. In the last verse of the published work *the number of granthas is given* as 9000. This Ms. contains only some 6500 granthas. The portion corresponding to pages 142—414 of the printed work is missing herein. The Pratīpa noted in the line,

"पदे पदे प्रसन्नानां प्रदीपादिभिरपि ।"

अत्रेयमृणादानाद्यष्टादशपदविधिविलानपरिच्छेदे प्रकरणानुपूर्वी ऋणप्रयोगविधिः । निर्दोषधनिकाधीनां विधिविषयाणि । सदोषधनिकाधीनां विधिविषयाणि । आधावधमर्णस्य तन्नाशविषयाणि । आधिसिद्धिविषयाणि । आध्यादिविषयविवादापनोदविषयाणि । आधिमोचनविषयाणि । प्रतिभूप्रभेदाः । प्रतिभुवां विषयः । प्रतिभूपुत्रादिनां विषयः । प्रतिबोधादिदत्तधनप्रक्रियाविधयः । वृद्धिभेदाः । वृद्धिपरिमाणनियमाः । अकृतवृद्धिविषयः । अकृतवृद्ध्यपवादः । वृद्धिग्रहणप्रतिषेधाः । वृद्ध्युपरमाधीनिरूपणम् । वृद्ध्युपरमापवादाः । ऋणप्रतिदानविधिः । प्रतिदानासमर्थाधमर्णविषयाणि । रिक्थग्रहणादिविषयाणि । कुटुम्बविषयाणि । कुटुम्बविशेषविषयाणि । परतन्त्रविषयाणि । प्रतिदानात् प्रागेवातीतोत्तमर्णवाकरणोद्यतऋणिकविषयाणि । ततोऽधिक्षेपाख्यपदम् तत्र निक्षेपादिस्थानविधिः । आप्तग्राहकविषयाणि । ग्रहीत्रादिकृत्यविषयाणि । प्रत्यनन्तरे प्रत्यर्पणप्रतिषेधस्य क्वचिदपवादोक्तिः । याचितान्वाहितादिविषयाणि । ततः सम्भूयसमुत्थानाख्यपदम् । तत्र वणिग्विषयाणि । कृषिकविषयाणि । शिल्पिविषयाणि । ऋत्विग्विषयाणि । नर्तकादिविषयाणि । नर्तनादिविषयाणि । ततो दत्ताप्रतिदानिकाख्यपदम् । तत्रादेयविषयाणि । दत्तविषयाणि । ततः अभ्युपेत्याशुश्रूषादिकं पदम् । तत्र कर्मकरविषयाणि । दासनिरूपणम् । दासविषयाणि । ततो वेतनानपाकर्माख्यं पदम् । तत्र वेतनार्पणविषयाणि । भृत्यविषयाणि । स्वामिविषयाणि । पण्यस्त्रीतदुपभोगविषयाणि । नारदाभिप्रायादत्रैवान्तर्भूतस्य स्वामिपालविवादस्य निर्णयः । प्रासङ्गिकानि पश्वादिव्यतिक्रमस्य विषयाणि । ततोऽस्वामिविक्रयाख्यं पदम् । तत्र सम्प्रतिपन्नास्वामिविक्रयविषयाणि । स्वाम्यनर्पि-

स्मिन् काण्डे चाभिहितमित्युपरम्यते । तेन प्रकीर्णाख्यपदस्य प्रतिपाद्यत्वं किञ्चिदेवेह प्रतिपादितम् । अवशिष्टमिह तत्र तत्र प्रसङ्गादुक्तमनुसन्धयेम् ।

Colophon :

इति श्रीसकलविद्याविशारदकेशवादित्यभट्टोपाध्यायसूनुयाज्ञिकदेवनभट्टोपाध्यायसोमयाजिविरचितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डं समाप्तम् ।

श्रीकेशवादित्यसमुद्भवस्य देवस्य शान्तद्विजराजमूर्तेः ।
सच्चन्द्रिकां प्राप्य सुखेन लोकाः कुर्वन्तु सर्वव्यवहारसिद्धिम् ॥

Author— Yājñikadevanabhaṭṭopādhyāya somayājin son of Keśavādityabhaṭṭopādhyāya.

Remarks—This work has been published in M. O. L. Series as Nos. 45 and 48, omitting the two introductory and two closing stanzas. Hemādri the author of Caturvargacintāmaṇi mentions this work. In the last verse of the published work the number of granthas is given as 9000. This Ms. contains only some 6500 granthas. The portion corresponding to pages 142—414 of the printed work is missing herein. The Pradīpa noted in the line,

"पदे पदे प्रस्खलतां प्रदीपादिस्थितावपि ।"

may refer to the Smṛtipradīpa of Candraśekhara or that mentioned in the *Pariśiṣṭakāṇḍa* of Hemādri. The table of contents after the colophon is as follows:—

अत्रेयमृणादानाद्यष्टादशपदानिधिवितानपरिच्छेदे प्रकरणानुपूर्वी ऋणप्रयोगविधिः । निर्दोषधनिकाधीनां विधिविषयाणि । सदोषधनिकाधीना विधिविषयाणि । आधावधमर्णस्य तन्नाशविषयाणि । आधिसिद्धिविषयाणि । आध्यादिविषयविवादापनोदविषयाणि । आधिमोचनविषयाणि । प्रतिभूप्रभेदाः । प्रतिभुवा विधयः । प्रतिभूपुत्रादिना विषयः । प्रतिभोधादिदत्तधनप्रक्रियाविधयः । वृद्धिभेदाः । वृद्धिपरिमाणनियमाः । अकृतवृद्धिविषयः । अकृतवृद्धयपवादः । वृद्धिग्रहणप्रतिषेधाः । वृद्ध्युपरमावधीनिरूपणम् । वृद्ध्युपरमापवादाः । ऋणप्रतिदानविधिः । प्रतिदानासमर्थाधमर्णविषयाणि । रिक्थग्रहणादिविषयाणि । कुटुम्बविषयाणि । कुटुम्बविशेषविषयाणि । परतन्त्रविषयाणि । प्रतिदानात् प्रागेवातीतोत्तमर्णवाकरणोद्यतऋणिकविषयाणि । ततोऽधिक्षेपाख्यपदम् तत्र निक्षेपादिस्थानविधिः । आसग्राहकविषयाणि । ग्रहीत्रादिकृत्यविषयाणि । प्रत्यनन्तरे प्रत्यर्पणप्रतिषेधस्य क्वचिदपवादोक्तिः । याचितान्वाहितादिविषयाणि । ततः सम्भूयसमुत्थानाख्यपदम् । तत्र वणिग्विषयाणि । कृषिकविषयाणि । शिल्पिविषयाणि । ऋत्विग्विषयाणि । नर्तकादिविषयाणि । नर्तनादिविषयाणि । ततो दत्ताप्रतिदानिकाख्यपदम् । तत्रादेयविषयाणि । दत्तविषयाणि । ततः अभ्युपेत्याशुश्रूषादिकं पदम् । तत्र नर्मकरविषयाणि । दासनिरूपणम् । दासविषयाणि । ततो वेतनानपाकर्माख्यं पदम् । तत्र वेतनार्पणविषयाणि । भृत्यविषयाणि । स्वामिविषयाणि । पण्यस्त्रीतदुपभोगविषयाणि । नारदाभिप्रायादत्रान्तर्भूतस्य स्वामिपालविवादस्य निर्णयः । प्रासङ्गिकानि पश्वादिव्यतिक्रमस्य विषयाणि । ततोऽस्वामिविक्रयाख्यं पदम् । तत्र सम्प्रतिपन्नास्वामिविक्रयविषयाणि । स्वाम्यनर्पि

ततद्द्रव्यभोक्तृविषयाणि । ततो विक्रीयासम्प्रदानाख्यं पदम् । ततः क्रीत्वानुशयाख्यं पदम् । ततः समयानपाकर्माख्यं पदम् । ततः क्षेत्रजविवादाख्यं पदम् । तत्र सीमालिङ्गनिरूपणम् । सीमाविवादनिर्णयः । तत्र साक्ष्यपराधविषयाणि नद्यादिग्रामभृ(त?)विषयाणि । ग्रहादिविषयाणि । क्षेत्रकर्तृविषयाणि । ततः स्त्रीपुंससम्बन्धाख्यं पदम् । तत्र स्त्रीरक्षणविधिः स्त्रीरक्षणप्रकारः । अधिवेदनविषयाणि । अत्याज्यस्त्रीविषयाणि । संत्याज्यस्त्रीविषयाणि । जायापत्योर्धर्माः । स्त्रीकर्माणि । प्रोषितभर्तृका धर्माः । ततो दायविभागाख्यं पदम् । तत्र विभागकालकर्तृनिरूपणम् । जीवद्विभागप्रकारः । अजीवद्विभागे समविभागप्रकारः । विषमविभागप्रकारः । अन्योन्यस्य जीवद्विभागविषयाणि । दायानर्हविषयाणि । विभाज्य निरूपणम् । प्रमीतामीतपितृकपुत्रादिभागकल्पनाविषयाणि । स्त्रीधनभेदाः । स्त्रीधनकृत्यम् । स्त्रीद्वारागतधनविभागः । गौणपितृद्वारागतधनविभागः । अपुत्रद्वारागतधनविभागे पत्नीविषयाणि । तस्मिन्नेव विभागे दुहितृपौत्रपितृमातृपितामहीभ्रातृतत्सुतादिविषयाणि । तस्मिन्नेव विभागे संसृष्टभ्रात्रादिविषयाणि । विभक्तजपुत्रादिविभागः । अवलुप्तधनविभागः । विभक्तकृत्यम् । विभागस्वरूपतद्धर्मभूतानवलुप्तत्वादिसद्भावसाधकहेतवः । ततः साहसाख्यं पदम् । तत्र साहसलक्षणपदविषयाणि । प्रासङ्गिकसाहसस्तेयविषयाणि । साहसस्त्रीसङ्ग्रहविषयाणि । प्रासङ्गिकसाहसस्त्रीस्तेयविषयाणि । साहसस्तेयविषयाणि । प्रासङ्गिकसाहसस्त्रीसंग्रहविषयाणि । साहसपदान्तर्गतोभयपारुष्यविषयाणि । प्रासङ्गिकसाहसकल्पापराधदण्डविषयाणि । ततो वाक्पारुष्याख्यपदस्य दण्डपारुष्याख्यं पदम् । ततः प्रकीर्णाख्यं पदम् । इति स्मृतिचन्द्रिकायामष्टादशपदविधिवितानपरि-

च्छेदप्रकरणानुपूर्वी। व्यवहारकाण्डग्रन्थसंख्या–सर्वविवादसाधारण-विधिवितानपरिच्छेदस्य पञ्चशताधिकानि त्रीणि सहस्राणि। अष्टादश-पदविधिवितानपरिच्छेदस्य तु चतुःशताधिकानि पञ्चसहस्राणि। एवं च कृत्स्नव्यवहारकाण्डस्य नवसहस्राणि भवन्ति। इति व्यवहारकाण्डः समाप्तः।

अक्षरं यत् परिभ्रष्टं मात्राहीनं तु यद्भवेत्।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते॥
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः।
श्रीपद्मनाभो रक्षतु।
आदर्शदोषान्मतिविभ्रमाद्वा श्रुत्यर्थहीनं लिखितं मया यत्।
तत् सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यन्ति च ये लिखन्ति॥
श्रीगुरुभ्यो नमः। शुभमस्तु।

॥ स्मृतिमुक्ताफलम् ॥

79 A. SMRTIMUKTĀPHALAM.

Substance—Palm leaf Size—18 × 2" Leaves—1–218 6—9 lines on a page and about 56 letters in a line. Script—Grantha. No. of Granthas—6000. Complete.

Subject.—Varṇadharma and Āśramadharma, discussing in detail the views of different schools and drawing independent conclusions.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

अङ्के विहारिणमनुक्षणमद्रिजाया-
स्तं केवलं कलभमद्भुतमाश्रयामः ।
नित्यं य एष बहुभिर्निजसेवकानां
प्रत्यूहपुञ्जकवलैः परितोषमेति ॥

पारावती विधिमुखावलिसौधपङ्क्ते-
र्मायाविहीनजनमानसराजहंसी ।
योगीश्वरैरपि विमृग्यनिजस्वरूपा
वागीश्वरी दिशतु मे वचसां समृद्धिम् ॥

शरणं तमुपैमि साधुसेव्यं सदयं कञ्चन देवताविशेषम् ।
सहसा चरणाम्बुजं यदीयं मुनिवैधुर्यनिरासहेतुरासीत् ॥

श्रीरामचन्द्रचरणद्वयपद्मकोशा-
न्मा यातु मे चपलमानसचञ्चरीकः ।
मुक्तेर्वशीकरणचूर्णमहो यदीयं
गात्रेषु बिभ्रति रजो रजसा विहीनाः ॥

भवकोदण्डदलनं भवबन्धविमोचनम् ।
दशकण्ठरिपुं वन्दे दशस्यन्दननन्दनम् ॥

वैद्यनाथाध्वरी नाम दामो वाधूलवंशजः ।
स्मृतिमुक्ताफलं नाम कुरुते सारसंग्रहम् ॥
उरुविस्तरधर्मशास्त्रार्थैरुपलब्धं महता परिश्रमेण ।
श्रवणेषु निलीयतां किमन्यैः स्मृतिमुक्ताफलमेकमेव सद्भिः ॥
क्व नु विशकलितं तु धर्मशास्त्रं
क्व च पुनराकलने मम प्रवृत्तिः ।
सरलमतिजुषस्तथापि सन्तः
सततमिदं मम साहसं सहन्ताम् ॥
तत्रादौ धर्मप्रमाणानि निरूप्यन्ते । मनुः—
वेदोऽखिलो धर्ममूलं

End:

बह्वृचपरिशिष्टे—
पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवेत् ।
धीपूर्वं रेतउत्सर्गो द्रव्यसंग्रह एव च ॥
अत्रानुगत आचमनादिसाधारणो धर्मस्तत्तदवसरे वक्ष्यते ।
व्यासः—
"मोक्षाश्रयं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तः ।
अनिन्धनज्योतिरिव प्रशान्तः
स ब्रह्मभावं व्रजति द्विजातिः ॥" इति ।

Colophon—Nil.

Author—Vaidyanātha Dīkṣita, of Vādhula gotra belonging to Tiruvasanallūr.

Remarks—This has been printed at Kumbhakonam in Grantha script and it ends thus:—

श्रीमद्भूमण्डलभूषणायमानचोळदेशान्तर्गतश्रीकण्ठमाणिक्याख्यमहीसुरग्रामाभिजनैः श्रुतिस्मृतीतिहासपुराणादिषु कूलंकषधिषणैः श्रीवाधूलान्वयजलधिराकेन्दुभिः श्रीवैद्यनाथदीक्षितैर्विरचिते स्मृतिमुक्ताफलाख्ये धर्मशास्त्रे वर्णाश्रमधर्मनिरूपणं नाम प्रथमः परिच्छेदः समाप्तः ।

This is a very important Nibandha. It consists of six kāṇḍas of which the Varṇāśramadharmakāṇḍa alone is found in this Ms.

॥ स्मृतिमुक्ताफलम् ॥

79 B. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—18″ × 2″. Leaves—219—257. 8 lines per page and 56 letters per line. Script—Grantha. No. of Granthas—1200. Complete.

Subject—Tithinirṇaya, dealing with the proper time for the performance of the Nitya and Naimittika karmas.

Beginning:

अथ कालो निरूप्यते । स च कर्मण्यङ्गभूतः । तदाह गार्ग्यः—

"तिथिनक्षत्रवारादिसाधनं पुण्यपापयोः ।
प्रधानगुणभावेन न स्वातन्त्र्येण ते क्षमाः ॥" इति ॥

न्यासः—

'यत्तिथौ यत्र नक्षत्रे वारे यत्र च यद्यथा ।'

End:

तस्मिन्नेव दिने तत्कर्मानुष्ठेयम् । संक्रान्तिग्रहणादिकालो नैमित्तिकस्नानादिप्रकरणे निरूपितः ।

Colophon:

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले (काल)-निरूपणं नाम पञ्चमः परिच्छेदः । हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । सरस्वत्यै नमः । ओं तत् सत् ब्रह्मार्पणमस्तु ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।

अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

साम्बाय परमगुरवे नमः । श्रीमत्सद्गुरुचरणारविन्दाभ्यां नमः । मङ्गलं भवतु ।

Author—Vaidyanātha Dīkṣita.

Remarks—This is the 5th part of the work and has been printed at Kumbhakonam. 21 leaves are left blank at the beginning and at the close together.

॥ स्मृतिमुक्ताफलम् ॥

80. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—14½" × 2". Leaves—174. 8—10 lines on a page and 48 letters in a line.

Script—Grantha. No. of Granthas—5000. Complete.

Subject—Āhnikakāṇḍa, describing the Nitya, Naimittika and Kāmya Karmas to be performed in every day life.

Beginning:

यः शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोः संस्मरणात् पुंसां सर्वतो जयमङ्गलम् ॥
पङ्केरुहाक्षाय भवौषधाय भक्तार्तिनाशाय परात्पराय ।
तार्क्ष्याधिरूढाय सुखप्रदाय लक्ष्मीवराहाय नमः परस्मै ॥
तमञ्जनानन्दनमुग्रवीर्यं निरञ्जनं काञ्चनशैलकल्पम् ।
विभञ्जनं रावणनिष्कुटस्य प्रभञ्जनस्यात्मजमाश्रयामि ॥
पारावती विधिमुखावलिसौधपङ्क्ते-
दिव्याभिजात्यजनमानसराजहंसी ।
योगीश्वरैरपि विमृग्यनिजस्वरूपा
वागीश्वरी दिशतु मे वचसां समृद्धिम् ॥
आह्निकं संगृह्यते । तत्र मनुः—
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

End:

दारुमयानां पात्राणामुच्छिष्टसमन्वारब्धानामवलेखनम् । उच्छिष्टलेपोपहतानामवतक्षणमिति । मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः । मृन्मयानां पात्राणामीदृगुपहते पुनर्दहनाच्छुद्धिः ।

Colophon:

आह्निकं शयनान्तं समाप्तम् ।

हरिः ॐ । शुभमस्तु । गुरुभ्यो नमः । शिवाय नमः ।
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
सद्गुरुभ्यो नमः । मङ्गलं भवतु ।

Author—Vaidyanātha Dīkṣita.

Remarks—This Ms. contains the Āhnikakāṇḍa which forms the second part of the Smṛtimuktāphala. This has been printed in Grantha characters at Kumbhakonam But the readings in the Dravyaśuddhiprakaraṇa in it differ much from those in the same portion in this Ms.

॥ स्मृतिमुक्ताफलम् ॥

81. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf Size—18 × 1½ Leaves—100 10 lines per page and 58 letters per line Script—Tamil Grantha No of Granthas—3625 Incomplete

Subject—Prescription of time, auspicious or otherwise, for the performance of the rites of expiation

Beginning

अथ कालो निरूप्यते । स च कर्मण्यङ्गभूतः ।

तदाह गार्ग्यः—

"तिथिनक्षत्रवारादिसाधनं पुण्यपापयोः ।

प्रधानगुणभावेन न स्वातन्त्र्येण ते क्षमाः ॥" इति ॥

व्यासोऽपि—

"यत्तिथौ यत्र नक्षत्रे वारे यत्र च यद्यथा ।

विहितं वा निषिद्धं वा पालयंस्त्रिदिवं व्रजेत् ॥

अपालयन्पुनर्मोहादपवित्रं पदं व्रजेत् ।" इति ।

काल ए[व?]कोऽप्युपाधिभेदादनेकप्रकारः । तथाच गार्ग्यः ....

End:

—"यत्र यावत्संख्यया प्राजापत्यान्यावर्तनीयानि भवन्ति । तत्र तावत्संख्यया गोदानादीन्यावर्तनीयानि । तदपि चतुर्विंशतिमते दर्शितम्—

जन्मप्रभृति पापानि बहूनि विविधानि च ।

अर्वाक् तु भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत् ॥

प्रत्याम्नायो गवां देयः साशीतिर्धेनिनां [ना?]शतम् ।

तथाष्टादशलक्षाणि गायत्र्या वा जपेद् बुधः ॥ इति ॥

Colophon:

इति स्मृतिमुक्ताफले कालनिरूपणं नाम पञ्चमः परिच्छेदः । हरिः ॐ । शुभमस्तु ।

कृत्कृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीमद्गुरुभ्यो नमः । अविघ्नमस्तु ।

इति श्रीवैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले प्रायश्चित्तनिरूपणं नाम षष्ठः परिच्छेदः समाप्तः । हरिः ॐ । शुभमस्तु ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

मङ्गलं भवतु । श्रीसद्गुरुभ्यो नमः । श्रीगणेशाय नमः ।

Author—Vaidyanātha Dīkṣita.

Remarks—The Ms. comprises the Tithinirnaya-kāṇḍa Ff. 71 to 100 and Prāyaścittakāṇḍa, Ff. 1 to 70. The two kāṇḍas were evidently misplaced after transcription.

॥ स्मृतिमुक्ताफलम् ॥

82. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—18″ × 1⅞″. Leaves—231. About 11 lines per page and 52 letters per line. Script—Tamil Grantha. No. of Granthas—8100. Incomplete.

Subject—The rites concerning the Śrāddha etc., (Śrāddhakāṇḍa).

Beginning:

"शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

(श्रु ?) श्रितरामपदाब्जेन वैद्यनाथविपश्चिता ।
स्मृतीनां सारमालोच्य श्राद्धकाण्डं वितन्यते ॥

स्नात्वा कर्माणि कुर्वीतेति स्मरणात् स्नातस्यैव प्रायश्चित्तकर्मण्यधिकाराद् वारुणस्नानेऽशक्तो मुमूर्षुः ब्राह्मादिस्नानमाचरेत् । तदाह योगयाज्ञवल्क्यः—

असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः ।
स्नानान्येतानि तुल्यानि मन्त्रादीनि यथाबलम् ॥" इति ॥

End:

'श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागमः ।' इति ।

नामानि देवदत्तयज्ञदत्तादीनि । मन्त्राः 'पृथिवी ते पात्रमि'-त्यादयः । आदेशाः इदमन्नादिकममुष्मै भवत्वित्येवमादिनिर्देशाः । पुष्पं अवान्तरफलम् । (ब्रह्म)समागमः ब्रह्मप्राप्तिः । परमफलं प्रोक्तमित्यर्थः ।

कालेऽन्यथागतं पात्रे विधिना प्रतिपादितम् ।
प्राप्नोत्यन्नं तथा दत्तं जन्तु(लं?) र्यत्रोपतिष्ठते ॥
यन्नाम्ना पातयेत् पिण्डं तं नयेद् ब्रह्म शाश्वतम् ॥ इति ॥

Colophon:

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले श्राद्धनिरूपणं नाम चतुर्थः परिच्छेदः । हरिः ॐ । शुभमस्तु । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः । वेदव्यासाय नमः । त्रिपुरसुन्दर्यै नमः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

श्रीमद्गणेशाय मङ्गलं भवतु ।

Author—Vaidyanātha Dīkṣita.

Remarks—The first fourteen leaves are numbered alphabetically and the remaining ones numerically.

॥ स्मृतिमुक्ताफलम् ॥

83. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—183. 10 lines per page and 39 letters per line. Script—Tamil Grantha. No. of Granthas—4450. Incomplete.

Subject—Treatment of rituals like the Pāṇihōma etc.

Beginning:

दक्षिणाग्न्यसन्निधाने पाणौ होमः कर्तव्यः । तथाहि स्मृत्यन्तरम्—

हस्तेऽग्नौ करणं कुर्यादग्नौ वा साग्निको द्विजः । इति ।

साग्निकः सर्वाधानविहिताग्निः दक्षिणाग्न्यसन्निधाने हस्ते वा लौकिकाग्नौ वा अग्नौ करणं कुर्यादित्यर्थः । अन्यत्रापि प्रवासादिना दक्षिणाग्न्यसम्भवे लौकिकाग्न्यादिपक्षौ पूर्वोक्तन्यायादवगन्तव्यौ । लौकिकाग्नेस्तु तादृशविशेषानवगमात् पाणिना सह समविकल्प एव ।

End—Same as No. 82.

Colophon :

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले श्राद्धनिरूपणं नाम चतुर्थः परिच्छेदः । हरिः ॐ । शुभमस्तु । श्रीसाम्बशिवाय नमः । श्रीगुरुभ्यो नमः । श्रीवेदव्यासाय नमः । श्रीत्रिपुरसुन्दर्यै नमः ।

Author—Vaidyanātha-Dīkṣita.

Remarks—The work stipulates the performance of Pāṇihoma in the absence of Dakṣiṇāgni.

॥ स्मृतिमुक्ताफलम् ॥

84. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—$12\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—210. 7—8 lines per page and about 36 letters per line. Script—Tamil Grantha. No. of Granthas—3350.

Subject—Same as No. 81. (Śrāddhakāṇḍa upto the beginning of Pāṇihoma).

Beginning—Same as No. 82.

End :

पूर्वोक्ताभिप्रायेण वायुपुराणेऽप्युक्तम्—

आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः ।
अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये ॥ इति ॥

अस्यायमर्थः—अग्नौ करणे होमार्थं गृह्याग्न्यभावे दक्षिणाग्निं लौकिकाग्निं वाहृत्य होमकर्मसिद्धये जुहुयादिति । अत्र दक्षिणा-

भिपक्षस्य प्रवासादिना असम्भवे लौकिकाग्निपक्षः । तस्योपदेशातिदेशरूपप्रमाणद्वयाविगतदक्षिणाग्न्यबाधकत्वेनागत्याश्रयणीयत्वात् । अत एव प्रयत्नतो दक्षिणाग्निमाहरेत्युक्तम् ।

Colophon—Nil.

Author—Vaidyanātha Dīksita.

Remarks—The previous No. is a continuation of this Ms.



॥ स्मृतिमुक्ताफलम् ॥

85. SMṚTIMUKTĀPHALAM.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—28. 10—11 lines per page and 62 letters per line. Script—Tamil Grantha. No. of Granthas—1080. Incomplete.

Subject—Asapiṇḍadahana and the Saṃskāra of one unheard of for a long time.

Beginning:

..................रयेद् द्विज इति । पितामहश्च—

अकृत्वा वपनं यस्तु वत्सरान्ते सापिण्डनम् ।
कुर्याद्यदि पुनः कार्यमित्युवाच पितामहः ॥ इति ॥

अत्र गर्भवतो वपननिषेधः स्मर्यते—

पित्रोः संवत्सरादर्वाक् सपिण्डीकरणं यदि ।
गर्भिण्यां न तु भार्यायां तच्छेपं धारयेद् द्विजः ॥ इति ॥

End:

अत्र विज्ञानेश्वरः—

न ह्यत्र देवदत्तादय एव श्राद्धकर्मणि संप्रदानभूताः पित्रादिशब्दैरुच्यन्ते । किन्तु अधिष्ठातृवस्वादिदेवतासहिता एव । यथा देवदत्तादिशब्दैर्न शरीरादिमात्रं नाप्यात्ममात्रम् । किन्तु शरीरविशिष्टा...... ।

Colophon—Nil.

Author—Vaidyanātha Dīkṣita.

Remarks—The leaves are numbered from 31 to 201 but the actual number of those extant is only 28. Two leaves in the middle dealing with Piṇḍadāna are written in a different hand.



॥ पुराणम् ॥

॥ अध्यात्मरामायणम् ॥

86. ADHYĀTMARĀMĀYAṆAM.

Substance—Palm leaf. Size—$12\frac{3}{4}" \times 2"$. Leaves—144. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3500. Incomplete.

Subject—The story of Rāma, the seventh incarnation of Viṣṇu, laying special emphasis on the spiritual and theological phases of his life.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु । श्रीरामचन्द्राय नमः ।

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रे हतराक्षसः पुनरगाद् ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
मायाश्रयं विगतमायमचिन्त्यमूर्तिम् ।
आनन्दसान्द्रममलं निजबोधरूपं
सीतापतिं विदिततत्त्वमहं नमामि ॥

पठन्ति (ये) नित्यमनन्यचेतसः
शृण्वन्ति चाध्यात्मिकसंज्ञितं शुभम् ।
रामायणं सर्वपुराणसम्मतं
निर्धूतपापा हरिमेव यान्ति ते ॥

अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद् भवबन्धमुक्तिम् ।
गवां सहस्रायुतकोटिदानात् फलं लभेद्यः शृणुयात्स नित्यम् ॥
कैलासाग्रे कदाचिद्रविशतविमले मन्दिरे रत्नपीठे
संविष्टं ध्याननिष्ठं त्रिणयनमभयं सेवितं सिद्धसंघैः ।
देवी वामाङ्कसंस्था गिरिवरतनया पार्वती भक्तिनम्रा
प्राहेदं देवमीशं सकलहितकरं वाक्यमानन्दकन्दम् ॥

देवी—

नमोऽस्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरोऽसि ।
पृच्छामि तत्त्वं पुरुषोत्तमस्य सनातनत्वं च सनातनोऽसि ॥

End:

अध्यात्मरामायणमेतदद्भुतं
वैराग्यविज्ञानयुतं पुरातनम् ।
पठन्ति गायन्ति लिखन्ति ये नरा-
स्तेषां भवेऽस्मिन्न पुनर्भवो भवेत् ॥
आलोक्याखिलवेदराशिमसकृद्यत्तारकं ब्रह्म त-
द्रामो विष्णुरहस्यमूर्तिरिति यो विज्ञाय भूतेश्वरः ।
उद्धृत्याखिलसारसङ्ग्रहमिदं संक्षेपतः प्रस्फुटं
श्रीरामस्य निगूढतत्त्वमखिलं प्राह प्रियायै भवः ॥

Colophon:

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकाण्डे षोडशः सर्गः । श्रीरामचन्द्राय नमः । श्रीकृष्णाय नमः । नमः शिवाय । नमः शिवाय । नमः शिवाय ।

Author:

Remarks—The style of this work is comparatively modern.

॥ अध्यात्मरामायणम् ॥

87. ADHYĀTMARĀMĀYAṆAM.

Substance—Palm leaf. Size—13″×2″. Leaves—125. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3500. Incomplete.

Subject etc.—Same as No. 86.

Remarks—The following verse occurs at the end of the colophon:

വീഴക്ഷരം വരിപിണക്കം വള്ളി പുള്ളി
ദീർഘാദിവീഴ്ച ചിലബിന്ദു വിസർഗ്ഗവീഴ്ച
ഇത്യാദി പുസ്തകമെഴുത്തിൽ വരുന്ന ദോഷം
ബുദ്ധിഭ്രമാദ്, ബുധജനങ്ങൾ സഹിച്ചുകൊൾക.

ശ്രീ ഗുരവേ നമഃ.

सानन्दरूपं सकलप्रबोधमानन्ददानामृतपारिजातम् ।
भौतीकपद्मेषु(?) रविस्वरूपं प्रणम्य(പു?ഇ)ബ്ബത്തെഴ-
[मार्यपादम्

श्रीनीलकण्ठपरमगुरवे नमः । श्रीकेरळगुरवे नमः । शिवाय नमः । ഗുരവേ തുണെക്ക.

॥ अनन्तशयनमाहात्म्यम् (ब्रह्माण्डगतम्) ॥

88. ANANTAŚAYANAMĀHĀTMYAM.

Substance—Palm leaf. Size—15″×2″. Leaves—12. 13 lines per page and 78 letters per line.

Script—Malayāḷam. No. of Granthas—750. Complete.

Subject—Sthalapurāṇa, appertaining to Ananta-śayanam (Trivandrum) together with a glorious description of Śrī Padmanābha, the presiding deity.

Beginning:

अविघ्नमस्तु ।

अनन्त(शयन ? भोग)पर्यङ्के शयानं क्षीरसागरे ।
नौमि सुन्दरराजं तं श्रीवराहतनुं हरिम् ॥
सुपुण्ये (नै)मिशारण्ये ऋषयः शौनकादयः ।
सत्रं समासत समाः सहस्रं हरितुष्टये ॥
प्रातःसवनहोमान्ते कदाचिच्छौनकादयः ।
सत्कृतं सूतमासीनं पप्रच्छुरिदमुत्सुकाः ॥

ऋषयः—

व्यासशिष्य ! महाप्राज्ञ ! सर्वशास्त्रार्थकोविद ! ।
शुश्रूषूणामुत्सुकानामेतदाख्याहि नः शुभम् ॥
अनन्तशयनं नाम दक्षिणाम्बुनिधेस्तटे ।
यत्र (सूत ? शेते)स्वयं विष्णुर्दर्शनान्मुक्तिदो नृणाम् ॥
अनन्तभोगपर्यङ्के श्रीभूनीलानिषेवितः ।
इत्युक्तं तु त्वया पूर्वं ब्रह्मनाख्यानविस्तरे ॥

End:

सूतं पौराणिकाः सर्वे पूजयाञ्चक्रुरञ्जसा ।
श्रुतमेतत्त्वया सूत ! पुण्यं हरिकथामृतम् ॥

कृतार्थाः स चिरं जीव हरिलीलामृतप्रद! ।
इति तं नन्दयित्वाथ ते च सर्वे महर्षयः ॥
माध्याह्नसवनार्थाय प्रोद्यतास्तेऽभवन्मुदा ।

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्माण्डगोलविस्ताराख्याने अनन्तशयन-माहात्म्ये एकादशोऽध्यायः ।

लिखितं पद्मनाभस्य चरितं परमद्भुतम् ।
अनन्तपद्मनाभस्य नरसिंहस्य तुष्टये ॥
अनन्तशयनमाहात्म्यं समाप्तम् ।
श्रीपद्मनाभो रक्षतु ।

Author—Vedavyāsa.

Remarks—This work dealing with the Śrī Padmanābha and Śrī Varāha temples is a portion of Brahmāṇḍapurāṇa. There is a temple, south-west of Śrī Padmanābhasvāmikṣetra, dedicated to Varāha, the 3rd incarnation of Viṣṇu.



॥ अमृतकतकम् (रामायणव्याख्या) ॥

89. AMṚTAKATAKAM.

Substance—Palm leaf. Size—14" × 2". Leaves—142. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3850.

Subject—A clear and correct exposition of Rāmāyaṇa as suggested by the word Kataka (*strychnos potatorum*), the well-known purifier of water.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
श्रीनिधये नमः।

कालहस्तीशमेकाम्रनाथं वेदपुरीश्वरम्।
स्वमनःप्राणदेहान्तःस्थितान् त्रीन् ब्रह्मणो भजे॥
हैरण्यगर्भं यत्तेजः श्रीप्रजेशावतारितम्।
चतुर्मुखचतुर्व्यूहं त्रिपदार्थं सदा भजे॥
अम्बात्र्यष्टाक्षरोल्लासत्र्यष्टश्लोकसहस्रकम्।
महापीठात्मकाण्डं यत् तद्रामायणमाद्रिये॥

असङ्गतव्याकृतिपांसुपङ्किलं।
रामायणं तीर्थसमुद्धृतामृतम्॥
योगीन्द्रवाणीकनकाद्रिपङ्किलं
सर्वोपकारक्षममस्तु सर्वदा॥

भो भो किमिदं रामायणं व्याख्येयमुत न। यदि प्रयाजनं, व्याख्येयं, यदि नो न व्याख्येयम्। प्रयोजनमप्यैहिकमामुष्मिकं वा स्यात्। न तावत् कृषिवाणिज्यसेवादिना धनधान्यादिवदैहिकं किञ्चित् प्रयोजनं रामायणपाठात् पश्यामः। नाप्यामुष्मिकं, निम्तितीर्षुः स्वरारुरुक्षुः भवान्मुमुक्षुर्वा रामायणमा .... यादिति श्रुतिः

स्मृतिर्वास्ति ....

.... उक्तप्रयोजनस्य काव्यस्य च साध्यसाधकभावः सम्बन्धः । एवं समग्रप्रवृत्त्यङ्गोपेतं रामायणं व्याख्येयं प्रतिष्ठितम् ।

End:

अन्तरित्यादि—तस्य रामस्यान्तर्ज्ञातमपि हृदयं हार्दाभिप्रायम् । मैथिली हृदा सहृदयेन ज्ञात्वा भूयोऽभ्यधिकं व्यक्तं विशेषकेण एवमेवामिति विविच्याख्याति स्म । एवं सोऽपि सीतायाः देवताभिः सगेति मानुषावतारेऽपीति शेषः । अत एव श्रीरूपेत्युपमापि श्रिया एव सत्याः । अत एवोत्तरश्लोकोपमाप्युभयोः ।

Colophon:

इति श्रीमद्रामायणामृतकतकटीकायां बालकाण्डे सप्तसप्ततिः सर्गाः । बालकाण्डः समाप्तः ।

यः सर्वोपनिषद्व्याख्यां मङ्गलाभरणां व्यधात् ।
ब्रह्मजिज्ञास(ता?ते) तस्मै नमो माधवयोगिने ॥
राममिन्दीवरश्यामं राजीवायतलोचनम् ।
ज्याघोषनिर्जितारातिं जानकीरमणं भजे ॥

Author—Yōgindra. He extols Kālahastīśa, Ekāmranātha and Vedapurīśvara. It is probable that he was a Śaiva.

Remarks—The commentary begins with the discussion on the object and usefulness of the work.

॥ अमृतकतकम् (रामायणव्याख्या) ॥

90. AMṚTAKATAKAM.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—146. 10 lines per page and 8 letters per line. Script—Tamil Grantha. No. of Granthas—7300. Incomplete.

Subject—Same as No. 89.

Beginning:

पुरुषाणाम् । अन्तरं तारतम्यं, तद्विवेके कोविदम् । यथान्यायं यथोचितं कर्तुं विचक्षणम् । तथा उत्तरार्धस्यैव विवरणं सादित्यादि । ...... संग्रहपूर्वं ... गमनपूर्वं प्रकर्षेण । ...

End:

दुर्लभं दुष्करम् । इति यावत् । कश्चिद् देवोऽपि किञ्चिदेवात्रत्येषु... ... ...
... ...
... ...दत्तवान् । एवं मन्त्रामिव मन्त्रदैवतान्यपि ।

Colophon:

इति श्रीमद्रामायणामृतकतकटीकायाम् अयोध्याकाण्डे प्रथमः सर्गः ।

Author—Same as No. 89.

Remarks—This Ms. containing the commentary on Bāla, Ayodhya and Āranya (upto 74 *sargas* only) kāṇḍas is very old and damaged. The leaves are misplaced and hence the work begins from Ayodhyākāṇḍa.

॥ अमृततरङ्गिणी (भागवतव्याख्या) ॥

91 AMRTATARANGINĪ
commentary on the Bhāgavata

Substance—Palm leaf Size—21 × 2″ Leaves—64.
10 lines per page and 80 letters per line
Script—Malayālam No of Granthas—3200
Incomplete

Subject—An exposition of Śrīmadbhāgavata in lucid and flowing style

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

चिदेकरसनिर्भेदसदानन्दसुधार्णवः ।
जयत्यनन्तनिभृतप्राणवल्लभो वल्लवीसुतः ॥

गीर्वाणमौलिमणिघट्टितपादुकाय
गोपाङ्गनास्तनललामपदाम्बुजाय ।
श्रीपुण्डरीकमुनिमण्डलचित्तवृत्ति-
क्रीडामृगाय हरयेऽस्तु नमोऽच्युताय ॥

कररुहकुलिशैर्द्दीपिता चरणाम्बुजनखरकान्तिभिर्मज्जताम् ।
हृदयग्रन्थीन् भिन्दन् मनसि नृसिंहः समुल्लसतु ॥

यदङ्घ्रिरेणुर्नीजानि जनैरस्तानि मूर्धसु ।
सद्य सुरद्रुमायन्ते श्रीधर स श्रियेऽस्तु नः ॥

उल्लसति लोचनार्धं जगदपदानादि जुह्वतो यस्य ।
प्रथमाहुतिर्मनोजः स जयति देवः पुरां भेत्ता ॥

यशोभिर्यो विश्वं विशदयति दुग्धाब्धिधवलै-
र्यतः सूक्तीर्मुक्ता इव दधति कर्णेषु सुधियः ।
अपाङ्गज्योत्स्नाभिर्गलति तिमिरं यस्य जगता-
मनन्तानन्दोऽन्तर्हृदि वसतु सोऽस्मत्कुलगुरुः ॥

नमः परमहंसावतंसाय शुकयोगिने ।
निस्तरङ्गनिजानन्दसुधासिन्धुविहारिणे ।
सत्यः सत्यवतीसूनोः सरसाः सूक्तिशुद्धयः ।
फलन्ति भक्तिवैराग्यज्ञानमुक्ताफलानि नः ॥

दुर्ग्राहपङ्कपदपाथसि नूत्ननाना-
भङ्गीतरङ्गिणि निगूढमहार्थरत्ने ।
अस्मिन् प्रबन्धजलधौ मुनिवल्लभस्य
धार्ष्ट्यं विमौढ्यमथवा विजिगाहिषा मे ॥

तथापि गुरुपादाब्जप्रसादोन्निद्रधीरहम् ।
श्रीमद्भागवतव्याख्यां कुर्वेऽमृततरङ्गिणीम् ॥

शास्त्रारम्भे सकलजगदन्तरङ्गरङ्गविलासिन्यामखिलोपनिषदङ्गना-जनोपचर्यमाणमनोज्ञ(प?स)देवविलासिन्यामभिमतायां देवतायां मङ्गलाय मनः प्रणिधत्ते। प्रतिपाद्यं चार्थं संक्षेपतोऽभिधत्ते "जन्माद्यस्य यत" इत्यादिना।

End :

इन्द्रियार्थ इन्द्रियगोचरो मूर्तिविशेषो यस्य स तथोक्तः । विहिताञ्जलिः कृताञ्जलिः । आस्थामन्वतिष्ठत् । रिक्थं दायमाददते इति रिक्थादाः पुत्राः तेषां रिक्थादानां मध्ये शुश्रूषमाणः परिचरन् शीलेन शुभेन स्वभावेनाथ चरणेन वा ... ...

Colophon :

इति श्रीभागवतव्याख्यायाम् अमृततरङ्गिण्यां
द्वितीयस्कन्धेऽष्टमोऽध्यायः ॥

Author—Lakṣmīdhara, son of Nṛsimha, as seen from the colophons of No. 92. His family preceptor was Anantānanda.

O. C. mentions one Lakṣmīdhara, son of Nṛsimha. Nāmacintāmani, Nyāya Bhāskara and Bhagavannāmakaumudí are attributed to him in it (vide p. 538). Amṛtataraṅgini is referred to as a work of Jñānapūrnamuni in the Triennial Catalogue of Mss., Madras (vide page *4009*, Vol. III, Part I C. 1916—1919). Jñānapūrnamuni is the scribe's name as indicated in the colophon thereof (*Ibid* p. *4010*). But in the Authors' Index (Vide p. LX, Vol. III, Part I A) it is ascribed to Laksmīdhara. The following verse *in the Bhagavannāmakaumudi*,

येन भागवतव्याख्या कृतामृततरङ्गिणी ।
अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥

states that the author of Amṛtataraṅgiṇī Advaitamakaranda and Nāmakaumudī is one and the same person. The colophon,

'श्रीमदनन्तानन्दरघुनाथपादपद्मोपजीविनः लक्ष्मीधरस्य"

found in that work discloses that Anantānandaraghunātha was Lakṣmīdhara's preceptor. (Vide page *1878* *T. C. M. M.*

1913—1916, Vol. II, Part I). It remains to be ascertained whether the author of Amṛtataraṅgiṇī is identical with Lakṣmīdhara who composed Bhagavannāmakaumudī.

Remarks—The commentary is clear and lucid. It is based on the *Advaita* system.

॥ अमृततरङ्गिणी (भागवतव्याख्या) ॥

92. AMṚTATARAṄGIṆĪ.

Substance—Palm leaf. Size—$18\frac{1}{2}'' \times 2''$. Leaves—200. 7—9 lines per page and 58 letters per line. Script—Malayāḷam. No. of Granthas—5800. Incomplete. (Skandhas 1—3 only).

Subject—Beginning—Same as No. 91.

End:

विदेहकैवल्यमुपेयुषी प्राप्ता । मर्त्यस्य भावो मार्त्यं पूयादिरूपेण परिणामायोगेन विधुतं मार्त्यं यस्य तत् योगविधुतमार्त्यं मर्त्यशरीरम् । प्रागुदीचीमीशानाधिष्ठितामास्ते अद्यापीत्यर्थः । साङ्ख्याचार्यैः पञ्चशिखादिभिरात्मयोगगुह्य . . . . . । आत्मयोगश्च तद् गुह्यमिति ॥

Colophon:

इति श्रीभागवतव्याख्यायां तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः । श्रीवासुदेवाय नमः । नमः शिवाय नमः । विष्णवे नमः । इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदनन्तानन्दपूज्यपादपद्मोपजी-

विनः श्रीमन्नृसिंहसूनोर्लक्ष्मीधरस्य कृतौ श्रीभागवतव्याख्यायाममृततरङ्गिण्यां द्वितीयस्कन्धे दशमोऽध्यायः।

Author—Remarks—Same as No. 91.

॥ अमृततरङ्गिणी (भागवतव्याख्या) ॥

93 A. AMṚTATARAṄGIṆĪ.

Substance—Palm leaf. Size—17″ × 2″. Leaves—149. 9 lines per page and 68 letters per line. Script—Malayālam. No. of Granthas—5700. Incomplete.

Subject—Beginning—End—Same as No. 92.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदनन्तानन्दपूज्यपादपद्मोपजीविनः श्रीमन्नृसिंहसूनोर्लक्ष्मीधरस्य कृतौ श्रीभागवतव्याख्यायाममृततरङ्गिण्यां तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः। समाप्ता चेयममृततरङ्गिणी तृतीयस्कन्धावसाना। शुभमस्तु।

Author—Same as No. 91.

Remarks—This Ms. contains *Skandhas* 1 to 3.

॥ अमृततरङ्गिणी भागवतव्याख्या (एकादशस्कन्धः) ॥

93 B. AMṚTATARAṄGIṆĪ
(Ekādaśaskandha).

Substance—Palm leaf. Size—17″ × 2″. Leaves—40,

9 lines per page and 48 letters per line. Script—Malayalam. No. of Granthas—1480.

Subject—Same as No. 91.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

आविष्कृतसर्वशक्तेः सर्वावताराशिरोमणेर्मूर्तस्य ब्रह्मणः श्रीकृष्णस्य माहात्म्यं पूर्वस्मिन् स्कन्धे सविस्तरमभिधायास्मिन् स्कन्धे तदुपासनशुद्धान्तःकरणमणेरधिगम्यस्य परस्य पूर्णस्य ब्रह्मणः स्वरूपं प्रतिपादयति।

End:

सात्त्विकान् पदार्थानुपास्त इति सात्त्विकोपास्ता तस्य भावः तत्त्वया सात्त्विकानां पदार्थानां सेवनेन सत्त्वस्योद्भवो भवतीत्यर्थः। उपास्तेः कर्तरि क्विपि कृते तस्य लोपे भावे तप्रत्ययो द्रष्टव्यः। ततो धर्मः प्रवर्तत इत्युक्तानुवादः। स च धर्मः सकृदनुष्ठितः प्राचीनमघं सर्वं हन्यात्। अभ्यस्यमानस्तु सत्त्ववृद्धिरनु....

Colophon:

इति श्रीभागवतव्याख्यायाममृततरङ्गिण्यामेकादशस्कन्धे द्वादशोऽध्यायः।

Author—Same as No. 91.

Remarks—The commentary comes up to the third verse,

"धर्मो रजस्तमो हन्यात् सत्त्ववृद्धिरनुत्तमः।
आशु नश्यति तन्मूलो ह्यधर्म उभये हते॥"

in the 13th chapter of the 11th Skandha. This is a part of the previous Ms.

॥ अमृततरङ्गिणी (श्रीभागवतव्याख्या) ॥

94. AMṚTATARAṄGIṆĪ.

Substance—Palm leaf. Size—13″×2½″. Leaves—295. 9 lines per page and 44 letters per line. Script—Malayālam. No. of Granthas—7500. Incomplete.

Subject—Same as No. 91.

Beginning:

तथा च ब्रह्मणो भेदं प्रतिपादयति श्रुतिः—स एतमेव पुरुषं ब्रह्म ततमपश्यत् । स यश्चायं पुरुषे यश्चासावादित्ये स एकः । तत्त्वमसि, अहं ब्रह्मासि, अयमात्मा ब्रह्म सर्वानुभूः । एष त आत्मान्तर्याम्यमृतः इत्याद्या । तत्र सतः परस्य परमात्मनो जात्यप्रसिद्धत्वात् पदार्थाप्रतिपत्तौ वाक्यार्थप्रतिपत्त्ययोगात् तटस्थस्वरूपलक्षणाभ्यां परशब्दार्थं साधयति—जन्माद्यस्येत्यादिना ।

End:

सांख्याचार्यैः पञ्चशिखादिभिः आत्मयोगगुह्यम् आत्मविषययोगेषु गुह्यं रहस्यम् । आत्मयोगश्च तद् गुह्यमिति वादि०

Colophon—Author—Same as No. 91.

Remarks—The Ms. is very old and damaged. The commentary extends from *Skandhas* 1 to 3.

॥ अमृततरङ्गिणी (भागवतव्याख्या) ॥

95. AMṚTATARAṄGIṆĪ.

Substance—Palm leaf. Size—21″ × 2″. Leaves—134. 9 lines per page and 100 letters per line. Script—Malayāḷam. No. of Granthas—7500. Subject—Same as No. 91.

Beginning:

...... दुत न केवलं ज्ञानोद्देशेन विहितानां तदर्थमनुष्ठितानामेव तेषां ज्ञानसाधनत्वम् । अपि तु स्वर्गाद्यर्थमनुष्ठितानामपि पापक्षयद्वारेण ज्ञानोपकारकत्वम् । उपवासादिना पापहननं ब्रह्मणः सायुज्यप्राप्तिश्च श्रूयते ।

"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः" इति स्मृतेश्च।

उक्तं हि बृहद्वार्तिके—

"काम्ये विशुद्धिरस्त्येव भोगसिद्ध्यर्थमेव वा ।
विड्वराहादिदेहेषु न ह्यैन्द्रं भुज्यते फलम् ॥" इति ॥

इयांस्तु विशेषः—ज्ञानार्थमनुष्ठितानि कर्माणि श्रवणादीनि ज्ञानसाधनानि आपद्यपि ज्ञानमुत्पादयन्ति । इतराणि तु सत्सु श्रवणादिषु तेषां साहाय्यं भजन्ते । प्रातर्हुतं प्रातर्होमः । भावे क्तः । तेन हुताः अग्नयो यैः ते प्रातर्हुतहुताग्नयः । अधिकरणे कर्मत्वोपचारः ।

End:

अमृते न निषेधसिद्धिरिति । यद्वस्तु विना ग्राह्यत्वं निषेधस्य न सिद्धिः निरवधिकनिषेधानुपलम्भेः । तन्निषेधावधिभूतं

वस्तु निषेधसामर्थ्यात् सिध्यतीत्यर्थः । ननु सुप्तयादयो नात्मधर्माः । कथं तर्हि सुप्तोऽहमित्यादिव्यपदेश इत्याशङ्कयोपाधिवशाद् इत्याह— सत्त्वमिति । आदौ सुषुप्तौ जीवं प्रत्यगात्मानं सत्त्वं रजस्तम इति गुणभेदेन त्रिवृत् त्रिधा वर्तमानः । एकमव्यक्तमिति वदन्ति । तमेव स्वप्नावस्थायां सूत्रं सूत्रवत् सर्वानुस्यूतम् । समष्टिव्यष्टिरूपो महान् बुद्धिरिति वदन्ति । तमे.........

Colophon:

ग्रामात् काननमभ्युपेत्य विजनं भीमं तपः कुर्वते
तस्मै सात्वतपुङ्गवाय हरये कुर्यां नमस्यां सदा ॥
उक्ताः परे गतैः स्कन्धैरवताराः परात्मनः ।
वासुदेवावतारोऽस्य दशमेन प्रकाश्यते ॥
अध्यायो ह्यत्र नवतिस्त्रिविधं तस्य चेष्टितम् ।
गोकुले मथुरायां च द्वार्वत्या चोत्थितं क्रमात् ॥
अध्यायैस्तु चतुश्चत्वारिंशतोक्तं व्रजे कृतम् ।
सप्तभिर्मथुरोद्भूतं द्वारकाया कृतं परैः ॥
एवमीशकथा स्कन्धेनानेन प्रत्युदीरिता ।
समग्रैश्वर्यसम्पन्नो देवकीनन्दनो यतः ॥
प्राकट्यबाल्यपौगण्डकैशोरप्रौढिभेदतः ।
पञ्चधा गोकुलकृतं तच्च कं(स)वधादिकम् ॥
चतुर्भिर्दशभिः शङ्कैः सप्तभिर्नवभिः क्रमात् ।
कंसभीर्भाविनः कृष्णाद् देवक्या तस्य सम्भवः ॥
जातस्य गोकुलप्राप्तिर्निद्रोक्तात्कंसभीः पुनः ।
व्रजे जन्मोत्सवस्तस्य तेनाथो पूतनावधः ॥
अनस्तृणावर्तवधस्तस्य नामानि चापरम् ।
दामोदरत्वनटनं यमलार्जुनभञ्जनम् ॥
वधश्च वत्सबकयोस्तथाघासुरभोगिनः
वत्सचोरब्रह्ममोहो ब्रह्मणा स्तवनं हरेः ॥
रामेण धेनुकवधः कालियस्य स्वय दमः ।
व्रजस्य रक्षणं दावात् प्रालम्बो हलिना वधः ।
दावाद् गोत्राणमैषीके प्रावृट्च्छरदृतुश्रियौ ।
गोप्यानन्दो वेणुरवाद् गोपीनर्मोम्बिकार्चने ॥

यज्ञपत्नीप्रसादश्च भङ्ग इन्द्रमखस्य च ।
गोवर्धनस्योद्धरणं गोपानां देवतामतिः ॥
कृष्णाभिषेको गोदेवैर्वरुणान्नन्दमोक्षणम् ।
सम्भोगो निशि गोपीभिर्विप्रलम्भो लसद्वने ॥
गोपीविरहगीतानि ताभिः सञ्जल्पनं हरेः ।
रासक्रीडा च ललिता मोक्षो विद्याध्रयक्षयोः ॥
व्रजस्थगोपिकागीतं हतेऽरिष्टे च कंसभीः
केशिव्योमवधश्चैवाक्रूरयानं व्रजं प्रति ॥
निर्गमो गोकुलाद्विष्णोरक्रूरेण स्तुतिर्जले ।
कृष्णस्य मथुरालोकः कंसमल्लरणोद्यमः ॥
कृष्णेनास्येभहननं हते कंसे सुरोत्सवः ।
चतुश्चत्वारिंशादिमेऽध्यायाः कंसवधेऽङ्घ्रिभिः ॥
कृष्णस्य विद्योपादानमुद्धवस्य व्रजागमः ।
आश्वासनं च गोपीनां कुब्जाक्रूरप्रियं हरेः ॥
मल्लोऽक्रूरस्य कुरुभिर्जरासन्धपराजयः ।
यवनस्य वधोऽध्यायैः सप्तभिर्माथुरं यशः ॥
कृष्णेऽभिलापो रुक्मिण्या रुक्मिणीहरणं हरेः ।
रुक्मिणश्च पराभूतिः प्रद्युम्नाच्छम्बरक्षयः ॥
स्यमन्तकस्याहरणं सत्यभामासमुद्वहः ।
वधश्च तत्पितुर्हन्तुः कालिन्द्यादिपरिग्रहः ॥
भौमं हत्वा द्रुमानीतिर्वैदर्भीगर्वभेदनम् ।
बलेन रुक्मिणो भङ्गो नप्तुर्बाणेन बन्धनम् ॥
जयः कृष्णेन बाणस्य नृगस्य च विमोक्षणम् ।
हलिना यमुनाकृष्टिश्चक्रिणा पौण्ड्रकार्दनम् ॥

द्विविदस्य बलान्मृत्युः कुरुपुर्यां ततो भयम् ।
नारदस्याच्युतेहेक्षा मन्त्रो मागधपातने ॥
यात्रा पार्थमखार्थाय घातनं मगधेशितुः ।
शिशुपालवधो यज्ञे दुर्योधनपराभवः ॥
साल्वस्य युद्धं यदुभिश्चक्रिणा तस्य संहृतिः ।
नैमिशे सूतदमनं बल्कलान्तश्च सीरिणा ॥
कुचेलकृष्णसञ्जल्पः कृष्णेनास्यर्द्धिसाधनम् ।
सुहृत्सङ्गः कुरुक्षेत्रे कृष्णोद्वाहाभिवर्णनम् ॥
वसुदेवस्य यज्ञश्च मृतपुत्रप्रदर्शनम् ।
श्रुतदेवस्य चातिथ्यं त्रीशानां मूर्तितो भिदा ॥
नष्टद्विजसुतानीतिः श्रुतिभिः स्तवनं हरेः ।
कृष्णकीर्त्युपसंहार इतीदं द्वारकाकृतम् ॥
ऊनचत्वारिंशतोक्तमध्यायैः पादवर्णितं ।
अत्रादौ भगिनीं तावन्नयतो भवनं प्रति ॥
कंसस्य कथ्यते भीतिः कृष्णात् तद्गर्भमेष्यतः ॥

जातो गतः पितृगृहादिति श्लोकद्वयेन नवमान्ते संगृहीतं कृष्णचरितं विस्तरतः श्रोतुकामो राजा पृच्छति कथित इति ।

End :

सेतुबन्धैर्हस्तादिना जलप्रवाहनिवारणैर्मर्कटोत्प्लवनादिभिः मर्कटा नामिवोत्प्लवनमुल्लङ्घनमादिर्येषां तैः यद्यप्येते प्रागनुक्तास्तथाप्युपलक्षणन्यायेनोक्ता एवेति भाव । ब्रह्मणो भग...तद्वर्णिताद् भानपरोऽयमध्यायः ।

Colophon :
Author—Same as No. 114.

Remarks—This commentary elucidates the first 14 chapters in the 10th *Skandha*.

॥ कृष्णपदी (भागवतव्याख्या) ॥

125. KṚṢṆAPADĪ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—115. 8 lines per page and about 48—50 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—Same as No. 114.

Beginning:

ह सुरोत्तमौ इति। यन्नन्देनोक्तं तत् सत्यमित्याह—एताविति।
हिरवधारणे। रामो मुकुन्दश्चेत्येतौ। प्रधानः पुरुषः परमात्मैव।

End:

त्वच्छासनातिलङ्घिनः पुंसः स्पन्दितुमशक्यत्वादिति भावः।
अथ स्वार्थे कृतयापनस्य देवस्य तेजोहानिमाशङ्क्याह—नहीति।
एकस्य सजा

Colophon:

इति दशमे त्रिसप्ततितमः।

Author—Same as No. 114.

Remarks—The commentary comprises chapters 46—74, Skandha 10. The leaves are numbered alphabetically beginning with अ.

॥ कृष्णपदी (भागवतव्याख्या) ॥

126. KṚṢṆAPADĪ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—13¾" × 1¾". Leaves—57. 7—9 lines per page and 48 letters per line. Script—Malayālam. No. of Granthas—1500.

Subject—Same as No. 114.

Beginning :

तीयरहितस्यापि विजातीयरहितस्यापि विजातीयरहितस्य ब्रह्मणः सर्वगतस्य च परमात्मनस्ते कर्मभिः उत्कृष्टः न वर्धते हि कष्टेन ह्रसते ।

End :

विद्यां खेचरीम् । अन्वक्षाणोऽपश्यन् आग्नेयीमित्यादौ पुरीमित्यनुपज्यते । अन्योन्यविशिष्टानि च धिष्ण्यानि स्थानानि अगात् । हित्वार्थः । अलब्धद्विजसुतोऽत एवानिस्तीर्णप्रतिज्ञः अत एवाग्निं विविक्षुः प्रतिषेधता निराग्यता कृष्णेन प्रत्युक्तः तद्दर्शय

Colophon :

Author—Same as No 114.

Remarks—This is a continuation of the previous Ms. On the wooden frame is inscribed the name *Devanārāyana* denoting the King of Champakaśśeri. This may be one among the Mss. taken to Trivandrum, when King Mārttāṇḍavarma the Great (*904—933 M. E. 1729—1758* A. D.) of Travancore conquered and annexed

to the State Champakaśśeri, the present Ampalappuḷa Taluk.

॥ कृष्णपदी (भागवतव्याख्या) ॥

127. KṚṢṆAPADĪ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—14″ × 2″. Leaves—224. 10 lines per page and 48 letters per line. Script—*Malayāḷam*. *No. of Granthas—6700.*

Subject—Same as No. 114.

Beginning :

हरिः । श्रीगणपतये नमः ।

नित्यानित्यपदार्थचिन्तनपटोः स्वर्भूसुखेच्छाच्छिदः
संन्यस्ताखिलकर्मणः शमदमश्रद्धातितिक्षाजुषः ।
बन्धान्मोक्षमिहेच्छतश्च हृदये सोऽस्मीति यो भासते
शास्त्राचार्यनिजप्रसादविशदे पुंसस्तमीडे हरिम् ॥
मुक्तिरेकादशस्कन्धेऽध्यायैकत्रिंशतोदिता ।
(सायं पिहिरेधस्यादात्यशिक इति स्मृतः ।
प्राधान्येन तथाप्यस्मिन् प्रथमस्कन्धे निरूप्यते?)
तत्र कर्मज्ञाननिष्ठाभेदात् प्रकरणद्वयम् ॥
पञ्चाध्यायास्तयोराद्यं तत्राद्ये युगपत् त्रयः ।
विष्णुगुप्ते यदुकुले विप्रशापाद्विरक्तये ॥
द्वौ चतुष्टयमेकों द्वौ प्रश्नाः शेषेषु सोत्तराः ।
ज्ञातुं भागवतान् धर्मान् पुंसो मायां तदत्ययम् ॥

भक्तकर्मावतारालिमभक्तानि युगस्थितिम् ।
नव प्रश्नान्निमिश्चक्रे तानाचख्युर्नवार्षमाः ॥
सर्वकर्मार्पणं विष्णौ रागद्वेषविवर्जित ।
मिथ्यार्थदर्शनासक्तिर्विपर्ययविमर्शनम् ॥
सर्वत्रानुगतं शुद्धं वेदतन्त्राच्युतार्चनम् ।
पुरुषादिवपुर्लीलाकालचक्रपरिभ्रमः ॥
ध्यानं यागोऽर्चनं स्तोत्रमुत्तराणि नवाऽऽर्षभिः ।
धर्मे भागवतेऽभ्यासः पुंभिर्भागवतैः सह ॥
जितमायस्य धाम स्वमारोढुं भूमिकोत्तरा ।
मायाजयो धराभक्तिर्ज्ञानकर्मसमुच्चयात् ॥
अवतारकथास्तोत्रः काम्यत्यागेशकीर्तने ।
इति भूमिश्चतसृभिरध्यायानां चतुष्टयम् ॥
वसुदेवाय जायन्तेयोपाख्यानमिदं जगौ ।
मुमुक्षवे द्वारवत्यां नारदस्तद्गृहागतः ॥
विष्णोरभ्यर्थना देवैः स्वर्गमेत्युद्धवेन च ।
स्व धाम नय मेत्यूचे षष्ठे संवादकारणम् ॥
चतुर्धा त्रीनथैकं द्वौ द्वावेकं चैककं द्विधा ।
द्वौ द्विधा त्रींश्चतुर्थंकमेकमेकं च मोत्तरान् ॥
प्रश्नाञ्छेषेषु हित्वान्त्यौ समाहंलयदर्शनौ ।
सङ्गत्याग उपायस्य संसङ्गासङ्गयोः मताम् ॥
भक्तेर्ज्ञानस्य विषयासक्तौ दृष्टेऽपि दूषणे ।
हेतोर्हंससनन्दादिसंवादस्योत्तमस्य च ॥
श्रेयस्तु ध्यानयोगस्य सिद्धीनां च विभूतिवत् ।
वर्णाश्रमादिधर्मस्य ज्ञानादीनां यमादिवत् ॥

गुणदोषापवादस्य तत्त्वसंख्यान्यवस्थितेः ।
क्षेत्रक्षेत्रज्ञभेदस्य देहयोगवियोगयोः ॥
अभिमाननिवृत्तेश्च क्रियायोगस्य संसृतौ ।
अधिष्ठानस्य भक्तेश्च परस्याः सम्बुभुत्सया ॥
प्रश्नान् द्वाविंशतिं चक्रे कृष्णं प्रत्युद्धवः क्रमात् ।
हेयोपादेयनिर्धारः स्वाप्नसुप्तप्रबुद्धवत् ॥
मिथः कृष्णकथासक्ताः प्रेम्णैव हरिदासता ।
स्वसृष्टानुप्रविष्टोऽसौ रजस्सम्मिश्रसत्त्वता ॥
गुणचित्तोभयत्यागो भक्तिरव्यभिचारतः ।
अरूपचिन्तनं रूपैश्वर्यात्तु ध्येयसमानता ॥
तत्र तत्रोत्कटं सत्त्वं कर्मत्यागः शनैः शनैः ।
द्वे हेये द्वे उपादेये गुणदोषावभिज्ञिदौ ।
कर्मणि ज्ञानभक्त्योर्न सा सा सांख्यात्मकल्पनात्
स्वतःसिद्धः पुमान्नान्यन्मनोगन्त्राभिमान्यजः ।
मनःशत्रुजयः सम्यक् प्रतिमादिष्वजार्चनम् ॥
पुमान् प्रकृत्योपगूढो विश्वमूर्तीशपूजनम् ।
पादैर्द्वाविंशतिर्विष्णोरुत्तराण्युद्धवं प्रति ॥
गुरुभिः पञ्चविंशत्या लोकतत्त्वपरीक्षणे ।
हीनमध्योत्तमैरष्टनवाष्टाभिस्त्रिधैकधा ॥
आत्मतत्त्वपरीक्षायां चतुर्धेत्याद्यमुत्तरम् ।
ऋण्यनृण्याश्रमद्वन्द्वभेदेन द्वादशं द्विधा ।
व्यवस्थेति तदा वेदोऽपीति पञ्चदशं द्विधा ॥
भिक्षुगीतस्य सांख्यस्य गुणलक्ष्म्यैलगीतयोः ।
उक्त्योक्तं मनसोरित्थं बलं भेदो रणे जयः ॥

ऊनविंशं चतुर्थेवं चतुर्भिर्द्वादशोत्तरः ।
पञ्च द्वादशभिः षड्भिः षट् त्रयोविंशतिस्ततः ॥
निस्सङ्गत्वे गुणत्यागे भक्तिदार्ढ्ये च कर्मणि ।
तत्त्वज्ञाने चोपयोगात् त्रिद्विद्विद्वित्रिमेलनम् ॥
तद्धेतुष्वापि निष्कम्पो निस्सङ्गोऽच्छेदलेपकः ।
विशोधको मलत्यागी त्यक्ता विक्रियया भिदः ॥
निःस्नेहो दिष्टभुक् क्षोभहीनो रूपाप्रलोभितः ।
सारग्राह्यः स्पर्शमूढो निर्लोभो गीत्यवञ्चितः ।
रसामूढो विविक्ताशोऽपरिग्राह्यभिमानमुक् ॥
एक एकमना गुप्तासिद्धाका धृतनिश्चयः ॥
ईशस्यैकस्य कर्तृत्वे ध्यातुर्ध्येयात्मना स्थितौ ।
देहः स्वस्थे च पुरुषः क्रियते गुरुभिः क्रमात् ॥
पृथिवी वायुराकाश आपोऽग्निश्चन्द्रमा रविः ।
कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद् गजः ॥
मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः ।
कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेशकृत् ॥
चतुर्विंशतिरेते स्युर्गुरवः स्वं वपुः परः ।
उपायत्वेऽन्तरङ्गास्ते क्रमात् त्रिस्कन्धता ततः ॥
देहस्य पृथगुद्देशः श्रेष्ठत्वान्निदिष्टताकृतात् ।
स्वोत्तरात् पृथगध्यायैर्द्वितीयैकोनविंशतौ ।
प्रश्नौ प्रागुत्तरेणापि योगं बोधयितुं कृतौ ॥
प्रथमः पञ्चमः षष्ठो दशमोऽथ त्रयोदशः ।
एकविंश इति प्रश्नाः षडुत्थापनपूर्वकाः ॥
निस्सङ्गता कथं कीदृक् तन्निर्वाहश्च पैर्यया ।

भक्तेर्या विषयस्तास्मिन् सत्यन्यास्मिन् रतिः कथम् ॥
सा कथं भक्तितुल्यं किं कथं भक्तिर्गुणोज्झिते ।
यैर्यैः कामार्थधर्मेषु यैर्मोक्षेऽन्तर्बहिर्भवैः ॥
ते कीदृशाः श्रुतिर्भक्तिपरा च स्मृतयः कथम् ।
कीदृग्भक्तः कथं दौस्थ्यमभिमानक्षयः कथम् ॥
किं कर्मज्ञानभक्तीनां सूचितानां पुनः पुनः ।
सर्वोपदेशसाराणां स्वरूपमिति सङ्गतिः ॥
गुप्तेऽपि विष्णुना श......क्षणेनेह निगद्यते ।
यदोः कुले विप्रशापं विरक्त्यै विषयात्मनाम् ॥

यन्नवमान्तपठितं कृष्णचरितविषयश्लोकद्वयं, तत्र 'जातो गतः पितृगृहादि'त्याद्यश्लो(का)र्थं प्रपञ्चयता मुनिना गतेन स्कन्धेन भगवतः प्रवृत्तिधर्मानुष्ठानं प्रकाशितम् । अथ तस्यैव निवृत्तिधर्मानुष्ठानं प्रकाशयन् तद्(वि)वृणोति—

पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणा-
मन्तः समुत्थकलिना युधि भूपचन्धम् ।
दिष्ट्या विधूय विजये जयमुद्विघुष्य
प्रोच्योद्धवाय च परं समगात् स्वधाम ॥
द्वितीयश्लोकार्थं प्रपञ्चयति—कृत्वेत्यादिना ।

End :

अन्यत्र लोकान्तरे, इह मनुष्यलोके च श्रुतानि परमहंसगतौ परमहंसानां गताचाश्रयभूते कृष्णे परां निश्चलां भक्तिं लभते । अस्मिन् स्कन्धे हंसावतारो निरूपितः । कृष्णरामावतारो द्वाभ्यां स्कन्धाभ्यामुपवर्णितः ।

Colophon :

योऽसौ यादववंशभूस्त्रिभुवन(प्रोद्यत्)प्रभामण्डलः
श्रीमान् कृष्णहुताशनः कुलवनं दग्ध्वा विलीनो दिवि ।
भक्तानां भवतापतप्तहृदयो सूर्ये च विचन्द्रमाः ?
साक्षात् सोऽद्य चकास्ति हन्त कृतिनस्तत्पादभाजो भुवि ॥

*　　*　　*　　*

एकादशस्कन्धे एकत्रिंशोऽध्यायः । समाप्तश्चायं स्कन्धः ।

Author—Same as No. 114.

Remarks—The Ms. is well preserved.



॥ कृष्णपदी (भागवतव्याख्या) ॥

128. KṚṢṆAPADĪ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—$15\frac{3}{4}'' \times 2\frac{1}{4}''$. Leaves—180. 10 lines per page and 48—56 letters per line. Script—Malayālam. No. of Granthas—6200.

Subject—Same as No. 114.

Beginning—Same as No. 127.

End :

अथाखिलभुवनगुहोदरव्याप्तप्रभापटलया स्वमूर्त्यैवान्धस्य लोकस्यात्मविद्यालक्षणं चक्षुरनुगृह्य चरितार्थस्य कृष्णद्युमणे(र्नि)-म्लोचननिमित्तमुपक्षिपति—श्रीवत्साङ्कमिति । अथ श्रीवत्साङ्कं

जरनामा लुब्धको मृगशङ्कया विव्याधेत्यन्वयः । घनश्यामो घन इव श्यामस्तं तप्तस्य हाटकस्य वर्च इ......

Colophon:

इत्येकादशे एकोनत्रिंशः ।

Author—Same as No. 114.

Remarks—The Ms. is almost damaged and about 300 years old. It comprises the commentary on 30 chapters of the 11th Skandha.

॥ कृष्णपदी (भागवतव्याख्या) ॥

129. KṚṢṆAPADĪ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 2''$. Leaves—117. 11 lines per page and 32 letters per line. Script—Tamil Grantha. No. of Granthas—2600.

Subject—Same as No. 114 (the first 13 chapters in Skandha 12).

Beginning:

श्रीगणपतये नमः ।
तरुणा करुणा काचिदरुणाधरपल्करा ।
चरणानतये नः स्याद्वरुणाहृतसत्करा ॥

निरोधो द्वादशस्कन्धे त्रयोदशभिरीरितः ।
निरोधो नाम सृष्टानां संहारः स चतुर्विधः ॥
नैमित्तिकप्राकृतिकौ ब्रह्मणोऽन्ते दिनायुषोः ।
नित्यः प्रतिक्षणं मुक्तिरात्यन्तिक इति स्मृतः ॥
त्रिभिरत्र कलेर्वृद्धिर्निमित्तं वर्ण्यते लये ।
चतुर्विधो लयस्तुर्येणाथ विश्वलयावधेः ॥
विष्णोः स्वरूपमुद्दिष्टं पञ्चमेनाखिलात्मना ।
षष्ठेन तज्ज्ञानफलं परीक्षिन्मोक्षगामिना ॥
इत्यादि ।

End :

तद्रूपिणा नारदरूपिणा कृष्णाय कृष्णद्वैपायनाय मुनये विभासितः तदात्मना व्यासात्मना योगीन्द्राय... विभासितः तद्रूपिणा भगवद्राताय परीक्षिते चकार म...ह्मश्च विभासितः । कारुण्यत इति सर्वत्र ग्राह्यम् । तत्परं सत्यं धीमहीति । कथंभूतं, शुद्धं रागादिशून्यं विमलं निरवद्यं अमृतं सत्त्वरूपं विशोकं निर्दुःखं सत्यं परं धीमहीत्युपसंहारः ।

अथापि वेदार्थमहावाक्यगतिं गमयितुं ध्यानं चेह नैश्चिन्त्यमात्रम् । अतः परमगुरुं व्यासं नमः इति । साक्षिणे शुकपरीक्षित्संवादे साक्षित्वेन स्थिताय तस्मै भगवते नमः । इदं पुराणं क्रिययास्य प्रणयनेन हेतुना । तस्मै शुकाख्याय व्याचचक्षे उपदिदेश । स्वगुरून् नमति योगीन्द्रायेति । विष्णुरातं परीक्षितम् अमूमुचत् मोचयामास ।

शिवः शिवेत्यच्युत इन्दिरेति
सरोजभूवागधिदेवतेति ।

सर्वं जगत् स्थास्नु चरिष्णु चेति
ख्यातेऽद्वये स्वात्मनि कृष्ण आस्ते ॥

अष्टादशदशत्रिंशत्याधिका नवविंशतिः ।
षड्विंशतिर्दशनवपञ्चभिर्विंशतिस्त्रिभिः ॥
चतुर्भिश्चाथ नवतिरेकत्रिंशत् त्रयोदश ॥
इति भागवतेऽध्याया एकत्रिंशच्छतत्रयम् ।
अहो! भागवताम्भोधिरहो अहमहो रसः ॥

Colophon:

* * * *

द्वादशस्कन्धे त्रयोदशोऽध्यायः । हरिः । शुभमस्तु । श्रीगणपतये नमः ।

महाबलेशस्य वियच्छिखस्य
जटागलत्स्वस्तटिनीकरौघात् ।
इतस्ततो यत्र (नि?हि) वारिधाराः
कुल्याकुलोत्थाः प्रसरन्ति देशे ॥

पतञ्जलित्वे सति नागराजेनाङ्गीकृतत्वादुरुमङ्गलेन ।
वदन्ति यन्नागपुरं मनुष्यास्तत्रावतीर्य द्विजवर्यगेहे ॥
जन्म द्वितीयं विधिवत् प्रपन्नो यजूंपि साङ्गानि गुरोर्गृहीत्वा ।
स्नात्वा विवाहात् पुर एव गत्वा वैराग्यतो ह्याश्रममन्तिमं यः ॥

आनन्दशोर्पोज्ज्वलकृष्णनामा
मुनिर्मुनीन्द्रैः सह पद्मनाभम् ।
चित्ते निधायाखिललोकनाथं
देशं तदङ्घ्रिस्फुरितं प्रपेदे ॥

येनाथ सेतुर्जनकात्मजायाः
शोभावहोऽध्यैक्षि च पद्मनाभः ।
शिवामृताख्यात् परहंसमुख्या-
च्छ्रुतश्च येनाखिलवेदसारः ॥
अन्तेऽभिषिक्तः परहंसराज्ये
यश्चात्र तेनैव मुनीश्वरेण ।
यश्चानुजग्राह नृपाधिनाथ-
स्याङ्के निषण्णः स्वसुखं जनेभ्यः ॥
स्वपादपद्मं समुपाश्रितेभ्यो
वाचाखिलाम्नायगिरोऽर्थभूतम् ।
श्रीरक्तशाग्वीति मुकुन्दधाम्नि
ख्यातेऽकरोद्यश्च परं समाधिम् ॥
तत्पादपद्मभ्रमरेण सेयं
श्रीराघवानन्दमुनीश्वरेण ।
श्रीमन्निलातीरसमुद्भवेन
तुर्याश्रमं मृत्युभया(दिं?दि)तेन ॥
गोविन्दमात्मन्यधिगम्य साक्षा-
द्भक्तिप्रभेदैरपि योगभेदैः ।
तत्प्रीतिकामेन कृता चिराय
जीयात् कृतिः कृष्णपदी पृथिव्याम् ॥
अकृत्रिमचमत्क्रियामधुरकाव्यपर्वोचिते
यथाविधि परिस्फुरत्समयवृत्तसर्वोचिते ।
अमानुषपराक्रमे निलयधर्मरक्षाकृतौ
विचित्रविभवाश्रिते त्रिपिनमद्गृहे संश्रुते ॥

वियद्वदखिलाकरे विततकीर्तिरत्नाकरे
समस्तरिपुसङ्करे समरलब्धलक्ष्मीकरे ।
समस्तमुनिशङ्करे हृदि कृतात्मभूशङ्करे
... ...
विवेकनिकषोपले वहति राघवे कोलभू-
मघोन्यलघुविक्रमैरवति चक्ररक्षाधुराम् ।
अकुण्ठमतिमैहिकादपृथगार्तवैकुण्ठतः
सती कृतिरियं मुनेरजनि राघवानन्दतः ॥

Author—Same as No. 114.

Remarks—The work comprises the commentary on the first 10 chapters in Skandha 12.

॥ केरलमाहात्म्यम् ॥

130. KERALAMĀHĀTMYAM.

Substance—Palm leaf. Size—$10\frac{7}{8}'' \times 1\frac{1}{2}''$. Leaves—108. 9 lines per page and 40 letters per line. Script—Malayāḷam No. of Granthas—2430.

Subject—The incarnation of Paraśu-Rāma, the creation of Keraḷa, the sanctity of the temples and the garments, languages and social customs of the people thereof.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु। श्रीगुरुभ्यो नमः।
गङ्गाधरसुतानन्द लम्बोदरं नमाम्यहम् ।

त्वत्पदाम्भोरुहं नित्यं दिश मे हस्तकौशलम् ॥
कृतादौ सूर्यवंशे च जातः कश्चिन्महीपतिः ।
नर्मदायास्तटे सोऽपि कृतवीर्याभिधः पुरा ॥
अवन्त्याद्यष्टदेशेषु राजाभूद् दक्षिणे पथि ।
तस्य पत्नी कुमारी च पातिव्रत्यमहोत्सवा ॥
पुत्रहीनौ च तौ तत्र दुःखितौ समबोधितौ ।
स तां बुद्धिमतां श्रेष्ठो नारायणमहर्निशम् ॥
ध्यात्वास्ते पञ्चवह्न्यादौ परमात्मानमच्युतम् ।
तपस्तेपेऽपि भूपोऽपि सत्यसन्धो जितेन्द्रियः ॥

End:

सूतः—
नैमिशारण्यमध्ये च शौनकादीनिदं वचः ।
गार्ग्यं भार्गवमाहात्म्यं श्रवणान्मुक्तिमाप्नुयात् ॥

सूतं महात्मानमिदं सुभाषितं
संपूज्य पीठे सहसैव दक्षिणाम् ।
ददुश्च सर्वे मुनयो नृपोत्तमाः
पुष्पैश्च वस्त्रैरनिशं सुपूजितम् ॥

Colophon :

इत्यार्षे श्रीमत्परशुरामायणे अगस्त्यसंहितायामाग्नेयपुराणे भूगोलखण्डे विष्णुरहस्ये उपदेशकाण्डे केरलमाहात्म्ये गर्गयुधिष्ठिरसंवादे त्रिसहस्रशताधिकायाम् अष्टोत्तरशततमोऽध्याय. ।

श्रीकृष्णाय परब्रह्मणे नमः । श्रीगुरुभ्यो नमः ।

श्रीशं विरिञ्चिसुरनिर्जरवृन्दवन्द्य-
श्रीपादपद्ममनमीकुसुमावभासम् ।

श्रीवाञ्चिनाथनृपशेखरहृत्सु भान्तं
श्रीपद्मनाभमनिशं प्रणमामि देवम् ॥

Author:

Remarks—This work containing 108 chapters has been printed in Malayāḷam characters at the Bhārata Vilāsam Press, Trichur. There is much difference between the two works. The printed edition includes an additional chapter 'Praśnottaravarṇana' in the beginning though the whole subject matter of this Ms. is embodied in it in 99 chapters. The Ms. begins from the 4th verse in the 2nd chapter of the printed work which contains four verses in addition at the close. The colophon thereof is as follows :—.

"इति श्रीब्रह्माण्डपुराणे केरलपुराणे गर्गयुधिष्ठिरसंवादे केरलमाहात्म्ये फलश्रुतिर्नाम शततमोऽध्यायः ।"

The differences in readings are also numerous.

॥ गणेशपुराणम् ॥

131. GAṆEŚAPURĀṆAM.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—102. 10—12 lines per page and 52 letters per line. Script—Tamil Grantha. No. of Granthas—3600. Incomplete.

Subject—The mythological importance of God Gaṇeśa.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

ऋषय ऊचुः—

सूत सूत महाप्राज्ञ वेदशास्त्रविशारद ।
सर्वविद्यानिधे त्वत्तो वक्तान्यो नोपलभ्यते ॥
जन्मजन्मान्तरीयं न स्थितं पुण्यं महत्तरम् ।
तेन सन्दर्शनं जातं सर्वज्ञस्य (सु?स)तस्तव ॥
वयं धन्यतमा लोके जीवितं नः (स?सु)जीवितम् ।
पितरो वेदशास्त्राणि तपांस्याश्रम एव च ॥
अष्टादश पुराणानि विस्तराच्छ्राविताानि नः ।
अन्या(द्य?न्य)पि हि नः श्रोतुमिच्छा[सि?स्ति] द्विजसत्तम ॥
शौनकीये महासत्रे स[ता?क्ता] द्वादशवार्षिके ।
त्वत्कथामृतपानान्नो [अद्य?नान्यद्] विश्रमकारणम् ॥

सूत उवाच—

साधु पृष्टं महाभागा भवद्भिः पूर्णकर्मभिः ।
साधूनां समचित्तानां मतिर्लोकोपकारिणी ॥
ममापि परितोषोऽ[सि?स्ति] कथानां कथने द्विजाः ।
अतोऽहं साधुवृत्तेभ्यः कथयिष्ये विशेषतः ॥
अन्यान्युपपुराणानि वर्तन्तेऽष्टादशैव तु ।
गणे[शं] नारदीयं च नृसिंहादीन्यथापि च ॥
गणेशस्य पुराणं तु तत्रादौ कथयाम्यहम् ।
दुर्लभं श्रवणं यस्य मर्त्यलोके विशेषतः ॥

End:

राजोवाच—

सत्यं भोजनकालो[सि?स्ति] भोक्तव्यं च तवाज्ञया ।

अन्नाभावे श्रोत्रियाणां जलं याच्य पिबेदपि ॥
तथाप्येतान् विहायाहं सैनिकान् गणनातिगान् ।
जलं पातुं न शक्नोमि कथं भोक्तुं समुत्सहे ॥
जानेऽहं मनसा ब्रह्मन् न शक्ति(:) सर्वभोजने ।
भवद्दर्शनमात्रेण कृतकृत्यो व्रजेऽधुना ॥

ऋषिरुवाच—

चिन्तां मा कुरु राजर्षे भोजयिष्ये ससैनिकान् ।
चतुर्विधेन चान्नेन किमसाध्यं तपस्विनाम् ॥
गृहे ते वाहिनी या स्यात् तामप्याकारय प्रभो ।
क्षणं विश्रम्यतां तीरे नद्याश्चारुतरे शुभे ॥
यावत्सि[द्धि?द्धं] भवेदन्नं पश्चाद् द्रक्ष्यसि कौतुकम् ।

Colophon :

इति श्रीमद्गणेशपुराणे उपासनाखण्डे अष्टसप्ततितमोऽध्यायः ।

Author :

Remarks—There are 78 chapters in the Upāsanā-khaṇḍa of the work. The following verse,

अतः स विस्मयाविष्टो जगा(द) कृतवीर्यजः ।
वाक्यमाकर्ण्य तु मुनेर्नदीतीरं सुशोभनम् ॥

found after the colophon, seems to be an introduction to the next chapter. It is seen from page 1610, Vol. IV, D. C. S. M., Madras, that there is a Ms. of the work with two khaṇḍas, Upāsana, and Līla, comprising 250 chapters and 12000 granthas on the whole.

॥ गोकर्णक्षेत्रमाहात्म्यम् ॥

132. GOKARṆAKṢETRAMĀHĀTMYAM.

Substance—Palm leaf. Size—10″ × 1⅞″. Leaves—9. 8 lines per page and about 24 letters per line. Script—Malayālam. No. of Granthas—108. Incomplete.

Subject—Description of the glory of the Gokarṇakṣetra, the shrine dedicated to Śrī Parameśvara.

Beginning:

हरिः । श्रीगणपतये नमः ।
अथान्यदपि वक्ष्यामि माहात्म्यं त्रिपुरद्विषः ।
श्रुतमात्रेण येनापिच्छिद्यन्ते सर्वसंशयाः ।
अतः परतरं नास्ति किञ्चित् पापविशोधनम् ।
सर्वानन्दकरं श्रीमत् सर्वकामार्थसाधकम् ॥
दीर्घायुर्विजयारोग्यभुक्तिमुक्तिफलप्रदम् ।
यदनन्येन भावेन महेशाराधनं परम् ॥
... ...

End:

बहुनात्र किमुक्तेन गोकर्णस्थानि पार्थिव ।
सर्वाण्यश्मानि लिङ्गानि तीर्थान्यम्भांसि सर्वशः ॥
गोकर्णे शिवलिङ्गानां तीर्थानामपि भूरिशः।
वर्ण्यते महिमा राजन् पुराणेषु महर्षिभिः ॥
गोकर्णे कोटितीर्थं तु तीर्थानां मुख्यतां गतम् ।
सर्वेषां शिवलिङ्गानां सार्वभौमो महाबलः ॥

कृते महाबलः श्वेतस्त्रेतायामतिलोहितः ।
द्वापरे पीतवर्णश्च कलौ श्यामो भविष्यति ॥

Colophon :

Author :

Remarks—The text is but a chapter of the Brahmottarakhaṇḍa of the Skāndapurāṇa.

॥ गोकर्णक्षेत्रमाहात्म्यम् ॥

133. GOKARṆAKṢETRAMĀHĀTMYAM.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—171. 8—9 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—2000. Incomplete.

Subject—Description of the glory of Śiva.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीगुरुभ्यो नमः ।

ऋषय ऊचुः—

आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
सर्वाघापहरं पुण्यं समासेन श्रुतं च नः ॥
इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ।
तद्भक्तानां च माहात्म्यं निःशेषाघहरं परम् ॥
तन्मन्त्राणां तद्व्रतानां तत्पूजायाश्च सम्प्रति ।
तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय ॥

सूतः—

एतावदेव मर्त्यानां परं श्रेयः सनातनम् ।
यदीश्वरकथायां वो जाता भक्तिरहैतुकी ॥

End:

सूतः—

यूयं बत महाभागाः कृतार्था मुनिसत्तमाः ।
ये पिबन्ति सदा शम्भोः कथामृतरसायनम् ॥

ते जन्मभाजः खलु जीवलोके
येषां मनो ध्यायति विश्वनाथम् ।
वाणी गुणान् स्तौति कथां शृणोति
श्रोत्रद्वयं ते भवमुत्तरन्ति ॥

विविधगुणविभेदैर्नित्यमस्पष्टरूपं
जगति च विहरन्तं वाङ्मनोवृत्तिदूरम् ।
... ...
परमशिवमनन्तानन्तमाद्यं प्रपद्ये ॥

यः पठेच्छृणुयाद्वापि पुराणं शैवमुत्तरम् ।
विधूय सर्वकर्माणि शिवलोके महीयते ॥

Colophon:

इति ब्रह्मोत्तरखण्डे पुराणश्रवणानुवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ।

ब्रह्मोत्तरखण्डं समाप्तम् । शुभमस्तु । श्रीगुरुभ्यो नमः ।

Author:

Remarks—The work contains chapters 23—44 of the Brahmottarakhanda of the Skāndapurāna. The Gokarnakṣetramāhātmya is described in

chapter 24 and Somavāravrātamāhātmya in chapter 32. The table of contents is as follows :—

Chapter:

23 Pañcākṣarīmahimānuvarnanam

24 Gokarnakṣetramāhātmyavarṇanam

25 Śivacaturdaśīmahimānuvarṇanam

26 Caturdaśīśivapūjāvarṇanam

27 Śivapūjāmāhātmyam

28 Śivamāhātmyam

29, 30 Śivapūjāvidhi

31 Somavāramahimānuvarṇanam

32 Somavāravratamahimānuvarṇanam

33 Śivayogipūjāvarṇanam

34 Śivayogidharmopadeśakathanam

35 Śivakavacakathanam

36, 37 Śivaguṇānuvarnanam

38 Bhasmamahimānuvarṇanam

39 Tripuṇḍramāhātmyavarnanam

40 Satvaropākhyānam

41, 42 Umāmaheśvaravratamahimānuvarnanam

43 Rudrākṣavarṇanam

44 Purāṇaśravaṇānuvarṇanam

Nine leaves are seen at the close pertaining to different chapters. The designation of the work is based on chapter 24.

॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

134. JAIMINĪYASAMHITĀ.

Substance—Palm leaf. Size—19″ × 1⅞″. Leaves—179. 8—10 lines per page and about 66 letters per line. Script—Malayāḷam. No. of Granthas —6650.

Subject—Purānic version of the creation of the world etc., as expounded by Jaimini.

Beginning:

विश्वोत्पत्त्यादिषु गुणितया यत्कलांशस्त्रिमूर्ती-
रन्तर्व्यामोहयति सततं शक्तिलेशो यदीयः ।
शश्वच्छान्तं सकलभुवनव्यापि नारायणाख्यं
प्रत्यग्ज्योतिः स्फुरतु हृदि मे सच्चिदानन्दरूपम् ॥

हेमाम्भोरुहकेसरारुणरुचामालोलदूर्वादल-
श्यामानां च करोतु पार्श्वगतयोः श्रेयांसि गात्रत्विषाम् ।
श्रीभूम्योरितरेतरव्यतिकराच्छारं वपुर्वोऽनिशं
तत्पीनस्तनचूचुकाम्बुजदरव्यासक्तहस्तं हरेः ॥

ऋषयः—

विचित्रार्थकथोपेता ब्राह्माण्डीयं सुविस्तरा ।
पुराणसंहिता सूत त्वया सम्यगिहोच्यते ॥

भूयोऽप्याचक्ष्व नः सम्यग्विस्तरेण महाद्युते ।
हिरण्यनाभः किं भूयो जैमिनिं पर्यपृच्छत ॥

सूतः—

श्रुत्वा बहुविधा रम्याः कथा मुनिमुखोद्गताः ।

हिरण्यनाभो विप्रेन्द्रं जैमिनिं पुनरब्रवीत् ॥
भगवन् यन्मया पृष्टं त्वया तत्सम्यगीरितम् ।
महदाद्यं हि जगतो नवधा सृष्टिलक्षणम् ॥

End:

सगरस्य सुतैर्यस्माद् वर्धितो मकरालयः ।
ततः प्रभृति लोकेषु सागराख्यामवाप्तवान् ॥
एतत्ते चरितं सर्वं महतां कथितं मया ।
रामस्य कार्तवीर्यस्य सगरस्य महीपतेः ॥

Colophon:

इत्यादिमहापुराणे ब्रह्माण्डे मध्यमभागे पञ्चाशीतिसहस्रिकायां संहितायां गोकर्णोद्धारणं नाम पञ्चनवतितमोऽध्यायः ॥ नमो हरिहरहिरण्यगर्भेभ्यः । मध्यमभागः समाप्तः । शुभमस्तु । श्रीसरस्वत्यै नमः । इदं पुस्तकं श्रीवेङ्कटादिवाकरेण लिखितम् । श्रीमते नारायणाय नमः ।

बिन्दुदुर्लिपिविसर्गवीथिका-
श्रृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥

श्रीमते नारायणाय नमः । श्रीसरस्वत्यै नमः । शुभमस्तु । गुरुभ्यो नमः । सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः । श्रीवेङ्कटेशाय मङ्गलम् ।

Author:

Remarks—This work, comprising 95 chapters, is a part of the Brahmāṇḍapurāṇa.

॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

135 JAIMINĪYASAMHITĀ.

Substance—Palm leaf Size—18½"×2' Leaves—95
14 lines per page and 80 letters per line
Script—Malayalam No. of Granthas—6650

Subject—Beginning—End—Same as No 134

Colophon.

इति ब्रह्माण्डे सप्तनवतितमोऽध्यायः । समाप्तश्च मध्यमभागः ।

स्यानन्दूराभिधानप्रथितमुररिपुक्षेत्रसम्बन्धिमुख्य-
श्रीमरकूपकराख्यक्षितिसुरवृषभव्याहृतिव्यापृतेन ।
केनाप्यार्यादिमस्तत्रनिलसदगजागेहदासत्वभाजा
कैलासेनास्तभङ्गिद्रुतमुपलिखितैपेश्वराख्येण पुंसा ॥
... . व्यापृतेनेत्युपयुक्तं पदत्रयम् ।
श्लोकेऽस्मिन् लभ्यते बिम्बमम्बुधौ शशिनो यथा ॥

ഇതാലയിൽ ഒട്ടകം "स्यानन्दूर'
ത്തുക്കന്നിൽ ഭഗവതി രക്ഷിക്ക ഗുരുകരോക്കായി——

Author

Remarks—This Ms is utilised for *pārayana* during the Bhadradipa Festival celebrated twice a year in the shrine of Śri Padmanabha, the tutelary deity of His Highness The Maharaja of Travancore

॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

136. JAIMINĪYASAMHITĀ.

Substance—Palm leaf. Size—$22\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—212. 7—8 lines per page and 67 letters per line. Script—Malayāḷam.. No. of Granthas—6650.

Subject—Beginning—End—Same as No. 134.

Colophon:

इत्यादिमहापुराणे ब्रह्माण्डे मध्यभागे पञ्चाशीतिसाहस्रिकायां गोकर्णोद्धारणं नाम पञ्चनवतितमोऽध्यायः । नमो हरिहराहिरण्यगर्भेभ्यः । मध्यमभागं समाप्तम् । श्रीसरस्वत्यै नमः ।

लक्ष्मणेन महत्पादपङ्केरुहरजोजुषा ।
ब्रह्माण्डे मध्यमो भागो लिखितोऽसावनुत्तमः ॥
अक्षरं यत् परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति विद्वांसः कस्य नास्ति व्यतिक्रमः ॥
श्रीवेदव्यासाय नमः ।

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥
श्रीगुरुभ्यो नमः । मङ्गलमस्तु ।

Author:

Remarks—Same as No. 134.

॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

137. JAIMINĪYASAMHITĀ.

Substance—Palm leaf. Size—$20\frac{3}{4}'' \times 1\frac{5}{8}''$. Leaves—206. 8—9 lines per page and 61 letters per line. Script—Malayālam. No. of Granthas—6650.

Subject—Beginning—End—Same as No. 134.

Colophon :

इति ब्रह्माण्डे पुराणे पञ्चाशीतिसहस्रिकायां जैमिनीयसंहितायां
मध्यमभागे गोकर्णोद्धारो नाम एकोनशततमोऽध्यायः ।
अक्षरं यत्र परिभ्रष्टं मात्राहीनं तु यद्भवेत् ।
क्षन्तुमर्हन्ति... ... ... ॥
... ...प्रबन्धमकरालये महामकरेण ।
लिखितमलर्ककरेण प्रभाति लोकं यथेदम(ल)र्ककरेण ॥
കുറിയാഴിയത്ത ശാസ്ത്രിനാമ്നാ ലിഖിതമിദം പുസ്തകം.

Author :

Remarks—The Ms. is worm-eaten here and there. It contains 99 chapters while the previous Mss., comprise only 95 chapters. The 24th chapter in those works is divided here into chapters 24 and 25. So the 99 chapters might have been formed out of such divisions.

॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

138. JAIMINĪYASAMHITĀ.

Substance—Palm leaf. Size—$24\frac{1}{2}'' \times 2''$. Leaves—67.

8 lines per page and 78 letters per line. Script—Malayāḷam. No. of Granthas—2600. Incomplete.

Subject—Same as No. 134.

Beginning:

... ...

तस्यामधिवसन् राजा सामात्यः स्वजनावृतः ॥
प्रशशास मुदोपेतो राज्यं निहतकण्टकम् ।
तस्य प्रतर्दनो नाम पुत्रोऽभूदरिमर्दनः ॥
सत्यधर्मरतो धीरो दौहित्रो नाहु... ... ।
इत्यादिमहापुराणे ब्रह्माण्डे मध्यमभागे द्वितीयोऽध्यायः
जैमिनिः—
भद्रश्रेण्योऽपि समरे दिवोदासेन निर्जितः ॥

End:

बभूव रूपतन्मात्रं पुरुपेच्छाप्रचोदितात् ।
रूपतन्मात्रतो वह्निः सम्बभूव विकुर्वतः ॥
विशेपवित्त्वं रूपस्य चक्षुपो जायते यतः ।
गुणदिव्याकृतिज्ञत्वं व्यक्तिसंस्थात्वमेव च ॥
प्रकाशात्मत्वमित्यग्ने रूपतन्मात्रवृत्तयः ।
उद्योतनं तु धातूनां द्रवीकरणमेव च ॥
अदनं पचनं पानं शोपणं हिममर्दनम् ।
क्षुत्तृष्णोत्पादनात्मत्वं ...... ।

Colophon:

इत्यादिमहापुराणे ब्रह्माण्डे मध्यमभागे वसिष्ठसगरसंवादे एकोनपञ्चाशोऽध्यायः ।

Author:

Remarks—The Ms. contains 50 chapters. It begins abruptly on Fol. 6 with the closing portion of the second Adhyāya, and is much damaged. The last leaf is numbered 96. The FF. from 11 to 34 are missing.



॥ जैमिनीयसंहिता (ब्रह्माण्डगता) ॥

139. JAIMINĪYASAMHITĀ.

Substance—Palm leaf. Size—21" × 1¾". Leaves—227. 8 lines per page and 56 letters per line. Script—Malayālam. No. of Granthas—6350. Incomplete.

Subject—Same as No. 134.

Beginning:

………धर्मात्मा बभूव नृपसत्तमः ।
निसर्गादेव सञ्जाता भक्तिर्यस्य जनार्दने ॥
पुरुकुत्सोऽपि नागेन्द्रैः पाताले सम्प्रसादितः ।
जघान दुष्टगन्धर्वकोटीस्त्रिंशो महाबलः ॥

End:

मालपाधिन्नया वर्णैर्नानाभिश्च समन्वितः ।
प्राकारान्तादद्भुतैश्च गतमागपरार्द्धिभिः ॥
दीप्यमानगमर्गेषान्त्यप्रजनगर्जितः ।
नानावादित्रनिर्घोषरसपिंगितदिङ्मुखः ।

स गत्वा सरयूतीये यथाशास्त्रं यथा...... ॥

Colophon:

इत्यादिमहापुराणे ब्रह्माण्डे मध्यमभागे (एक? त्रि)नवतित-मोऽध्यायः ।

Remarks—The work begins on Fol. 2. The las Fol. is numbered 229.

॥ ज्ञानपञ्जरम् (भारतव्याख्या) ॥

140. JÑĀNAPAÑJARAM.

A commentary on the Bhārata.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2''$. Leaves—79 6 lines per page and 62 letters per line Script— Grantha. No. of Granthas—1500 Incomplete.

Subject—An elucidative gloss on the Bhārata.

Beginning:

हरिः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
चतुर्णां पुरुषार्थानामाकरौ चरणौ हरेः ।
वन्देमहि मुनीन्द्राणां शिरःसामान्यशेखरौ ॥
मघवोऽन्वर्थनामानो मधुरा च तथा पुरी ।
मधुरैः कर्मभिर्यस्स तं वन्दे मधुसूदनम् ॥
भारताख्यान(शय?यश) सौ गोसंचारणकोविदौ ।

तमालश्यामलौ वन्दे कृष्णौ देवमुनीश्वरौ ॥
योऽभवच्च सरस्वत्या यतोऽभूच्च सरस्वती ।
तं जन्यजनकं वाचो वन्दे सारस्वतं मुनिम् ॥
उपात्ते शब्दसस्यानां रसे वाल्मीकिभानुना ।
......पु सिञ्चन्तं व्यासचन्द्रमसं भजे ॥
महते भारतायास्मै वेदसारात्मने नमः ।
यस्य स्तुतौ प्रस्तुतौ वा भवेदन्यच्च भारतम् ॥
क महाभारतं काहं व्याख्यानं तस्य मे कथम् ।
पङ्गोर्गरुडवेगेच्छा ममेच्छेयं च सोदरे ॥
ऋषेरतीव पूर्णस्य निर्गमे मार्गमिच्छतः ।
बोधाम्बुधेः परीवाहं कोऽवगाहेत भारतम् ॥
ओष्ठैर्दन्तान् संवृणुत तथास्यानि च पाणिभिः ।
हास्यमेतद्धि वः सन्तो यद् व्याख्यामीह भारतम् ॥
तथापि महतोऽभ्यासात् प्रसादाच्च महामुनेः ।
व्याख्यानसाहसिक्यं मे भारतस्यापि रोचते ॥
वैचित्रीरुचिसंक्षेपो विस्तरोत्पाठनेच्छया ।
मुनिर्व्याचष्ट शिष्येभ्यो भिन्ना भारतसंहिताः ॥
संहिताभेदसाङ्कर्याल्लेखकानां प्रमादतः ।
श्लोकाः कोशेषु भिद्यन्ते तथाध्यायाश्च सङ्ख्यया ॥
तद्बहून्येकरूपाणि कोशानि प्रेक्ष्य सर्वतः ।
व्याख्यास्यते विनिर्णीता दृश्यमानात्र संहिता ॥
भेदस्थानानि चान्यासां वक्ष्यामस्तत्र तत्र च ।
समीचीनश्च पाठोऽस्यास्तत्र तत्र प्रवक्ष्यते ॥
वरदाख्येन विदुषा व्यासभक्तेन भाषितम् ।

ज्ञानपञ्जरमित्येतद् व्याख्यानं वीक्ष्यतां बुधैः ॥
इतिवृत्तं इत्थंभूतं वृत्तम् । विशिष्टवृत्तमिति यावत् ।

End :

सपचनः शरीरमण्डकेतोः अण्डस्य केतोः सप्त हेतयः कालीकरालीमनोजवासुलोहितासुधूम्रवर्णास्फुलिङ्गिनीविश्वभुजः नान्यस्तस्मा विद्यते गोपु त्वदन्यगोपु, जलेपु तस्मा विद्यते त्वमेव वडवाया मुखरूपेण जलान्यपि दहसीत्यर्थः ।

Colophon :

इति महाभारतव्याख्याने प्रथमस्य पर्वाध्यायस्य अष्टनवतितमे व्याख्यानं समाप्तम् ।

Author—Varada.

Remarks—The Ms. extending upto chapter 198 is written in bold and legible hand to facilitate daily perusal. It is very much damaged. The commentary furnishes the best readings pointing out all the variants thereof.



॥ ज्ञानपञ्जरम् (भारतव्याख्या) ॥

141. JÑĀNAPAÑJARAM.

A commentary on the Bhārata.

Substance—Palm leaf. Size—18″ × 2″. Leaves—139. 8—10 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—6000. Incomplete.

Subject—Same as No. 140.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । इदानीमारण्यपर्वव्याख्या क्रियते । द्यूतपराजिताः पाण्डवा वनवासोद्युक्ता भूत्वा अपराह्णकाले हस्तिनपुरान्निर्गता इति श्रुत्वा पुनस्तेषां वनवासप्रकारं श्रोतुं श्रुतानुवादं कृत्वा जनमेजयः पृच्छति एवमित्यादिना ।

End:

अत्र आचार्ये शान्तिरिति कोपनिवृत्तिः । मे कोपकारितं निवृत्तं कोपकारकं कोपोत्पत्तिकारणं निवृत्तं शान्तम् । अत्र अस्यामवस्थायां परम् उत्तरकार्यं विधीयतां क्रियताम् । निर्वृत्ते समाप्ते सति दर्शयत आत्मानमिति शेषः । धनं नो धनम् अलभमानः अस्वीकुर्वन् अत्र असद्युद्धे नार्हति . नेच्छति न पराजैषीत् न जयेदित्यर्थः । पूर्वमज्ञातवासं प्रति दुर्योधनेन यदुक्तं तद् गाङ्गेयो वक्तुमर्हति अनुस्मृत्य कालविशेषक्रमं निरूप्य यथावत् स्पष्टमेव अर्हति योग्य इत्यर्थः ॥

Colophon:

इति विराटपर्वव्याख्यायां पञ्चाशोऽध्यायः । विराटपर्वव्याख्यानं समाप्तम् ॥

Author—Same as *No. 140.*

Remarks—This work contains the commentary on 165 chapters and a part of 166, in the Āraṇyaparva, and the whole *of the Virātaparva.* At the close of the first chapter the following line is seen.

" इत्यारण्यपर्वप्रवचने कृष्णगीता नाम प्रथमोऽध्यायः । "

॥ ज्ञानपञ्जरम् (भारतव्याख्या) ॥

142. JÑĀNAPAÑJARAM.

A commentary on the Bhārata.

Substance—Palm leaf. Size—15⅛" x 1⅜". Leaves—44. 7 lines per page and 40 letters per line. Script—Old Malayāḷam. No. of Granthas—800. Incomplete.

Subject—Same as No. 140.

Beginning:

चिन्तयानं जाग्रतं विदुरोऽहमिति । अतः परमभियुक्तमित्यादि-श्लोकद्वयम् उपरितः प्रथमलेखकैः प्रमादादस्तम् । तद् ब्रूहि तच्छ्रेयो ब्रूहि यज्जागरणविनोदनभारशमनं धर्मार्थयुक्तं च तत् सर्वं श्रेयो ब्रूहीत्यर्थः । अयम् ।

End:

अस्य अर्जुनस्य देवमायया अनिर्वचनीयया शक्त्या । अनिर्वचनीयशक्तित्वं विवृणोति—महाधनानीत्यादिना । महाधनानि विशिष्टद्रव्यैरपि दुर्लभानि महान्ति स्थूलानि दिव्यानि अनुत्तमानि लघूनि सूक्ष्मा०

Colophon:

अष्टपञ्चाशः ।

Author—Same as No. 140.

Remarks—The leaves are numbered alphabetically beginning from अ. The Ms. is much damaged and about 300 years old. It contains the

commentary on chapters 35—59 of the Udyogaparva.

॥ टीकासारसंग्रहः (भागवतव्याख्या) ॥

143. ṬĪKĀSĀRASAṄGRAHA.

A commentary on the Bhāgavata.

Substance—*Palm leaf. Size*—*19″ × 2″. Leaves*—*146.* 9 lines per page and 68 letters per line. Script—Malayālam. No. of Granthas—1760.

Subject—An elucidative exposition of the Bhāgavata.

Beginning:

हरिः । श्रीगणपतये नमः । नमो नारायणाय ।

उपदिदेश जगद्वृजिनच्छिदं
प्रतिकृतिं प्रतिकृत्य य उद्धवम् ।
सुखचिदात्ममतिं करुणानिधिं
नमत तं सततं कमलापतिम् ॥

जनिष्टं शीघ्रफलदं स्वकुलसंहारार्थं कौरवपाण्डवार्थिनां वा । तदेवाह—ये कोपिता इति चतुर्भिः श्लोकैः । दुर्वृत्तं छद्मद्यूतं हेलनं पाण्डवाः अजिनवास(सनाः?मः) पशव इत्यादि ।

End:

विधिवाक्यं तावन्मां विधत्तेऽपीश्वरार्पणकर्मणा मोक्षं माधयेदिति विधत्ते । तथा तत्त्वमस्यादिवाक्यमपि मां ब्रह्म विचष्टे । (को अद्धा वेदक्यादिना (?) आद्यं विकल्प्याहमहङ्कारादिमपश्योऽपोह्यते ।

अहमीश्वर एव वाभेदप्रपञ्चरूपेणं । किं बहुना शृणु संक्षेपेणेत्याह—
एतावानिमामास्थाय अनुष्ठाय भिदां भेदप्रपञ्चं मायामात्रमनूद्यान्ते
मोक्षतां प्रतिषिध्य स्वयमुपशाम्यति शब्दः वेदो ब्रह्म
भवतीत्यर्थः ।

Colophon :

इत्येकादशे एकविंशोऽध्यायः ।

Author—Uttamabodhayati as evinced by the colophon of No. 145.

Remarks—The Ms. comprises the commentary on the first 21 chapters in *Skandha* 11. The author of this commentary explains clearly the portions omitted by Śrīdharasvāmin on account of their simplicity. He has taken special care to explain each portion so minutely as to enable even a layman in comprehending the significance of the text. The style of the commentary is simple and lucid. A few leaves in the middle are damaged.

॥ टीकासारसङ्ग्रहः (भागवतव्याख्या) ॥

144. ṬĪKĀSĀRASAṄGRAHA.

A commentary on the Bhāgavata.

Substance—Palm leaf. Size 21″×1¾″. Leaves—80. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2600.

Subject—Same as No. 143.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पायाद्वो वलिमल्लकंसनरकादित्यादिकेतूदयः
प्रह्लादध्रुवरुक्मभूपणसुतक्ष्मावल्क (सान्त्वो)दयः ।
व्यासव्यासजनारदा(दिमुनिहृत्पद्मालिभानूदय)-
(स्त्रैलो)क्याख्यकुमुद्वतीमदकरश्रीकृष्णचन्द्रोदयः ॥
कृष्णावतारचरितश्रवणामृतनिर्वृतः ।
उक्तानुवादेनोत्सुक्याद्राजा पृच्छति तत् पुनः ॥

कथितो वंशविस्तार इति । सोमसूर्ययोः वंशविस्तारः उभयवंश्यानां सोमसूर्ययोर्वंशे भवानां राज्ञां चरितमत्याश्चर्यं नितरां धर्मशीलस्य यदोश्चरितं च कथितमित्युक्तानुवादोऽन्यत् प्रष्टुं तदाह तत्रेति—

End:

शकुनादिनिमित्तगतिः विशेषकच्छेद्यमप्युद्वैनायिकीनां वैयासिकानां च विद्यानां च ज्ञानमिति । कला विद्याः प्रोक्ताः एताश्चतुष्षष्टिः उपच्छन्दयामासतुः प्रशोभितवन्तौ प्रभासक्षेत्रे महार्णवे मृतं बालं वरयामास । ईश्वराविति विदित्वा समुद्रस्तु योऽभ्यर्हण......

Colophon:

इति दशमे चतुश्चत्वारिंशोऽध्यायः ।

Author—Same as No. 143.

Remarks—The Ms. is old and decayed. It comprises chapters 1—45, Skandha 10.

॥ टीकासारसंग्रहः (भागवतव्याख्या) ॥

145. ṬĪKĀSĀRASAṄGRAHA.

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—17½" × 1¾". Leaves—37

171. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—5000. Incomplete.

Subject—Beginning—Same as No. 143.

End :

विधिफलमाह मर्त्य इति । मरणधर्मा पुरुषः तया अनुसवमेधितया नित्यशो वर्धितया श्रीमत्कथाश्रवणादिमात्रचिन्तया तद्धाम एति तत्स्वरूपं प्राप्नोति। तद्धाम कथम्भूतं । दुस्तरः कृतान्तजवः तस्यापवर्गं नाशकं यदर्थं क्षितिभुजोऽपि ग्रामाद्वनं ययुः । ननु कथाश्रवणादिमात्रेण तद्धामप्राप्तिः कथमिति तत्राह चित्रमिति । उरुगायस्य विचित्रलीलया श्रुतया विध्वस्तः कल्मषकदम्बः येषां तेषां मुक्तिरूपमेतन्न चित्रम् । यस्मात् स्त्रीणामपि गोपिकादीनां सुदुस्त्यजकृतान्तजवापवर्गं मुक्तिरूपं किमुत सज्जनानामिति शेषः ।

यो गोवर्धनभूधरं करधृतं लीलाम्बुजन्मायितं
कुर्वन् सप्त दिनानि नाचल(पदा?दपा)द्गोपांश्च घोरापदः ।
यश्चक्रे निजशासने हरविरिञ्चाखण्डलादीन् सुरा-
नुद्दण्डानपि सोऽवताज्जगदिदं गोपालराजो हरिः ॥

Colophon :

इति श्रीमदुत्तमप्रकाशपूज्यपादशिष्येण उत्तमबोधयतिना निरीक्ष्य लिखिते श्रीभागवतटीकासारसङ्ग्रहे दशमस्कन्धे नवतितमोऽध्यायः । इति दशमस्कन्धः समाप्तः । हरिः ॐ ।

Author—Same as No. 143.

Remarks—This work also deals with the exposition of Skandha 10.

॥ टीकासारसंग्रहः (भागवतव्याख्या) ॥

146 TĪKĀSĀRASANGRAHA

A commentary on the Bhāgavata

Substance—Palm leaf Size—21 × 2 Leaves—62
9 lines per page and 64 letters per line.
Script—Malayalam No of Granthas—2250

Subject—Same as No 143

Beginning

हरिः । श्रीगणपतये नम ।

उपदिदेश जगद्वृजिनच्छिदं
प्रतिकृति प्रतिकृत्य य उद्धवम् ।
सुखचिदात्ममतिं करुणानिधि
नमत तं सततं कमलापतिम् ॥

श्रीभागवतटीकाभ्यः सारमुद्धृत्य लिख्यते ।
यत्नं विना भागवते श्रोतॄणा सुखसित्तये ॥

आविष्कृतसर्वशक्तेः मर्त्यावतारशिरोमणेर्मूर्तस्य ब्रह्मणः श्रीकृष्णस्य माहात्म्यं पूर्वस्मिन् स्कन्धे सविस्तरमुपपादितम् । इदानीं तदुपासनाशुद्धान्तःकरणैरधिगम्यस्य परस्यामूर्तस्य ब्रह्मणोऽति गहनत्वादनेकैरितिहासैः युक्तिभिश्च पुन. पुनरतिविस्तरेण स्वरूप प्रतिपादयितुम् एकादशस्कन्ध आरभ्यते। तत्र यदुकुलनाशकमुसल प्रसङ्गार्थं प्रथमं पूर्वस्कन्धार्थम् अनुवदति कृत्वा दैत्यवधमित्यादिना। दैत्याः पूतनाद्याः । अवतारयद् अवातारयदित्यडागमो द्रष्टव्यः । अवरोपितवानित्यर्थः । जविष्ठं शीघ्रफलदं कलिं कलहं स्वकुलसं-

हारार्थं कौरवपाण्डवानां वा । एतद्विवृणोति ये कोपिता इति ।

End:

ब्रह्मकल्पे कस्मै ब्रह्मणे विभासितः प्रकाशितः तद्रूपेण ब्रह्मरूपेण नारदाय नारदरूपेण कृष्णाय व्यासाय तद्रूपेण... ... ...भगवद्राताय परीक्षते येन प्रकाशितः तद् ब्रह्म श्रीनारायणाख्यं धीमहीत्यन्वयः । पुनरपि तं देवं प्रणम... ....व्याख्यातवान् प्रियो मेऽन्तर्हृदयं प्रविश्य करणग्रामादिकं प्रेरयन्.... .... श्रीमद्भागवतार्णवे विवरणं नावं ततानातनुं ....

... ...

... ...

न्यूनातिक्रमदोषशोषणकृते शुद्धाय बद्धाञ्जलिः ॥

Colophon:

इति श्रीभागवतटीकासारसङ्ग्रहे द्वादशस्कन्धे त्रयोदशोऽध्यायः ।

Author:

Remarks—Though this work and that numbered 143 have the same designation they are somewhat different. The commentary comprises Skandhas 11 and 12.



॥ तत्त्वप्रदीपिका (भागवतव्याख्या) ॥

147. TATTVAPRADĪPIKĀ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—21" × 2". Leaves—21.

9 lines per page and 62 letters per line
Script—Malayālam No of Granthas—800
Incomplete

Subject—Elucidative exposition of the Bhāgavata

Beginning

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
जगदन्तरायराशिं संस्मृतमात्रोऽपि यो जरीजर्ति ।
चर्कर्ति चास्मृतो यस्तं वन्दे कुञ्जराननं देवम् ॥
शशिहारगौरवरदेहलता शरदिन्दुबिम्बवदना विमला ।
मम शारदा दिशतु बुद्धिमजं पदमच्युतस्य समुपैमि यया ॥
सहजानन्दमनन्तं शुद्धं बुद्धं परं पदं विष्णोः ।
अहमास्मि यत्प्रसादात् तेभ्यो बद्धोऽञ्जलिर्गुरुभ्योऽयम् ॥

यस्य श्रीपादपङ्केरुहनखलिखितोर्ध्वाण्डनिर्भिण्णभित्ते-
र्गङ्गा मङ्गल्यभङ्गप्रबलतरजलोद्यत्तरङ्गा जगाल ।
तस्यासावङ्घ्रिदण्डस्त्रिभुवनभवनस्तम्भदण्डः प्रकामं
कामं वामो मुरारेरशुभचयहरश्चिन्त्यमानं क्रियाद्वः ॥

अत्र हि भागवते यत् प्रकटार्थत्वादुपेक्षितं किञ्चित् ।
पददीपिकाटिकाभिस्तदिह तदनुग्रहेण विवृणोमि ।

तत्रादौ तावत् सकलनिगमशिरसि निरूपितो भगवान् प्रत्यगात्मा श्रीनारायणः स्वमायया नामरूपात्मकं जगदिदं ससर्ज । तथाहि श्रुतिः—

End

यो वल्गुहासो मन्दस्मितं स च उद्दामभावस्य पिशुनः सूचकः अमलवल्गुहास इति वा लीलापूर्णविलोकनं च यासामुद्दामभा-

यपिशुनामलवल्गुहासव्रीलावलोकैर्निहतस्ताडितो मदनोऽपि जगद्विजयी संमुह्यति कर्तव्यतामूढः संश्रापं धनुर्ज्ज्यया अजहात् जहौ ताश्च प्रमदोत्तमाः कामविजयिन्योऽपि कुहकैर्हेलादिभिर्यस्येन्द्रियं विमथितुं न शेकुः तमयं प्राकृतलोकोऽसक्तमपि सङ्गिनं मनुजं मन्यत इति द्वितियश्लोकेनान्वयः। आत्मौपम्येन आत्मोपमाभावेन आत्मनः सङ्गित्वात्तदीश्वरोऽपीति व्याचष्णानं मनुष्यभावनां मानमिति शेषः। अतो बुधोऽयं जनः। तत्त्वतस्तु तस्य संसारो नास्तीत्याह।

Colophon :

इति श्रीभागवतव्याख्यायां प्रथमोऽध्यायः।
इति नवमोऽध्यायः ॥

Author:

Remarks—The commentary, though incomplete, discloses the philosophical significance of the work. Certain portions are lost here and there in the middle. C. C. mentions on Page 219 Tattvapradīpikā, a commentary on the Bhāgavata but no reference is made as to the identity of the author.



॥ तत्त्वप्रदीपिका (भागवतव्याख्या) ॥

148. TATTVAPRADĪPIKĀ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—16½" × 1¾". Leaves—224. 10 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—5600. Incomplete.

Subject—Same as No 147

Beginning

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ॥

End .

अथ तस्मादात्मसममस्मदनुरूपं समा. . . . . . .वैषम्यशून्याय शान्ताय रागादिभी रहिताय पुरुषाय पूर्ण . . . .राय उत्कृष्टाय वासुदेवायान्तर्यामिणे मत्स्याय सत्त्वगुणाय तद्दर्शनेन तृप्तानि चक्षूंषि येषां तेषां यानं स्वप्रयाणमनिच्छतामपि सतामपवर्गो नाशः स न विद्यते क्रमस्य सोऽनपवर्गविक्रमः द्रुमैश्छन्नां क्ष्मां भूमिं वीक्ष्य कुप्यन् । कथंभूतैः द्रुमैः द्या स्वर्गं रोद्धुमिवेच्छितैः संवर्तक इव अप्ययमळये नयैरनुनयैः मारिषा वार्क्षी . . . .

Colophon

इति तृतीयस्कन्धव्याख्याने त्रयस्त्रिंशोऽध्यायः । तृतीयस्कन्धव्याख्यान समाप्तम् ।

इति विवृता भागवते मुख्यस्कन्धस्य मज्जनाद्विजुषा तत्त्वप्रदीपिकेमामुत्कृष्टार्थग्रहान्निरीक्षध्वम् ।

इति श्रीभागवतविवरणाया(ण्यां) तत्त्वप्रदीपिकायां प्रथमस्कन्धे एकोनविंशोऽध्यायः । प्रथमस्कन्धस्त्रिशतोत्तरसहस्रसंख्यः ।

Author

Remarks—This work contains the commentary on Skandhas 1, 2, 3 and 28 chapters in Skandha 4 The commentary brings out clearly the philosophical import of the work At the end of the 1st Skandha is seen the following panegyric of Srikrsna

यः कुम्भीश्वरभिन्नकुम्भरो ? द्रिक्तासरक्तच्छवि-
मेत्वा रङ्गमभङ्गमिङ्गितमतिर्भोजेश्वरं कम्पयन् ।
उत्पाट्यैककरेण तोरणवरे चिक्षेप चाणूरकं
तस्मै बालविनोदलूनरिपवे कृष्णाय बद्धोऽञ्जलिः ॥

This seems to have been written by the commentator. A similar stanza on the same theme is found at the end of every Skandha. Eg: Note the following verse at the close of the 3rd Skandha.

यत्पादपङ्कजरजांसि यथा यथा वा
ध्यातानि चर्कति पशूनपि मुक्तिभाजः ।
नारायणः स भगवान् निजपादपद्मे
भक्तप्रियोऽचलधियं मम चर्करीतु ॥

॥ तत्त्वप्रदीपिका (भागवतव्याख्या) ॥

149. TATTVAPRADĪPIKĀ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—19¼" × 2". Leaves—219. 10 lines per page and about 60 letters per line. Script—Malayāḷam. No. of Granthas—7800. Incomplete.

Subject—Same as No. 147.

Beginning—Same as No. 148.

End :

इह मनुष्यलोके उभयशेषाभ्यां धर्माधर्मशेषाभ्यां चतुर्दशधा

चतुर्दशलोकप्रकारेण श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य स तथा भूश्च द्वीपानि च वर्षाणि च सरितश्चाद्रयश्च पातालानि च दिशश्च नरकाश्च भगणाश्च तैर्या लोकसंस्था सा गीता मया हे नृप का मा। ईश्वरस्य मूलं वपुः। कथंभूतस्य, सकलजीवानां निकायस्य धाम आश्रयः, सकलजीवनिकायो वा धाम यस्य तस्य।

Colophon:

यत्पादपङ्कजरजांसि सुरस्रवन्तीं
चक्रुर्जगत्त्रयपवित्रतमाम्बुनेत्रीम्।
नारायणः स भगवान् मम पापक्षयं (?)
कक्षं यथा हुतवहः परिदन्दहीतु॥

इति विवृता भागवते पञ्चमसम्बन्धिनी मया भक्त्या।
तत्त्वप्रदीपिकेयं हरिचरणस्मरणनिर्वृतिजेन॥

इति श्रीभागवतविवरणे पञ्चमस्कन्धे चतुर्विंशोऽध्यायः। पञ्चमस्कन्धः समाप्तः। विष्णवे नमः। श्रीपरमगुरुभ्यो नमः।

Author:

Remarks—The covering wooden boards of the codex are painted with attractive colours depicting Lord Kṛṣṇa and other divinities. The commentary comprises Skandhas 1—5.



॥ तत्त्वप्रदीपिका (भागवतव्याख्या) ॥

150. TATTVAPRADĪPIKĀ

A commentary on the Bhāgavata.

Substance—Palm leaf. Size—22″ × 1¼″. Leaves—38

166. 8 lines per page and about 78 letters per line. Script—Malayāḷam. No. of Granthas—7000. Incomplete.

Subject—Same as No. 143.

Beginning :

गणपतये नमः ।

भूतेर्लक्ष्म्याः । यजुषां पतिः वेदपतिः यज्ञतुष्टायां दक्षिणायां कर्दमदुहितृसन्ततेर्वक्ष्यमाणत्वात् श्रुतप्रायमित्युच्यते । विततो विस्तीर्णः का सा विश्वरूपादेः(?)पादशौचाद् दिव इति । दिवि स्वर्गे सरिदभूत् । गङ्गा । अत एव देवकुल्या देवकुलयोग्या । आत्मा विष्णुः ईशः ईश्वरः ब्रह्मा च आत्मेशब्रह्माणः तेषां सम्भवान् अवतारान् । जगतः स्थितिश्च अन्तश्चोत्पत्तिश्च स्थित्यन्तोत्पत्तयः, तासां हेतवः । तस्मिन्नृक्षे कुलाद्रौ प्राणायामेन मनः संयम्य एकपादेन मुनिर्वर्षशतमातिष्ठदिति द्वितीयश्लोकेनान्वयः ॥

End :

आत्मनिगमं वैदिकमार्गं प्रथयन् विपुल(य)न् बन्धं भक्तानां संसारबन्धं दृष्ट्या दर्शनेन विधूय विजये अर्जुने जयं विघुष्य अर्जुनो जिग्ये इत्याघोषणं कृत्वा उद्धवाय च परं परमार्थतत्त्वं प्रोच्यात्मा स्वधाम स्वरूपं समगात् प्राप्तवान् ।

Colophon :

यत्पादपङ्कजयुगं शरशक्तिखड्गै-
रभ्यर्च्य मुक्तिपदवीमरयोऽप्यविन्दन् ।
नारायणः स भगवान् मम चित्ततापं
तापं यथा तुहिनगुः कृपयानुरुन्ध्यात् ॥

इति नवमेऽनवमगुणे भक्त्या नारायणे मया स्कन्धे ।

तत्त्वप्रदीपिकेयं निवृता सत्सेवकेन भागवते ॥

इति श्रीभागवतविवरणे तत्त्वप्रदीपिकायां नवमस्कन्धे द्वात्रिंशोऽध्यायः । नवमस्कन्धः समाप्तः ।

Author:

Remarks—The Ms is very old. It comprises Skandhas 4—9



॥ ताम्रपर्णीमाहात्म्यम् ॥

151 TĀMRAPARNĪMĀHĀTMYAM

Substance—Palm leaf Size—14½ × 2 Leaves—94 11 lines per page and 48 letters per line Script—Malayālam No of Granthas—3200 Complete

Subject—Description of the glory of Tāmraparni, a river in South India, celebrated as *Dakṣiṇagaṅgā*

Beginning:

हरिः । श्रीगणपतये नमः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥
अखण्डपरमानन्दपरिपूर्णात्ममूर्तये ।
निर्गुणाय गुणाविष्टकर्मणे ब्रह्मणे नमः ॥

यद्वचःकणिका वेदा यल्लीलाकणिका जगत् ।
यत्प्रभाबिन्दुरिन्द्राद्या नमस्तस्मै परात्मने ॥
पुरा विधात्रा ब्रह्माण्डकुहरीगृहमेधिना ।
लीलया कलिता कापि तपःसीमा तपस्विनाम् ॥
भूरेषा भूतिजननी पुरातनकृताश्रया ।

* * * *

इदं कथयितुं पुण्यं ताम्राख्याश्चरितं महत् ॥
आगतोऽस्मीह भद्रं वो मुनयस्तु तपोधनाः ।
इतः परं मया कार्यं युष्माकं प्रीतिवर्धनम् ॥

End:

तस्मात्त्वमपि विप्रेन्द्र गत्वा तत् क्षेत्रमुत्तमम् ।
भजस्व परया भक्त्या ततो विन्दस्यभीप्सितम् ॥
तीर्थं विष्णुपदं सिद्धं तद्ध्यानं तीर्थमुत्तमम् ।
तन्नामकीर्तनं तीर्थं तीर्थं तज्जनसङ्गमः ॥
ये च ये भगवद्भक्ताः संसक्ताः साधुचारिणः ।
एते हि तत्त्वज्ञानस्य भागिनो नात्र संशयः ॥
तत्र गत्वा त्वया ब्रह्मन् समभ्यर्च्य जनार्दनम् ।
लङ्घ्यते वैष्णवी माया दुस्त्यजा देहिनां परा ॥

इत्थं प्रसादमुपलभ्य विधेः प्रसन्ना-
दाधिं विहाय मनसो मलिनत्वहेतुम् ।
बद्धाञ्जलिः स्तुतिभिरुल्लसयन् सभायां
स्वान्ते विभोर्मुनिवरो निरगान्नगर्याः ॥

Colophon:

इति श्रीशैवे पुराणे ताम्रपर्णीमाहात्म्ये सप्तत्रिंशोऽध्यायः ।
ॐ । शुभमस्तु । श्रीविद्यामाय नमः । ताम्रपर्णीमाहात्म्यं समाप्तम् ॥

ആയിരത്തിഒറുപത്തിആറാമാണ്ടുകുംഭമാസം ൧-ാം-ൗ എഴുതി തീൎന്നു. മംഗളം.

इति श्रीशैवे पुराणे उपरिभागे तीर्थक्षेत्रवैभवखण्डे ताम्रपर्णीमाहात्म्ये प्रथमोऽध्यायः ॥

Author:

Remarks—This work is but a portion of the Śaivapurāna. The river Tāmraparni flows through the Tinnevelly District and is of immense service to the people at large.

॥ ताम्रपर्णीमाहात्म्यम् ॥

152. TĀMRAPARṆĪMĀHĀTMYAM.

Substance—Palm leaf. Size—14″ x 1″. Leaves—212. 7—8 lines per page and 32 letters per line. Script—Grantha. No. of Granthas—3200. Complete.

Subject—*Beginning—End*—Same as No. 151.

Colophon:

इति श्रीशिवपुराणे ताम्रपर्णीमाहात्म्ये सप्तत्रिंशोऽध्यायः। हरिः ॐ। शुभमस्तु।

गुरुभ्यो नमः। *சங்கரலிங்கம் லிகிதம்.*

Author:

Remarks—The Ms. is about 150 years old.

।। तुलसीमाहात्म्यम् ।।

153. TULASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—73. 8—10 lines per page and 32 letters per line. Script—Tamil Grantha. No. of Granthas—1300—Incomplete.

Subject—A compilation of selected portions from Haribhaktisudhodaya, Harivamśa and other works glorifying the sanctity of the Tulasi plant.

Beginning:

श्रीरामाय नमः ।

श्रीसूतः—

श्रुतं वः सकलं विप्रास्तुलसीदेविसङ्गतम् ।
स्तोत्रं मन्त्रं च कवचं किमद्य श्रोतुमिच्छथ ॥

मुनयः—

श्रुतं नः सकलं सूत तुलसीदेविसङ्गतम् ।
स्तोत्रं मन्त्रं च कवचं पुनर्नो वक्तुमर्हति ।
यदनुक्तं विशेषेण देशसम्बद्धमप्युत ।
श्रुतं यथोदितं सर्वं भवता सूतनन्दन ॥

End:

महापातकयुक्तोऽपि तुलसीपत्रभक्षणात् ।
सद्य एव विशुद्धात्मा जायते न तु संशयः ।
तुलसीदलसम्मिश्रमुदकं प्राशयेद्यदि ॥
स कालत्रयसंयुक्तो विष्णोः सालोक्यमाप्नुयात् ॥

तुलसीकाननस्यार्थे प्राकारं यस्तु कारयेत् ।
कण्टकावरणं वापि तन्मे निगदतः शृणु ॥
यावद्दिनं तद्विवृतिस्तिष्ठेत् सम्यग्वृथा भुवि ।
तावद्युगसहस्राणि विष्णुलोके महीयते ॥
तुलसीमूलजातानि छिन्द्याद् ब्रह्मंस्तृणानि च ।
तेनार्जितानि पापानि निकृन्तति यमः स्वयम् ॥
एककृत्वोदकं वापि ... ...

Colophon:

इत्यश्वमेधे हरिवंशे शेषधर्मे तुलसीमाहात्म्यं नाम द्वादशोऽध्यायः । श्रीरामाय नमः ।

रौद्रिसंवत्सरे ज्येष्ठमासे मार्ताण्डवासरे ।
श्रीमत्तुलस्या माहात्म्यं मयैव लिखितं शुभम् ॥
इति श्रीतुलसीमाहात्म्यं सम्पूर्णम् ।

Author:

Remarks—It is stated in the first Fol. of this Ms. that it contains Tulasi Māhātmya in 12 chapters and Śrīraṅgamāhātmya in 10 chapters. It comprises only the 12 chapters of Tulasīmāhātmya besides two other chapters which also seem to glorify the Tulasi. This portion may either be *Tulasīmāhātmya taken* from some other purāṇas or may lead to the Śrīraṅgamāhātmya.

॥ तुलसीमाहात्म्यं (स्कान्दगतम्) ॥

154. TULASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 1\frac{1}{4}''$. Leaves—25. 6 lines per page and about 16 letters per line. Script—Malayāḷam. No. of Granthas—150. Complete.

Subject—Same as No. 153.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शतानन्द महाप्राज्ञ सर्वशास्त्रविशारद ।
नामोच्चारे कृते यस्याः प्रीणात्यसुरदर्पहा ॥
पापानि यान्ति विलयं पुण्यं भवति चाक्षयम् ।
सा कथं तुलसी लोके पूज्यते वन्द्यतेऽपि च ॥
पद्मोत्पलादिजातीनामाधिक्यं केन हेतुना ।

End:

या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुःपावनी
लोकानामभिवन्दितार्तिहरणी सिक्तान्तकत्रासनी ।
भक्त्यासक्तिविधायिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥

यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः ।
यदग्रे सर्ववेदाश्च तुलसीं तां नमाम्यहम् ॥
इत्येतत् सर्वमाख्यातं श्रोतॄणां पुण्यवर्धनम् ।
यः पठेच्छृणुयाद्वापि याति विष्णोः परं पदम् ॥

Colophon:

इति स्कान्दपुराणे तुलसीमाहात्म्यं नाम द्विशततमोऽध्यायः । इति तुलसीमाहात्म्यं समाप्तम् । हरिः श्रीगणपतये नमः ।

Author:

Remarks—The last leaf shows the beginning of another work which runs thus:—

" शुभमस्तु । हरिः श्रीगणपतये नमः ।
नारायणं नमस्कृत्य देवं त्रिभुवनेश्वरम् ।
गोसावित्रीं प्रवक्ष्यामि व्यासेन ग्रथितां पुरा ॥
नारायणस"



॥ तुलसीमाहात्म्यम् (धर्मसंहितान्तर्गतम्) ॥

155 A. TULASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$3\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—21. 8 lines per page and 12 letters per line. Script—Malayālam. No. of Granthas—126.

Subject—Same as No. 153.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नारायणः—

तदङ्गसम्भवायाथ तुलस्याश्चरितं शुभम् ।
प्रवक्ष्यामि समासेन नृणां संसारमोचनम् ॥
पुरा देवासुरे यत्ने मथ्यमाने पयोनिधौ । –

विष्णोर्हर्षाश्रुसम्भूतां दृष्ट्वा वै तुलसीं शुभाम् ॥
ससम्भ्रमेण चोत्थाय गरुडः केशवं मुने ।
प्रणम्य बहुशो मूर्ध्ना पप्रच्छात्यन्तभक्तितः ॥

End:

वृथा लुनाति तुलसीं यो नरः पापकृत्तमः ।
स याति रौरवं घोरं चतुर्युगसहस्रकम् ॥
विष्ण्वर्चने वैश्वदेवे श्राद्धकर्मणि शस्यति ।
प्रेतकर्मणि नो शस्ता तुलसी भवनाशिनी ॥
तुलसीवनमध्ये ये सञ्चरन्तीह जन्तवः ।
अपि कीटपतङ्गाद्या या(न्ति) विष्णोः परं पदम् ॥
इति ते कथितं सर्वं तुलसीस्तवमुत्तमम् ।
व्रतमप्यमलं किं तत् परं श्रोतुमिहेच्छसि ॥

Colophon:

इति श्रीधर्मसंहितायां तुलसीमाहात्म्यं नाम त्रयोदशोऽध्यायः ।

Author:

Remarks—The Ms. contains four works of which Tulasīmāhātmya forms the 1st part. The others are Gopīcandanamāhātmya, Nāradavyāmohanam and Ekādaśīmāhātmyam catalogued as 155 B. C. and D.

॥ गोपीचन्दनमाहात्म्यम् ॥

155 B. GOPĪCANDANAMĀHĀTMYAM.

Substance—Palm leaf. Size—3½″ × 1½″. Leaves 4.

8 lines per page and 12 letters per line. Script —Malayālam. No. of Granthas—24.

Subject—*The importance and usefulness of smearing over with Gopīcandana*

Beginning:

वैनतेयः—

गोपीचन्दनमाहात्म्यं वद केशव मेऽधुना ।
किं पुण्यं धारणे पुंसां केन मन्त्रेण चोद्धृता ॥
का गोपी कथमुत्पन्ना शक्तिस्तस्याश्च का स्मृता ।
दातॄणां किं फलं प्रोक्तं कीदृशं वर्णमुत्तमम् ॥

भगवान्—

शृणु वत्स प्रवक्ष्यामि गोपीचन्दनसंभवम् ।
द्वारकायां समुत्पन्ना गोपी गोविन्ददेहजा ॥

End

निर्मितेयं शिवा गोपी य(तीनामा)श्रया सती ।
गृहस्थैर्यतिभिः सेव्या वनस्थैर्ब्रह्मचारिभिः ॥
विमुक्तिकामैरमलैर्गोपी गङ्गा दिवानिशम् ।
सर्वत्र मृत्तिका पुण्या तुलसी(मू)लसम्भवा ॥
पुण्यात्पुण्यतरा गङ्गाती..................

Colophon:

Author

Remarks—*Gopī*, a variety of clay, referred to herein is personified as a divinity

॥ नारदव्यामोहनम् ॥

155 C. NĀRADAVYĀMOHANAM.

Substance—Palm leaf. Size—$3\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—11. 7—9 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas—66.

Subject—Redemption of Nārada from *Māyā*.

Beginning:

श्रीनारदः—

मनो मे चञ्चलं नित्यं भगवन् वायुवन्मुहुः ।
दुष्करं निग्रहं मन्ये तदुपायं वदस्व मे ॥

श्रीवेदव्यासः —

नारदस्य वचः श्रुत्वा तदा नारायणो मुनिः ।
ध्यात्वा मुहूर्तं निश्चित्य प्रहसन् वाक्यमब्रवीत् ॥

श्रीभगवान्—

चञ्चलं तु मनो नित्यमविद्यासम्भृतात्मनाम् ।
अविद्याप्रभवं चित्तं चित्तस्थं हि मनः सदा ॥

End:

भो भो नारद सर्वज्ञ दृष्टा माया त्वयाधुना ।
अज्ञानकन्दजननी तमसा पूरिता सती ॥
ययेदं धार्यते विश्वं यया सम्मोहितं जगत् ।
....सा दृष्टान्यैर्हरिं विना ॥

श्रीवेदव्यासः—

इत्युक्त्वा भगवांस्तस्य मूर्ध्नि स्थाप्य पदद्वयम् ।

मा भैषी(?)त्यब्रवीदित्थं कृपया भक्तवत्सलः ॥

Colophon:

इति श्रीधर्मसंहितायां नारदव्यामोहनं नाम षष्ठोऽध्यायः

Author:

Remarks—This Ms. is written in continuation of 155 B.

॥ एकादशीमाहात्म्यम् ॥

155 D. EKĀDASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$3\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves 5. 7—9 lines per page and 12 letters per line. Script—Malayālam. No. of Granthas—30.

Subject—Holy observance of the 11th day (sacred to Visnu) of each *pakṣa*.

Beginning:

नारदः—

अष्टादशविधा प्रोक्ता कथमेकादशी शुभा ।
तन्ममाचक्ष्व भगवन् ज्ञातुमिच्छाम्यहं प्रभो ॥
शुद्धान्विका तथा विद्धा भिन्ना न्यूनसमाधिकैः ।
एकैकापि पुनस्त्रेधा द्वादश्यूनसमाधिकैः ॥

End:

व्रतानामुत्तमतरं श्रवणद्वादशीव्रतम् ।
मृगाङ्कवारसंयुक्ता श्रवणद्वादशी शुभा ॥
षष्टिवर्षाङ्गवेद्वापि न भवेदिति मे मतिः।
यत्किञ्चित्कुरुते कर्म शुभं वा यदि वाशुभम् ॥

पष्टिर्वर्षसहस्राणि... ... .विन्दन्ति शोभनम् ।
श्रवणद्वादशी कापि सर्वपापहरीति गीः ।
शुभप्रदा सा सर्वत्र स्वल्पं वा यदि वा बहु ।

Colophon:

इति श्रीधर्मसंहितायां (एकादशीमाहात्म्यं)नामाष्टादशोऽध्यायः ।

Author:

Remarks—The following verse is seen at the close of the Ms. after the colophon:

जले विष्णुः स्थले विष्णुर्विष्णुराकाशमूर्धनि ।
स्थावरं जङ्गमं विष्णुः सर्वं विष्णुमयं जगत् ॥

॥ तुलसीमाहात्म्यम् ॥

156 A. TULASĪMĀHĀTMYAM.

Substance—Palm leaf. Size—11¾"×2". Leaves—5. 11—13 lines per page and 44 letters per line. Script—Malayālam. No. of Granthas—165. Complete.

Subject—Same as No. 153.

Beginning—End—Colophon—Same as No. 155 A.

Author:

Remarks—The Ms. contains four other works, catalogued as 156 B, C, D and E.

॥ गोपीचन्दनमाहात्म्यम् ॥

156 B. GOPĪCANDANAMĀHĀTMYAM.

Substance—Palm leaf. Size—11½″ × 2″. Leaves—2. About 12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—66. Incomplete.

Subject—Beginning—Same as No. 155 B.

End:

पुण्यात् पुण्यतरा गङ्गातीरस्था मृत्तिका कलौ ।
विष्णुक्षेत्रस्थितां (पुण्यां) मृत्तिकाममलां शिवाम् ॥
यो नित्यं धारयेत् काये भक्त्या कलिमलापहाम् ।
स स्नातः सर्वतीर्थेषु गङ्गाद्येषु न संशयः ॥
ममाङ्गलेपनं दिव्यं गोपीचन्दनमुत्तमम् ।
धारणादर्शनात्स्पर्शात्पुंसां कलिमलापहम् ॥
स्निग्धं शुद्धं कुङ्कुमाभं कुम्भीपाकनिवारणम्
पवित्रमपवित्राणां पावनं पापकर्मिणाम् ॥
ब्राह्मण्यदं ब्राह्मणानां मुमुक्षूणां विमुक्तिदम् ।
वक्षःस्थले ललाटे च कण्ठे च बाहुमूलयोः ।
पञ्चाङ्गधारणं प्रोक्तं पवित्रं ब्रह्मचारिणाम् ।
द्वादशाङ्गं गृहस्थानामेतच्चैकदण्डिनाम् ।
पुण्यं पवित्रमायुष्यं गोपीचन्दनधारणम् ॥
कर्तव्यं कल्मषघ्नं तद्विशेषेण खगेश्वर ।
एकादश्याममावास्यां द्वादश्यामुत्थिते दिने ॥
नियमेन भजेद्वोपीं गोविन्दादर्पिताश्रयः ।

Colophon:

Author:

Remarks—At the close is seen the following verse in praise of the 24 Mūrtis.

चतुर्विंशतिमूर्तीनां स्तवं सम्यक् पठन्नरः ।
न याति नरकं घोरं पापाचारपरोऽपि सः ॥

॥ नारदव्यामोहनम् ॥

156 C. NĀRADAVYĀMOHANAM.

Substance—Palm leaf. Size—11⅗"×2½". Leaves—5. About 12 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—112. Complete.

Subject—Beginning— End— Colophon — Same as No. 155 C.

Author:

Remarks—The following verses are found at the close.

विष्णुक्षेत्रस्थितां पुण्यां मृत्तिकाममलां शिवाम् ।
यो नित्यं धारयेत् काये भक्त्या कलिमलापहाम् ।
स स्नातः सर्वतीर्थेषु गङ्गाद्येषु न संशयः ॥
समाङ्गलेपनाद्दिव्यं गोपीचन्दनमुत्तमम् ।
धारणाद्दर्शना(त्) स्पर्शात् ...

॥ श्रीपद्मनाभाक्षरमालिका ॥

156 D. ŚRĪPADMANĀBHĀKṢARAMĀLIKĀ.

Substance—Palm leaf. Size—11½"×2½". Leaves—2. 11—13 lines per page and 30 letters per line. Script—Malayāḷam. - No. of Granthas—41. Complete.

Subject—A eulogy of Śrī-Padmanābha, the tutelary deity of the Kings of Travancore.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अप्रमेयपराक्रमादिभवारिसङ्घनिकृन्तन
कुन्दभासुरदन्तशोभ कुमुद्वतीपतिसन्मुख ।
जन्मदुःखजराधिनाशन जाह्नवीधरसन्नुत
भक्तवत्सल पक्षिवाहन पद्मनाभ नतोऽस्म्यहम् ॥

End:

नित्यमक्षरमालिकामरुणोदये परमामिमां
यः पठेच्छृणुयादपीह स मुच्यते सकलैरघैः ।
पुत्रमित्रकलत्रसम्पदमाप्य सौख्यमरोगतां
दीर्घमायुरवाप्नुयात् पुनरम्बुजाक्षपदं ध्रुवम् ॥

Colophon:

श्रीकृष्णाय नमः । शुभमस्तु । केशवाय नमः ।

* * * * *

Author:

Remarks—This panegyric is composed of verses

beginning alphabetically from अ and ending with अं. Besides, three verses are to be noted in contravention to the above rule.

॥ श्रीकृष्णाष्टोत्तरशतनाम ॥

156 E. ŚRĪKṚṢṆĀṢṬOTTARAŚATANĀMA.

Substance—Palm leaf. Size—$11\frac{1}{2}'' \times 2\frac{1}{2}''$. Leaves—2. 11—13 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—45. Complete.

Subject—A panegyric of Śrīkṛṣṇa making use of his 108 synonyms.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शेषः—

वसुन्धरे वरारोहे जनानामाशु मुक्तिदम् ।
सर्वमङ्गलमङ्गल्यमणिमाद्यष्टसिद्धिदम् ॥
महापातककोटिघ्नं सर्वतीर्थफलप्रदम् ।
समस्तवेदयज्ञानां फलदं पापनाशनम् ॥
शृणु देवि प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ।
सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत् फलम् ॥

End:

कृष्णाय यादवेन्द्राय ज्ञानमुद्राय योगिने ।
नाथाय रुक्मिणीशाय नमो वेदान्तवेदिने ॥

इमं मन्त्रं जपन् देवि व्रजंस्तिष्ठन् दिवानिशम् ।
सर्वग्रहानुग्रहभाक् सर्वप्रियतमो नरः ॥
पुत्रपौत्रैः परिवृतः सर्वसिद्धिसमृद्धिमान् ।
निर्विश्य भोगानन्ते च विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

श्रीनारायणाय नमः ।

Author :

Remarks—This eulogy is said to be a great *Mantra* that Śesa imparted to Vasundharā, the Goddess of earth.



॥ तुलाकावेरीमाहात्म्यम् ॥

157. TULĀKĀVERĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—197. 8 lines per page and 32 letters per line. Script—Malayālam. No. of Granthas—3150. Complete.

Subject—The origin of the Kāveri, its importance, utility etc.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

धर्मवर्माथ राजर्षिर्निचुलापुरवल्लभः ।
भूयः पप्रच्छ तं नत्वा दाल्भ्यं भागवतोत्तमम् ।
भगवन् प्राणिनः सर्वे केनोपायेन सम्पदः ।
भवन्ति पुत्रान् सम्प्राप्य सुखिनश्चिरजीविनः ॥

कथं स्यात् पापनिर्हारः श्रीशे भक्तिः कथं भवेत् ।
केन धर्मेण सन्तुष्टो भगवान् भूतभावनः ॥
प्रसीदति मनुष्याणां भुक्तिमुक्तिफलप्रदः ।
विशेषात् पापभूयिष्ठे दुराचारे कलौ युगे ॥
पापनाशो भवेद् ब्रह्मन् महापातकिनोऽपि वा ।
एतत् सर्वं विशेषेण तव शिष्यस्य मे वद ॥
इति राज्ञा सुसंपृष्टो भगवान् भगवत्प्रियः ।
बभाषे धर्मवर्माणं धर्मिष्ठं ब्राह्मणोत्तमः ॥

दार्भ्यः—

साधु पृष्टं महाभाग भगवद्भक्तिवर्धनम् ।
यत्ते मनो गतं श्रोतुं दिव्यां विष्णुकथां शुभाम् ॥
तस्मात्तत्त्वमशेषेण वर्णयिष्ये यथामति ।

... ...

गृहस्था यतयः केचिद्वानप्रस्थास्तथापरे ।
लोकानुग्रहकर्तारो हृषीकेशपदाश्रयाः ॥
तुलाकावेरीमाहात्म्यं श्रोतुकामा हरिप्रियम् ।
कुरुक्षेत्रं महाक्षेत्रं लोकाघक्षपयिष्णवः ॥
तान् दृष्ट्वा मुनयः सर्वे कुरुक्षेत्रनिवासिनः ।
अपूजयन् लोकपूज्यान् प्रत्युत्थानार्हणासनैः ॥

End:

मुनयः—

सूत सूत महाप्राज्ञ जीव जीव शतं समाः ।
अहो विचित्रं कावेर्या माहात्म्यं श्रुतिगोपितम् ॥
श्राविताः स्म महाभाग भवाब्धेस्तारिता वयम् ।
पाविताश्च वयं श्रीमन् कावेरीपुण्यवैभवात् ॥

कृतार्थाश्च महाभाग तपो नः किमतः परम् ।

इति प्रसन्नाननीरजा मुदा
ते शौनकाद्या मुनयो मुमुक्षवः ।
हरेश्चरित्रश्रवणोत्सवोत्सुका
गन्धाक्षताभिः पुनरप्यपूजयन् ॥

Colophon

इति श्रीमदाग्नेयपुराणे तुलाकावेरीमाहात्म्ये अगस्त्यहरिश्चन्द्रसंवादे कावेरीवर्णनं नाम त्रिंशोऽध्यायः ।

श्रीपद्मनाभाय परब्रह्मणे नमः । शुभमस्तु ।

* * * * *

Author

Remarks—The Kāveri is the most useful river in South India It is believed that all sins will be washed away by ablutions in it on the day of *Tulāsankrama* Innumerable pilgrims flock to the Cintamani bathing ghat at Trichinopoly on that occasion

---

॥ तुलाकावेरीमाहात्म्यम् ॥

158 TULĀKĀVERĪMĀHĀTMYAM

Substance—Palm leaf Size—14½ × 2" Leaves—94 —11 lines per page and 48 letters per line Script—Malayalam No of Granthas—3100 Complete

Subject—Beginning—Same as No 157

End:

अयाजयन् महाराजं याजकाः कुम्भजादयः ।
हयमेधं महायज्ञं यथेन्द्रं वृत्रनाशने ॥
एवं कृत्वा महायज्ञं यथाशास्त्रं महीपतिः ।
ददौ च ऋत्विगादिभ्यो यथान्यायं तु दक्षिणाम् ॥
कृत्वा चावभृथस्नानं ब्राह्मणैः स्वस्तिवाचनम् ।
पञ्चाशत्कोटिकं स्वर्णं ब्राह्मणेभ्यो महायशाः ॥
दत्वा नृपो हरिश्चन्द्रः प्रतिवर्षं तुलारवौ ।
कावेर्यां स्नाति शुद्धात्मा कृतकृत्यो भवेन्नृपः ? ॥

Colophon:

इति श्रीमदाग्नेयपुराणे तुलाकावेरीमाहात्म्ये त्रिंशोऽध्यायः ।

ശ്രീ ഗുരവേ ശരണം. വേലായുധാ രക്ഷിക്ക. ശ്രീ പരമേശ്വര കടാക്ഷം. ശ്രീ പത്മനാഭകടാക്ഷം. ശ്രീ ഭഗവതീരക്ഷിക്ക. ശ്രീരാമകടാക്ഷം. ശ്രീകൃഷ്ണകടാക്ഷം.

* * * *

शुभमस्तु

Author:

Remarks—Same as No. 157 except at the end.

॥ त्रिकूटाचलमाहात्म्यम् ॥

159. TRIKŪṬĀCALAMĀHĀTMYAM.

Substance—Palm leaf. Size—11" × 1". Leaves—51.

6 lines per page and 32 letters per line. Script—*Tamil Grantha. No. of Granthas—648.*

Subject—The glorification of the mountain Trikūṭa.

Beginning:

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
पुरा मुनीश्वराः केचिन्नैमिशारण्यवासिनः ।
दीर्घसत्रेण यज्ञेन कालं... ...सुखम् ॥
तस्मिन् काले महातेजाः सूतः पौराणिकोत्तमः ।
द्रष्टुकामः क्रतुं प्रायान्नैमिशं पुण्यवर्धनम् ॥
तमागतं मुनिं दृष्ट्वा सर्वे ते मुनिपुङ्गवाः ।
आसनादिभिरभ्यर्च्य निषेदुस्तत्समीपतः ॥
सुखोपविष्टं तं वीक्ष्य पुराणश्रवणोत्सुकाः ।
(ते)पप्रच्छुर्मुदा युक्तं सूतं पौराणिकोत्तमम् ॥

ऋषयः—

सूत सूत महाप्राज्ञ व्यास... ...।
पुराणजातमखिलमानीतं भवता ध्रुवम् ॥
शैवानि च पुराणानि वैष्णवानि तथैव च ।
आग्नेयानि तथान्यानि सेतिहासानि च प्रभो ॥
....निष्कामकाश्चैव सकामाश्च विशेषतः ।
गङ्गाद्याः सरितः सर्वास्तीर्थानि विविधानि च ॥
कृतार्थाश्च वयं जाताः.. .. .. ।
तथापि किञ्चिच्छ्रवणे वाञ्छास्माकमिहाधुना ॥
तद्वक्तव्या ... ...श्रुते वयम् ।
मलयस्योत्तरे देशे त्रिकूटो नाम पर्वतः ॥

... ...प्रियमन्दिरम् ।

तत्र मूर्त्तित्रयं कृत्वा महादेवोऽक्षयोऽव्ययः ॥

सदा वसति.. .. .. ।

इति श्रुतं तु सामान्यं विशेषाद् वक्तुमर्हसि ॥

End:

नारदः—

.. .. त्र नद्यां महादेव यत् स्नानं भवता पुरा ।

माघमासि कृता .. .. ..पूर्व.. ..पतः ॥

द्वादश्यां यत् कृतं स्नानं तत् पि.. ..त्वन्निवेदय ।

सूतः—

एवमुक्तः स मुनिना स्नात्वा शुद्धे.. ..

Colophon:

इति स्कान्दे उपरिभागे स्थानवैभवखण्डे द्वादशोऽध्यायः ।

Author:

Remarks—The work contains 12 chapters complete and a portion of the 13th.

॥ दक्षिणामूर्तिपञ्जरम् ॥

160. DAKṢIṆĀMŪRTIPAÑJARAM.

Substance—Palm leaf. Size—3¼" × 1¾". Leaves—10. 9 lines per page and about 10 letters per line. Script—Malayāḷam. No. of Granthas—56. Complete.

Subject—A *mantra* relating to Dakṣiṇāmūrti, in the form of a dialogue between Nārada and Skanda.

Beginning:

हरिः ।

प्रणम्य साम्बमीशानं शिरसा वैणिको मुनिः ।
विनयावनतो भूत्वा पप्रच्छ स्कन्दमादरात् ॥

श्रीनारदः—

भगवन् परमेशानात् संप्राप्ताखिलशास्त्रक ।
स्कन्द सेनापते स्वामि(न्) पार्वतीप्रियनन्दन ॥
यज्जपात् कविता विद्या शिवे भक्तिश्च शाश्वती ।
अवाप्तिरणिमादीनां सम्पदां प्राप्तिरेव च ॥
भूतप्रेतपिशाचानामगम्यत्वमरोगता ।
महाविज्ञानसंप्राप्तिर्महाराजसुपूजनम् ॥
वरप्रसादो देवानां महामाहात्म्यसम्भवः ।
... ... ॥
तदा मे निकटं प्राप्य दक्षिणामूर्तिरूपधृक् ।
पिता मे पञ्जरं स्वस्य सर्वविज्ञानदायकम् ॥

End:

तस्मात् सर्वप्रयत्नेन मोक्षार्थी सर्वथा पुमान् ।
इममावर्तयेन्मन्त्रं दक्षिणामूर्तिपञ्जरम् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उपरिस्कन्धे स्कन्दनारदसंवादे श्रीदक्षिणामूर्तिपञ्जरं नाम अष्टाशीतितमोऽध्यायः ।

Author:

Remarks—Besides the glorification of Dakṣiṇā-

mūrti, the Ms. contains *mantras* conducive to learning, poetic inspiration, acquisition of wealth and protection from enemies. This forms a part of the Brahmāṇḍapurāṇa.

॥ दीपिका (रामायणव्याख्या) ॥

161. DĪPIKĀ.

Substance—Palm leaf. Size—$16\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—216. 10 lines per page and 52 letters per line. Script—Tamil Grantha. No. of Granthas—5400. Incomplete.

Subject—A simple but vivid exposition of the Rāmāyaṇa.

Beginning:

श्रीः

रामायणामृताम्भोधिविहारधृतमानसः ।
वैद्यनाथाध्वरिः कुर्वे श्रीरामायणदीपिकाम् ॥
श्रीगुरुभ्यो नमः । श्रीरामाय नमः ।

ब्रह्मलोकप्रसिद्धं शतकोटिप्रविस्तरं श्रीरामचरितं भूलोकवर्तिनां चतुर्णां वर्णानां तापत्रयविनाशाय संक्षिप्य ... पितुमुद्युक्तः परमकारुणिको ब्रह्मा वाल्मीकिरूपेण स्वांशेन समभवत् । तथा स्कान्दे पार्वतीं प्रति ईश्वरच- ....

... ...

"वाल्मीकिरभवद् ब्रह्मा वाणी वाक् तस्य रूपिणी ।
चकार रामचरितं पावनं चरितव्रतः ॥"

इति। एवं च ब्रह्मांशभूतो भगवान् प्राचेतसमुनिश्चिकीर्षन् रामचरितं गुरुमुखाच्छ्रोतव्यमिति न्यायेन भगवत्कथोपदेशे सर्वगुरुं नारदं प्रतीक्षमाण आस्ते। अथ ब्रह्मनियोगेन समागतं भगवन्तं नारदमभ्यर्च्य वाल्मीकिः कोन्वस्मिन्नित्यादि पप्रच्छ। देवर्षिः परमेश्वरकथामुदितमनाः श्रीरामचरितं संक्षिप्य वाक्यरूपेणोपदिश्य जगाम। तदनु तमसातीरमुपसृत्य चरतो व्याधविद्धक्रौञ्चदर्शनजनितशोकस्य वाल्मीकेर्वदनात् 'मा निषादे'ति श्लोक उदभूत्। ततः स्वमाश्रममागत्य तमेवानुसन्दधानः सविस्मयमास्त। अथ भगवान् चतुर्मुख आगत्य 'मच्छन्दादेव ते ब्रह्मन्नि'त्यभिधाय रामचरितं सर्वं विदितं भवत्विति वरं प्रदाय पद्यैरेव श्रीरामायणं कुर्वित्युपदिश्य स्वधा ... ... । अथ चतुर्विंश ... क्षरा गायत्र्याख्यपरब्रह्मविद्याविलासभूत ... ... रामायणं चतुर्विंशतिसहस्रश्लोकैश्चकार। ... ... हनुमते नमः। तपःस्वाध्यायनिरतमित्यादि। अन्वयमुखेन व्याख्यायते। तपस्वी प्रशस्ततपाः। 'तप- ... ... श्चेन्द्रियाणाञ्चैकाग्र्यं परमं तपः' इति श्रुतेश्चित्तैकाग्र्यं परमं तपः तद्वान्। अनेन श्रवणाधिकारसम्पत्तिर्द्योतिता। वाल्मीकिर्वल्मीकस्यापत्यम्। अत इञ्। वल्मीकगर्भान्निर्गतत्वोपाधिना वल्मीकापत्यत्वं कलशसुतादिवत् सुवचम्। एवंभूतः पप्रच्छ।

End:

सदृशमभिजनवृत्तादिना तुल्यम्। अनुरूपं लावण्यादिना। मम .. .. (वरु)णेनेति। देवैः प्रेरितेनेति शेषः। एवं च देवैर्दत्तमिति बालकाण्डोक्तमविरुद्धं गौरवात्। भार- .... देवेभ्य आगतम्। मज्यं कृत्वा आकृष्टवानित्यर्थः। छन्दम् अभिप्रायम्।

अष्टादशाधिकशततमः।

... ... त्यादि। उपोह्य आवाह्य। कलशोद्यना उद्वह-

कलशाः । सहिताः परस्परसमेताः पारावतकण्ठव- ... ...
... ... इत्यमरः । अल्प-
पर्णास्तरवोऽपि हि । तमोवशाद् घनीभूता इ ... ...
... ...

Colophon:

इति श्रीवैद्यनाथदीक्षितविरचितायां श्रीमद्रामायणदीपिकायां बालकाण्डे सप्ततितमः सर्गः । बालकाण्डः समाप्तः । ॐ श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्साहिताय श्रीरामचन्द्राय नमः । हरिः ॐ । शुभमस्तु । रघुनाथभागवतेन लिखितमिदं व्याख्यानम् । पुस्तकमपि तदीयमेव ॥

Author—Vaidyanātha Dīkṣita.

Remarks—This Ms. contains the commentary on Bālakāṇḍa and Ayodhyākāṇḍa. It is very much decayed and worm-eaten. The last leaf is missing.

॥ देवीमाहात्म्यम् ॥

162. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—18¾″×1¾″. Leaves—42. 7 lines per page and 52 letters per line. Script—Malayālam. No. of Granthas—950. Complete.

Subject—Glorification of the Goddess (Devī) and description of propitiatory rites.

Beginning:

......हरिः ओम् । देव्यै नमः । ओम् ।

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलालम्बितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिम् ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥

जैमिनिरुवाच—

महर्षे कथयोत्पत्तिं चण्डिकायाः सुविस्तरम् ।
ययेदं सकलं व्याप्तं त्रैलोक्यं सचराचरम् ॥

मार्कण्डेय उवाच—

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥

End:

भूतनाथं च सम्पूज्य नमस्कृत्वा यथाक्रमम् ।
संक्षेपात् त्रिकपूजां यो नित्यं प्रकुरुते नृप ॥
त्रैलोक्याधिपतिर्भूत्वा तुरीयं पदमाप्नुयात् ।
मेधा प्रज्ञा तथा श्रद्धा धारणा ख्यातिरेव च ॥
शान्तिस्तुष्टिस्तथा पुष्टिरभीष्टं सम्प्रयच्छति ॥

Colophon:

इति श्रीदेवीमाहात्म्ये अष्टादशोऽध्यायः । समाप्तम् ।
श्रीदेव्यै नमः ।

Author:

Remarks—The chapters 1—13 deal with the

glorification of Devi in different forms such as Durgā, Sarasvati, Lakṣmī, Pārvati, Śakti, Parā while the remaining 5 chapters describe the rites of propitiation. The work covers various topics such as the divine incarnation, killing of Sumbha and Nisumbha, Caṇḍa and Muṇḍa the Devīstavā etc. This is a portion of the Mārkaṇḍeyapurāṇa.

—:o:—

॥ देवीमाहात्म्यम् ॥

163. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—10¾″ × 1¾″. Leaves—47. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—752.

Subject—Same as No. 162.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः।

निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥

End:

देवी—

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान्।

हत्वा रिपूनस्खलितं तत्र तत्र भविष्यति॥

मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः।

सावर्णिको नाम मनुर्भवान् भुवि भविष्यति॥

...देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णो भविता मनुः ॥

Colophon :

इति देवीमाहात्म्ये अष्टादशोऽध्यायः ॥
अपरिचिते त्वालेख्ये चपलधियो यद्यदस्ति दुर्ल्लिलितम् ।
तत्तत्करुणाम्बुनिधे मातः क्षन्तव्यमखिलवागधिपे ॥
एकादशीति ह्युपवासमात्रं सन्ध्यासु मौनं मितभोजनं च ।
अरिष्टवाग्वर्जनमाहुरेतान्यल्पप्रयासानि महाफलानि ॥
एकोऽपि मृद्भाण्डमनेकरूपं
गोक्षीरमेकं बहुधेनुवर्णम् ।
सुवर्णमेकं बहुभूषणं च
शरीरभिन्नं परमात्ममेकम् ? ॥

വൻ...മറ്റു കർക്കടകമാസം ൧൨-൹ എഴുതിയ പുസ്തകം.

हरिः श्रीगणपतये नमः । श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।
हरिः श्रीगणपतये नमः ।

Author :

Remarks—This Ms. contains only 13 chapters though the colophons point to the end of the 18th chapter.

॥ देवीमाहात्म्यम् ॥

164. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 1\frac{1}{4}''$. Leaves—63,

8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—750.

Subject—Beginning—End—Same as No. 163.

Colophon:

इति देवीमाहात्म्ये त्रयोदशोऽध्यायः ।
शिवमस्तु । श्रीदुर्गादेव्यै नमः.

Author:

Remarks—The Ms. comprises 13 chapters.

॥ देवीमाहात्म्यम् ॥

165. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$8\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—38. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—760. Complete.

Subject—Beginning—End—Same as No. 163.

Colophon:

इति श्रीदेवीमाहात्म्ये त्रयोदशोऽध्यायः । देवीमाहात्म्यं समाप्तम् । श्रीदुर्गायै नमः ।

Author:

Remarks—This Ms. also contains 13 chapters.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

166. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—4" × 1". Leaves—116. 7 lines per page and 14 letters per line. Script—Malayālam. No. of Granthas—710. Complete.

Subject—Same as No. 162.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु

क्रोष्टुकिः—

सावर्णिरिति यः पूर्वं कथितो मनुरष्टमः ।
तस्य स्वरूपतो जन्म वदस्व मम सुव्रत ॥

श्रीमार्कण्डेयः—

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥

End:

इति देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥

Colophon:

इति मार्कण्डेये पुराणे देवीमाहात्म्ये त्रयोदशोऽध्यायः ।
मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे

शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

* * * *

Author :

Remarks—The first stanza found herein is omitted in some Mss. The work consists of only 13 chapters. The first verse in No. 162 is given here at the close. The Ms. is written in neat small hand.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

167. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—5″ × 1½″. Leaves—78. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—780.

Subject etc.—Same as No. 166.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

168. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—12″ × 1″. Leaves—37. 7 lines per page and about 42 letters per line. Script—Malayāḷam. No. of Granthas—700.

Subject—Same as No. 162.

Beginning:

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥

End etc.—Same as No. 166.

Remarks—The Ms. is old and much decayed.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

169. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—6" × 1¾". Leaves—63. 9 lines per page 21 letters per line. Script—Malayālam. No. of Granthas—750.

Subject—Same as No. 162.

Beginning etc.—Same as No. 166.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

170. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—4½ × 1. Leaves—42. 7 lines per page and 20 letters per line. Script—No. of Granthas—210.

Subject—Same as No. 162.

Beginning:

ततः सुरगणाः सर्वे देव्या इन्द्रपुरोगमाः ।
स्तुतिमारेभिरे कर्तुं निहते महिषासुरे ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥

देवा ऊचुः—
देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

End:
यदारुणाख्यस्त्रैलोक्यमहाबाधां करिष्यति ।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम् ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥

Colophon:
इति श्रीदेवीमाहात्म्ये एकादशोऽध्यायः ।
एभिः स्तवैस्तु (तां ? मां) नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकला बाधाः शमयिष्याम्यसंशयम् ।
शुभमस्तु । सर्वग्रहेभ्यो नमः ॥

Author:

Remarks—The Ms. contains chapters 4 & 11 which are recited daily by devotees.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

171. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—3½"×1½". Leaves—89. 8 lines per page and 15 letters per line. Script—Malayāḷam. No. of Granthas—670. Incomplete.

Subject—Beginning—Same as No. 167.

End:

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ।
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ।
भीमा देवीति विख्यातं तन्मे नाम भविष्यति ॥
यदारुणाख्यस्त्रैलोक्ये .... ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे देवीमाहात्म्ये सुम्भासुरवधो नाम दशमोऽध्यायः ॥

Author:

Remarks—The letters are very small, legible and square shaped. The Ms. comes to a close just after the middle of the 11th chapter

---

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

172. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—3"×1½". Leaves—140.

6 lines per page and 9 letters per line. Script—*Malayālam.* No. of Granthas—625. Incomplete.

Subject—Same as No. 162.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमार्कण्डेय उवाच—

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥

End :

वज्रेण चन्द्रीहस्ताग्रविमुक्तेन तथापरे ।
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवे ॥
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ।

Colophon :

इति श्रीदेवीमाहात्म्ये नवमोऽध्यायः ॥

Author:

Remarks—The Ms. ends in the first stanza in chapter 10.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

173. DEVĪMĀHĀTMYAM.

Substance—Palm leaf. Size—5″×1½″. Leaves 30. 8 lines per page and 16 letters per line. Script—Malayālam. No. of Granthas—240. Incomplete.

Subject—Beginning—Same as No. 162.

End :

तुष्टुवुस्तां गुग देवीं मह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ।

Author :

Remarks—This work comes to a close with the first verse in chapter 4.

॥ देवीमाहात्म्यम् (मार्कण्डेयगतम्) ॥

174. DEVĪMĀHĀTMYAM.

Substance—*Palm leaf. Size*—7' × 1½". *Leaves*—57. 5 to 7 lines per page and 24 letters per line. Script—Malayālam. *No. of Granthas*—500.

Subject—Same as No. 162.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमार्कण्डेय उवाच—

अथातः सम्प्रवक्ष्यामि भद्रकाल्याः समुद्भवम् ।
अद्भुतानि च कर्माणि मत्तः शृणु महीसुर ॥
रुद्रस्य तनया साध्वी भद्रकाली महेश्वरी ।
भद्राय जगतां देवी यानि यानि सनातनी ॥
कर्माणि चक्रे कल्याणी कल्यानि सुमहान्ति च ।
तानि तानि शृणु श्रीमन् शिवशर्मन् द्विजोत्तम ॥

काश्मीरनाम्नि नगरे राजाभूद्धार्मिको बली ।
चन्द्रसेन इति ख्यातश्चन्द्रबिम्बमुखः सुखी ॥

End :

इदं चरित्रं महदद्भुतं परं
समस्तपापामयदिव्यभेषजम् ।
स्वयं पठित्वार्चय चण्डिकामिमां
ततस्त्वयि प्रीतिमती भविष्यति ॥

दारुकस्य वधं नाम पुराणमिदमुत्तमम् ।
पठतां शृण्वतां चापि सिध्यन्त्यर्थाः समन्ततः ॥

नीरोगता धनिकता दृढविग्रता च
विज्ञानिता विमलकीर्तिविशालता च ।
सम्पत्स्यते प्रपठतामितिहासमेतं
पश्चापि शान्तिमुपयान्ति हि पातकानि ॥

पुत्रार्थी पुत्रमाप्नोति धनार्थी धनमश्नुते ।
धर्मार्थकाममोक्षार्थी सर्वांस्तानभिविन्दति ॥

लिखितं पुस्तके यस्मिन् कालीमाहात्म्यमुत्तमम् ।
तत् करे वहतां नृणां भूतद्रोहो न जायते ॥

इदं तु यस्मिन् भवनेऽस्ति पुस्तकं
तदास्थितस्त्रीयुवबृद्धबालकाः ।
न जातु रोगैरभिभूतिमाप्नुयु-
र्मस्तरिकाद्यैरपि किं ततोऽपरैः ॥

शृण्वतीनामिदं स्त्रीणामवैधव्यं फलं शुभम् ।
सन्ततिश्चार्थसम्प्राप्तिरन्ते मुक्तिश्च सिध्यति ।

Colophon

इति श्रीमार्कण्डेयपुराणे भद्रोत्पत्तिप्रकरणे नवमोऽध्यायः ।
हरये नमः ।

Author

Remarks—The work is styled Devimāhātmyam but it deals with the adventures of Bhadrakāli, an incarnation of the Devi It would be better if the work is named Bhdrotpatti Two leaves are left blank at the end of the Ms

---

॥ देवीमाहात्म्यव्याख्या ॥

175 DEVĪMĀHĀTMYAVYĀKHYĀ

Substance—Palm leaf Size—14 × 1½ Leaves—92 56 lines per page and 42 letters per line Script—Malayālam No of Granthas—1300

Subject—An exposition of the Devimāhātmya dealing with the practical application of *mantras*

Beginning

मध्यगेऽन्तरात्मनि च"

इति वचनादन्तरशब्दोऽवसरार्थः । स्वारोचिषस्य

जेति श्रुतिप्रसिद्धः ।

"चित्रकिंपुरुषाद्यास्तु मनोः स्वारोचिषस्य ते ।

दशपुत्रा बभूवुरि"ति पुराणवचना य चैत्र. । चैत्रो वशश्चै

त्रवंशः । तस्मिन् समुद्भवो यस्य सुरथस्य स चैत्रवंशसमुद्भवः सुरथः । शोभना वायुवेगहययुक्ताश्च ये हेमरत्नपरिष्कृताश्च रथा यस्य स सुरथः गजतुरगपदातीनामपि शोभनत्वस्योपलक्षणमेतत् । अथवा शोभनो रथः शरीरं स सुरथः । 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु' इति श्रुतेः शरीरस्य रथत्वम् । शोभनवाह्योपाङ्गः स महाराज इति यावत् ।

End:

इत्थं देव्या इति । इत्थं पूर्वोक्तप्रकारेण देव्याः सकाशाद् वरं सावर्णिकमनुपदप्राप्तिलक्षणं लब्ध्वा सम्प्राप्य सुरथः क्षत्रियर्षभः क्षत्रियश्रेष्ठः सूर्यात् सवितुः सवर्णाया मातुः सकाशाद् जन्मोत्पत्तिमासाद्य सम्प्राप्य सावर्णो नाम सावर्ण इति प्रसिद्धोऽष्टमो मनुर्भविता भविष्यति इत्यर्थः ।

सुरथोऽथ महाराजो देवीमाराध्य यत्नतः ।
मानुषं राज्यमाप्याथ दैवं चाप मनोः पदम् ॥
वैश्यवर्यस्तु तां देवीं समुपास्य महामतिः ।
ज्ञानं लब्ध्वा वरं मुक्तिमापेदे परमात्मताम् ॥
निरमायि मया येयं देवीमहात्म्यदीपिका ।
देव्यास्तस्या हि विज्ञप्त्यै सा भूयात्तिमिरापहा ॥
विष्णुमायां परां देवीं विष्णुनेत्रकृतास्पदाम् ।
नमामि परया भक्त्या मम रोगप्रशान्तये ॥
विष्ण्वादितेजःसम्भूतां राजसीं परमेश्वरीम् ।
नमामि परया भक्त्या रोगशान्तिं विधातु (?) नः ॥
प्रादुर्भूता हि या देवी पार्वत्या देहतोऽम्बिका ।
करोतु सत्वरं सा मे रोगशान्तिं निरङ्कुशम् ॥

गुणत्रयात् परा या तु शुद्धचिन्मात्ररूपिणी ।
आत्मयाथात्म्यसंसिद्ध्यै भूयात् सा तिमिरापहा ॥
श्रीगुरोः पदपद्मं यत् सर्वरोगनिरासकृत् ।
तद् भूयाद् ब्रह्मविज्ञप्त्यै ध्वान्तविच्छेद(दा ? का)रकम् ॥

Colophon :

देवीमाहात्म्यसम्बन्धी यः प्रबन्धो मया कृतः ।
विष्णोः पदाम्बुजे सोऽयमर्प्यते पुष्पसञ्चयः ॥

इति श्रीमन्माधवपुरीभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमत्कृष्णभगवतः कृतौ देवीमाहात्म्यदीपिकायां त्रयोदशोऽध्यायः समाप्तः ।

देव्याश्चरितमाहात्म्यदीपिका या कृता...।
गुरोः प्रसादतश्चेयं पूरिता सा गरीयसी ॥

भूदेव.(?) न्धुना सोऽयं देवीमाहात्म्यदीपिकायां त्रयोदशोऽध्यायः समाप्तः । श्रीदुर्गायै नमः ।

Author—Kṛṣṇa Bhagavan, disciple of Bhagavatpūjyapāda of Mādhavapuri.

Remarks—The leaves are marked with letter numerals श्री, न, ल, स्व etc. One or two leaves missing in the beginning. The author refers to the works Prapañcasāra, Sahasranāmavyākhya etc. as well as to the authors Panini, Vārtikakāra etc.

॥ द्वादशीमाहात्म्यम् ॥

176. DVĀDAŚĪMĀHĀTMYAM.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—8. 9 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—The proper time for the propitiation of Viṣṇu, for the observance of Ekādaśīvrata and the fruits thereof.

Beginning:

श्रुत्वाष्टाक्षरमाहात्म्यमम्बरीषो नृपोत्तमः ।
पप्रच्छ पुनरेवेदं वसिष्ठं ब्रह्मसम्भवम् ॥
श्रुतो मे परमो मन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
इदं तु श्रोतुमिच्छामि तद्भवान् वक्तुमर्हसि ॥
सर्वेषामपि मन्त्राणां मूलमन्त्रो यथा वरः ।
तथा कालविशेषोऽपि कथ्यतां प्रीतिकृद्धरेः ।
ततस्तमाह विप्रर्षिः श्रूयतामिति सादरः ।
अम्बरीषं महाप्राज्ञं नारायणपरायणम् ॥
यस्मिन् काले समभ्यर्च्य शीघ्रं तुष्यति केशवः ।
तमहं सम्प्रवक्ष्यामि शृणु राजन् समाहितः ॥
उपोष्यैकादशीं पुण्यां द्वादश्यां भक्तिसंयुतः ।
योऽर्चयेद्विधिनाद्विष्णुं स वै विष्णुप्रियो भ(न ? वेत्)

End:

तपसा ब्रह्मचर्येण शमेन च दमेन च ।
संयुक्तः सर्वशौचाभ्यां विष्णुमाराधयन् सदा ॥
अरिष्यति मम स्थानं नात्र कार्या विचारणा ।

Colophon:

शुभमस्तु । इदं पुस्तकं൹൨൨-ാമത് വൃശ്ചികമാസം (൨൨)

(൨൬)ാം केरलवर्मणा लिखितम् ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीकृष्णाय नमः । वासुदेवाय शान्ताय नमो नमः ॥

Author:

Remarks—The first Fol. begins with the following verse in the Purāṇasaṅgraha:

अष्टाक्षरं समाश्रित्य पूर्वे वै सनकादयः ।

मुक्तिं प्राप्ता नरश्रेष्ठ तस्मान्नारायणं भजे ।

Then commences the Dvādaśīmāhātmya. The leaves are numbered numerically.

॥ द्वारकामाहात्म्यम् (स्कान्दगतम्) ॥

177. DVĀRAKĀMĀHĀTMYAM.

Substance—Palm leaf. Size—14½"×1¾". Leaves—107. 9 lines per page and 36 letters per line. Script—Tamil Grantha. No. of Granthas—2175. Complete.

Subject—Sthalapurāṇa describing the beauties of Dvāraka.

Beginning:

श्रीसरस्वत्यै नमः ।

शौनक उवाच—

कथं सूत युगे त्वस्मिन् रौद्रे वै कलिसंज्ञके ।

बहुपापण्डसङ्कीर्णे पश्यामो मधुसूदनम् ॥

कृत्वाथावभृथस्नानं सरस्वत्यां तपस्विनः ।
शौनकाद्याः सशिष्यास्ते जग्मुर्व्यासाश्रमं परम् ॥
व्यासः समागतान् सर्वान् सशिष्यान् संशितव्रतान् ।
अर्घ्यपाद्यादिभिः सम्यक् पूजयामास बुद्धिमान् ॥
तेन सम्भाविताः सर्वे कृतकृत्यास्तपोधनाः ।
स्वेष्वासनेषूपविष्टाः पश्यन्तश्च परस्परम् ॥
उपविष्टेषु सर्वेषु विद्वत्सु च तपस्विषु ।
शौनकः प्रणिपत्योच्चैः व्यासं सत्यवतीसुतम् ॥
तेषां मध्ये सुखासीनमृषिं सर्वार्थपारगम् ।
विनयावनतो भूत्वा सर्वज्ञं परिपृच्छति ॥
भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
परं रहस्यं वेत्सि त्वं यन्न विन्दन्ति मादृशाः ॥

End :

यत्तदेतज्जगत् सर्वमज्ञानप्रभवं स्मृतम् ।
मायाविजृम्भणं नान्यदिति मत्वा न शोचति ॥
हरिं भजस्व सततमात्मनिस्थमनौपमम् ।
विद्यया वेदसुतया विविक्तस्थो जितेद्रियः ॥
हृदि स्थितं जगद्योनिं वासुदेवं भजन्ति ये ।
ते कृतार्थाः सुजन्मान आर्ये ज्योतिषि संस्थिताः ।
मनस्तुष्टिकरी सम्यक् कथिता धर्मसंहिता ।
सर्वपापहरा पुंसां स्त्रीणां सर्वार्थसाधिका ॥
य इमाममलां नित्यं सन्ध्यायां धर्मसंहिताम् ।
पठेद्वा श्रावयेद्विप्रान् सोऽत्यन्तं सुखमश्नुते ॥

Colophon :

इति श्रीधर्मसंहितायामष्टाविंशोऽध्यायः । इति श्रीधर्मसंहिता समाप्ता ।

இது ரெட்டை ரோபான ரீ புறபஞான எழுதது. உ.

Author—Vyasa

Remarks—The Ms consists of 20 chapters It is very old and partly damaged

---

॥ धर्मसंहिता ॥

179 DHARMASAMHITĀ

Substance—Palm leaf Size—19 × 2" Leaves—76
8 lines per page and 54 letters per line
Script—Malayālam No of Granthas—2050

Subject—Same as No 178

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

सच्चिदानन्दरूपाय विष्णवे परमात्मने ।

* * * *

End

एतत्ते सर्वमाख्यातं धर्मं श्रेयस्करं नृणाम् ।
भवता विदुषा सम्यक् श्रुतं यद्विदितं मया ॥
भक्त्या भजस्व सततं परमात्मानमव्ययम् ।
अज्ञानतिमिराघ्नं व्याप्तमन्तर्बहिः सदा ॥
तिले तैलं जले स्रोतः काष्ठे वह्निर्मणौ प्रभा ।
तथा सर्वेषु भूतेषु परमात्मा व्यवस्थितः ॥
अष्टौ पालाश्च कथिताः कलौ केरल्यामिद्धये ।
हरिपादा .. ..

युगत्रयेऽप्यतिक्रान्ते धर्माचारपरे तथा ।
प्राप्ते कलियुगे घोरे क्व विष्णुर्भगवानिति ॥
दिवं याते महाराजे रामे दशरथात्मजे ।
दुष्टराजन्यभारेण पीडिते धरणीतले ॥
देवानां कार्यसिद्ध्यर्थं देवो भारावतारणात् ।
वसुदेवकुले साक्षादाविर्भूते जनार्दने ॥
नन्दगोपगृहे देवे पूतनास्तनशोषिते ।
घातिते च तृणावर्ते शकटे परिलोडिते ॥
दमिते कालिये नागे प्रलम्बे च निषूदिते ।
धृते गोवर्धने शैले परित्राते च गोकुले ॥

End:

श्रुत्वैतत् पुण्यमाख्यानं गां च दद्यात् पयस्विनीम् ।
रम्यां वा माहिषीं विद्वान् विष्णुमुद्दिश्य दापयेत् ॥
भूमिदानं प्रकर्तव्यं जन्मनः श्रेय इच्छता ।
वाचकाय च वस्त्राणि स्वर्णालङ्कार (ए?मे)व च ॥
यथा विष्णुं तथा व्यासमभेदेनैव पूजयेत् ।
विष्णुवाचकसंयोगाद्यथोक्तं लभते फलम् ॥
वैष्णवः प्राप्यते व्यासः पूर्वपुण्यप्रभावतः ॥
श्रद्धया श्रावयेद्यस्तु श्रद्धया वै शृणोति यः ।
यथोक्तं लभते पुण्यं नात्र कार्या विचारणा ॥
पुण्यं यशस्समायुष्यं रोगघ्नं कीर्तिवर्धनम् ।
यच्छ्रुत्वा तु नरो राजन् सर्वपापैः प्रमुच्यते ॥

Colophon:

इति श्रीपद्मपुराणे द्वारकामाहात्म्यं नाम द्वादशोऽध्यायः ।

इति श्रीस्कान्दपुराणे द्वारकामाहात्म्ये प्रह्लादप्रोक्तायां संहितायां पञ्चचत्वारिंशोऽध्यायः ।

श्रीकृष्णाय नमः । द्वारकामाहात्म्यं सम्पूर्णम् । श्रीगुरुभ्यो नमः । हरिः ॐ ।

श्रीकृष्णार्पणमस्तु । वासुदेवार्पणमस्तु ।

Authoi .

Remarks—This work is included in the Skānda-purāna But the colophons of chapters 12 and 15 evince its inclusion in the Padmapurāna

॥ धर्मसंहिता ॥

178 DHARMASAMHITĀ

Substance—Palm leaf Size—8 × 2 Leaves—91 12 lines per page and 25 letters per line Script—Grantha No of Granthas 1700 Incomplete

Subject—The description of the merits of the holy things connected with Visnu

Beginning

सच्चिदानन्दरूपाय विष्णवे परमात्मने ।
नमः सर्वा .... रत्नाय सदसद्व्यक्तिहेतवे ॥
शुद्धस्फटिकसङ्काशां सर्वाभरणभूषिताम् ।
वन्दे सरस्वतीं वाक्स्थां वाञ्छितार्थोपलब्धये ॥
महर्षेः सर्वलोकेषु पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥

Colophon:

इति धर्मसंहितायां त्रयोविंशोऽध्यायः ।

Author—Same as No. 178.

Remarks—The Ms. extends upto a portion of chapter 24.

॥ धर्मसंहिता ॥

180. DHARMASAMHITA.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—100. 6 lines per page and 23 letters per line. Script—Malayāḷam. No. of Granthas—860.

Subject—Same as No. 178.

Beginning—Same as No. 179.

End:

सुलभं श्रीधरं पुंसां सुलभं तु जनार्दनम् ।
सुलभं गारुडं तद्वल्लक्ष्मीनारायणं क्षितौ ॥
दुर्लभं वासुदेवाख्यं दुर्लभं हरिहरात्मकम् ।
सुलभा मूर्तयः सर्वा लक्ष्मीनारायणं विना ॥
लक्ष्मीनारायणो यत्र देवस्तिष्ठति मुक्तिदः ।
तत्रैवैश्वर्यफलदा लक्ष्मीरास्ते हरिप्रिया ॥
सालग्रामशिलामात्रम्... ... ...

Colophon:

इति धर्मसंहितायां पञ्चदशोऽध्यायः ।

Author—Same as No. 178.

Remarks—The Ms. ends abruptly on chapter 18 (Sālagrāmalakṣana).

॥ नयमञ्जरी (श्रुतिगीताव्याख्या) ॥

181. NAYAMAÑJARĪ.

Śrutigītādhyāya.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—27. 9 lines per page and 25 letters per line. Script—Malayālam. No. of Granthas—400. Incomplete.

Subject—An elucidative gloss on the panegyric of Śrīkṛṣna, identification with whom is the final goal of all *Vedas*.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

चिदेकरसनिर्भेदसदानन्दसुधार्णवः ।
जयत्युपनिषत्प्राणवल्लभो वल्लवीसुतः ॥

दुर्गाहपङ्कपथपाथसि नूतनाना-
भङ्गीतरङ्गिणि निगूढमहार्थरत्ने ।
अस्मिन् प्रबन्धजलधौ मुनिवल्लभस्य
धाष्टर्यं विमोढ्यमथवा विजिगाहिषा मे ॥

तथापि गुरुपादाब्जद्योत्मिद्धधिया मया ।
वेदस्तुतेरियं व्याख्या क्रियते नयमञ्जरी ॥

ब्रह्मन्नित्याद्याख्यानस्य स्कन्धेऽस्मिन् प्रासङ्गिकी सङ्गतिः । तथा-हि भक्तानुग्रहाय गृहीतमूर्तेः कृष्णस्य चरितमिहाधिक्रियते ।

End :

तत उदगाद् अनन्तं तव धाम शिरः परममिति । ततः हृदयादूर्ध्वं तव धाम शिरः अगात् अपासर्पत् प्राप्तमित्यर्थः । अत्राप्युपासनानुकर्षः । अपरे शिरः परमं धामोपासत इत्यभिप्रायः । अत्र चोदरादिषु परमं धामेति बुद्धिर्विधीयते । न तु धामन्युदरादिबुद्धिः । श्रुतौ ब्रह्मणीतिकारावच्छेदादुत्कृष्टत्वाच्च धाम्नः आसां चोपासनानां यद्विशेषेण विधानं विवक्षितम्, तर्हि पुनरिह यत् समेत्य न पतन्ति कृतान्तमुख इति धाम्नो विशेषणम् । अथ यच्छ्रूयते ततः शिरोऽभवत् । तच्छिरसः शिरस्त्वमिति शिरोनिर्वचनश्रवणात् । श्रयन्तेऽस्मिन् शिरः । एवमेवैतच्छिरसः शिरस्त्वम् ।

Colophon :

Author—Lakṣmīdhara.

Remarks—The author of Nayamañjarī and Amṛtataraṅgiṇī is the same person.

॥ नरसिंहपुराणम् ॥

182. NARASIMHAPURĀṆAM.

Substance—Palm leaf. Size 22″×2″. Leaves—87. 8 — 9 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—2950. Incomplete.

Beginning

गणपतये नमः ।

नखमुखाविलिखितादितितनयोरःपरिपतदसृगरुणीकृतगात्रम् ।
हिमधरगिरिरिव गैरिकयुक्तो

... . ॥
... .
.... रगाः ।

त्रिकालज्ञा महात्मानो नैमिशारण्यवासिनः ।
येऽर्बुदारण्यनिरताः पुष्करारण्यवासिनः ॥
महेन्द्राद्रिरता ये च ये च विन्ध्यनिवासिनः ।
जम्बू ....

शौनकस्य महा(त ? स)त्रे वाराहाख्या तु संहिता ।
त्वत्तः श्रुता पुरा सूत एतैरस्माभिरेव च ।
साम्प्रतं नारसिंहाख्यां त्वत्तः पौरा .. ॥

End

पुराणं नारसिंहाख्यं मया च कथितं तव ।
मुनीनां सन्निधौ पुण्यं स्वस्ति वोऽस्तु व्रजाम्यहम् ॥

सर्वपापहरं पुण्यं पुराणं नृहरेरिदम् ।
पठतां शृण्वतां नृणां नारसिंहः प्रसीदति ॥
प्र(सीदे?सन्ने) देवदेवेशे नृणां पापक्षयो भवेत् ।
प्रक्षीणपापबन्धास्ते मुक्तिं यान्ति नराः पुनः ॥

यो नारसिंहं वपुराश्रितः पुरा
हिताय लोकस्य दितेः सुतं युधि ।
नखैः सुतीक्ष्णैर्विददार वैरिणं
दिवौकसां तं प्रणमामि केशवम् ॥
प्रोज्जृम्भद्भिन्नभास्वत्पृथुललितसटाच्छादितार्केन्दुमार्गः
पातालप्राप्तपादप्रतरतमनखप्रोत ....

Colophon:

इति नारसिंहपुराणे प्रथमोऽध्यायः ।

Author:

Remarks—The Ms. begins on Fol. 146 (ञ ह्र हा) and ends on Fol. 232 (ञ ञ ल न्न). Narasimhapurāṇa comprises 62 chapters. The Ms. is about 300 years old and decayed. The work is complete.

॥ नरसिंहपुराणम् ॥

183. NARASIMHAPURĀṆAM.

Substance—Palm leaf. Size—14″×2″. Leaves—98. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—182.

Subject—Beginning—End—Same as No. 182.

Colophon:

इत्यादिमहापुराणे श्रीनारसिंहे पुराणे पारम्पर्यवर्णनं नाम द्विषष्टितमोऽध्यायः । नारसिंहपुराणे सिंहाभिधायकं चतुर्वर्गफलायत्तं समासं नातिविस्तरम् ।

* * * *

श्यामावदातमरविन्दपलाशनेत्रं
बन्धूकपुष्पसदृशाधरपाणिपादम् ।
सीतासहायमजितं धृतचापबाणं
रामं नमामि शिरसा रमणीयवेषम् ॥
श्रीगुरुभ्यो नमः । शुभं भवतु ।

Author:

Remarks—This Ms. is well preserved.

॥ नारसिंहपुराणम् ॥

184. NĀRASIMHAPURĀNAM.

Substance—Palm leaf. Size—19″ × 2″. Leaves—49. 13 lines per page and 72 letters per line. Script—Malayālam. No. of Granthas—2900. Complete.

Subject—*Beginning*—*End*—*Same as No. 182.*

Colophon:

इति श्रीनारसिंहे पुराणे द्विषष्टितमोऽध्यायः । नारसिंह-पुराणं समाप्तम् । श्रीनारसिंहाय नमः । शुभमस्तु ।

Author:

Remarks—The closing portion and the colophon are slightly different from No. 183.

॥ पददीपिका (भारतव्याख्या) ॥

185 A. PADADĪPIKĀ.

A commentary on the Mahābhārata.

Substance—Palm leaf. Size—12″ × 2″. Leaves—206. 10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—6200. Incomplete.

Subject—An elaborate exposition of the Mahābhārata (Sabhāparva).

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

"न भावयेत् परिभवं परिभूतोऽप्रतिक्रियम् ।
कष्टानुबन्धपाकं वा नीतिशास्त्रविशारदः ॥"

इति न्यायमनुसृत्य धार्तराष्ट्रकृतं विषान्नप्रदानादिकं, पाण्डवाः क्षान्तवन्तः दुर्बलत्वान्न इति मत्वा जनमेजयस्य तेषु बहुमतिरासीत् । तस्मात् पाण्डवानां चरितं श्रोतु (मि ? मै)च्छदिति आदिश्लोकस्य सम्बन्धः । अर्जुनो जयतां श्रेष्ठः इत्यादि । अर्जुनः किं चकार, तन्मे महि इत्यन्वयः ।

'अर्जुनो वासुदेवश्च दानवश्च मयस्तथा ।'

इत्युक्तत्वात् अर्जुनः पूर्वप्रस्तुतः । तस्मादर्जुनः क्रमेणार्जुनविचारः क्रियते । 'वीर्यश्रेष्ठा राजान' इति वचनाद् वीर्याधिकश्च स एव । तथा च पूर्वप्रसङ्गविरोधः ।

End :

एवं मा कुर्वेत्युक्त्वा संताड्य शिक्षयति—विभा......चारि-

ऱ्यशुद्दम् । निघ्नानकं जनमसम्मर्दम् । पुत्रहितेप्सुना पुत्रस्यैश्वर्यमिच्छता । अत्र यो दरोदराख्याताद् घृतान्न्यूनतमः पणः विनाशान्ते काले तुमुलं युद्धं विभावरीं तेजस्विनीं स्त्रीधर्मिणीं रजस्वलामित्यर्थः । निघ्नानकम् ഒരികൃള്ള ശബ്ദം.

Colophon :

इति सभापर्वणि पददीपिकायां प्रथमः ।

इति सभापर्वव्याख्याने कृष्णगीतं न... ...ततमोऽध्यायः ।

इति सभापर्वव्याख्या समाप्ता ।

ऐश्वर्यमद्भुतं यस्य धर्मस्थित्यर्थमेधते ।

अजन्मने नमस्तस्मै वासुदेवाय (ते) नमः ॥

കൊല്ലം-മാണ്ടു ചിങ്ങമാസം ൭൦൧൭- എഴുതിത്തീൎത്ത വറന്ലൂർ ൽ ഇട്ടിയാദി.

Author :

Remarks—The Ms. begins from Fol. 48 (सप्र). The occasional elucidation of words in Malayālam suggests that the commentator was a native of Malabar. Vyākhyānaratnāvali, another commentary on the Bhārata, is also included in this Ms. and catalogued as 185 B.

॥ व्याख्यानरत्नावलिः (महाभारतभीष्मपर्वव्याख्या) ॥

185 B. VYĀKHYĀNARATNĀVALI.

Substance—Palm leaf. Size—12"×2". Leaves—46. 9 lines per page and 42 letters per line.

Script—Malayāḷam. No. of Granthas—1100. Incomplete.

Subject—An elaborate exposition of the Bhārata introducing the initial words of the text.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आजाननिर्वाणगपि यत्प्रसादा-
दाजानगीर्वाणगिरामपीष्टे ।
आद्यां जगत्पूज्यतमामनन्ता-
मुपासहे तामपि वागधीशाम् ॥

उद्योगान्ते कुरुक्षेत्रे कुरुपाण्डवसैन्यानि समवेतानीत्युक्तम् । तद्विस्तारबुभुत्सया जनमेजयः पृच्छति—कथमिति । वीराः । परिपन्थिनिरासेन साम्राज्यं स्वीकरिष्याम इति निश्चितवन्त इत्यर्थः । कुरुपाण्डवसोमकाः कुरवश्च पाण्डवसोमकाश्च इति विभागः । कुरुपाण्डवा इति पृथक् सोमकग्रहणं सोमकबाहुल्यादित्यवसेयम् । पार्थिवश्चेति चकारेणान्ये राजानः समुच्चीयन्ते । महात्मानः धृतिमन्तः ।

End:

अक्षिगतो द्वेष्यः दर्शनमात्रे द्वेष्यः । मन्युश्च दैवकृत इत्याह । विदिताश्चेत् पुरस्ताद् युद्धं निवारय । किमिति विवक्षायां वदति अज्ञेयम् इति । पश्चात् तान् सहामहे वारयामहे । यद्येवं तद् युद्धं किमर्थं क्रियत इत्यपेक्षायां तन्मरणार्थमित्याह—सर्वपात्रेषु (समं) वृत्तवान् समवर्ती । अहमपि रणे कृतकर्मा निर्मन्युः गतसंरम्भश्चाभवम् । एवं भवन्नहमपि युद्धं कृत्वाशाम्यमित्यर्थः । त्वं च तथा कुर्विति भावेन वदति अहमिति । तद् युद्धम् ।

इत्युक्तवन्तं गाङ्गेयमभिवन्द्य प्रसाद्य च ।
राधेयो रथमारुह्य प्रायात्तव सुतं प्रति ॥

Colophon :

इति भीष्मपर्वणि विद्यासागरविरचितायां व्याख्यानरत्नावल्यां प्रथमः ।

भीष्मपर्वव्याख्यानं समाप्तम् । सप्तशततमः ।

Author—Vidyāsāgara.

Remarks—This *commentary is succinct* and concise.



॥ पुरञ्जनोपाख्यानम् (केरलभाषाव्याख्योपेतम्) ॥

186. PURAÑJANOPĀKHYĀNAM.

With a commentary in Malayālam.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—109. 8 lines per page and 30 letters per line. Script—Malayālam. No. of Granthas—1650. Complete.

Subject—The episode of King Purañjana and his comrades who were exposed to untold miseries and sufferings.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

आसीत् पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः ।
तस्याविज्ञातनामासीत् सखा विज्ञातचेष्टितः ॥

व्या– राजन् बृहच्छ्रवाः पुरञ्जनो नाम राजासीत् । तस्य अविज्ञातनामा विज्ञातचेष्टितः सखा आसीत् ।

പുരം ശരീരം അതിനെ ജനിപ്പിക്കുന്ന ആത്മതേജസ്സ അഭിവ്യക്തമാക്കുന്ന എന്നിട്ട് പുരഞ്ജനൻ ജീവൻ. ബൃഹച്ഛ്രവസ്സ് - സുപ്രസിദ്ധൻ - രാജാവു് പ്രകാശനനജൻ. സംബുദ്ധി-അവന്നു് അവിജ്ഞാതനാമാവു് അവിഭൃമാനനാമൻ. വിജ്ഞാതചേഷ്ടിതൻ = പ്രസിദ്ധജഗൽസൃഷ്ട്യാദിവ്യാപാരൻ. അങ്ങനത്ത ഈശ്വരൻ സഖിയായി ഭവിച്ചു. അവിജ്ഞാതചേഷ്ടിതൻ നിഷ്ക്രിയൻ എന്നാകിലുമാം.

सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ।
नानुरूपं यदाविन्ददभूत् स विमना इव ॥

स शरणमन्वेषमाणः इमां पृथिवीं बभ्राम । यदा अनुरूपं नाविन्दत् तदा स विमना इवाभूत् ।

അപ്പുരഞ്ജനൻ തനിക്ക ശരണത്തെ അന്വേഷ(ണ)മാണനായി ഈ പൃഥിവിയെ മുഴുവൻ ഭ്രമിച്ചു.

End:

अध्यात्मपारोक्ष्यमिदं मयाभिहितमद्भुतम् ।
एवं त्र्यश्याशयः पुंसश्छिन्नोऽमुत्र च संशयः ॥

अद्भुतमध्यात्मपारोक्ष्यं मया अभिहितम् । एवं पुंसस्त्र्यश्याशयः अमुत्र यः संशयः छिन्नः ।

അത്ഭുതമായിരിക്കുന്ന ഈ അധ്യാത്മപാരോക്ഷ്യം എന്നാൽ അഭിഹിതമായി. ഇങ്ങനെ ത്ര്യാശയം ത്രയീബുദ്ധിതാപഹിതനായിരിക്കുന്നവന്റെ ആശയം ആഹതമാം അത്ര ഛിന്നമാകുന്നു. അമുത്ര പരലോകങ്ങളിൽ കർമ്മഫലഭോഗം എന്നതെക്കുറിച്ചുള്ള സംശയവും ഛിന്നമായി.

Colophon:

इति चतुर्थे पुरञ्जनोपाख्यानं नाम सप्तविंशः सर्गः । शुभमस्तु ।

Author:

Remarks—This Ms. comprises chapters 25—29 in the 4th *Skandha* of the Bhāgavata. The prose order of each verse precedes its explanation in Malayālam. The language denotes the development of the Manipravāla style. The commentary is lucid from the 10th verse in the 25th chapter of the 4th *Skandha.*

॥ पुराणसङ्ग्रहः ॥

187. PURĀṆASAṄGRAHA.

Substance—Palm leaf. Size—22½″ × 2″. Leaves—264. 8 lines per page and 76 letters per line. Script—Malayālam. No. of Granthas—10032. Complete.

Subject—A compilation of *Purāṇic* anecdotes.

Beginning:

श्रीगणपतये नमः ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

हरिः श्रीः ।

... ...

एकदा मुनयः सूतं सुखासीनं हृताशयाः ।
पप्रच्छुरादृता हृष्टाः श्रुत्वा भागवतामृतम् ॥
सूत सूत महाप्राज्ञ वद नो वदतां वर ।
यत्तु पृच्छाम सन्देहात् त्वदुक्तेषु महामते ॥
अष्टादशपुराणेषु... ... ... ।
... ...त्ता सत्यवतीसुतः ॥
त्वयोक्तः सर्ववेदज्ञो भारतस्यापि वै मुनिः ।
प्रतिपाद्या भवेदेका देवता ह्येककर्तृके ॥
दृश्यते मतभेदोऽत्र कथं तदनुवर्णय ।
प्रतिपाद्यो हरिः क्वापि द्वापरश्च चतुर्मुखः ॥

End :

... .परस्य परमात्मनः ।
स्वरूपं परमार्थज्ञ परं वेदान्तनिश्चितम् ॥
विज्ञानं परमं शुद्धं.... ....
... ...रूपं तत् परमात्मनः ॥
सूक्ष्मं च हृदयाम्भोजे चिन्त्यते यन्मुमुक्षुभिः
प्रणवेन... ... ... ॥
... ... ।
... ...सर्वं गमायणादपि ॥
य इदमखिलमादरेण भक्त्या
पठति शृणोति च नित्य... ।

Colophon :

ब्रह्मप्रतिपादनं नाम त्र्यधिकशततमोऽध्यायः । पुराणसङ्ग्रह... ।


...लिखितमधुना पुस्तकं ध्वस्तदोषं
वीक्षापूर्वं विदधत सदा बुद्धिमन्तो महान्तः ।


इति द्रोणपर्वणि भीमसेनप्रवेशे कर्णपलायनं नाम सप्तविंशच्छततमोऽध्यायः । हरिः । हरिः । श्रीकृष्णाय नमः । हरिः ॥

Remarks—The Ms. though old is in good condition.

॥ भारतम् ॥

351. BHĀRATAM.

Substance—Palm leaf. Size—9″ 2″. Leaves—647. 8 lines per page and 46 letters per line. Script —Grantha. No of Granthas—15000.

Colophon:

इति शल्यपर्वणि षट्पञ्चाशोऽध्यायः । शुभमस्तु ।

Remarks—Droṇaparva extends over 546 FF. and Śalyaparva, 101. The former contains 198 chapters and the latter 56, against 203 and 66 respectively in the printed book. Variants in reading are also noticeable.

॥ भारतम् ॥

352. BHĀRATAM.

Substance—Palm leaf. Size—19″ × 2″ Leaves—312. 11 lines per page and 58 letters per line. Script —Grantha in the Dronaparva and Malayāḷam in the rest. No. of Granthas—13000.

Colophon :

इति भारते स्त्रीपर्वणि उदकप्रदानं नाम सप्तविंशोऽध्यायः । इति स्त्रीपर्व समाप्तम् । शुभमस्तु ।

Remarks—In some parvas difference are to be noted between the number of chapters in the Ms. and that in the printed book. Here is a table showing the No. of chapters in each :—

	Ms.	Printed book.
Dronaparva	198	203
Karṇa ,,	100	101
Śalya ,,	56	66
Gadā ,,	11	11
Sauptika ,,	9	9
Strī ,,	27	27

Leaves comprising chapters 78—85 are decayed.

॥ भारतम् ॥

353. BHĀRATAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—152. 10 lines per page and 46 letters per line. Scrip.—Malayālam. No. of Granthas—4500.

Colophon:

इतिं श्रीमहाभारते शतमहस्रिकायां संहितायां कर्णपर्वणि शताधिकनवमोऽध्यायः । कर्णपर्व समाप्तम् ... .

காசமிக ௵ பார்த்திவ வருஷம் தைமா எழுதிமுகிந்த கர்ணபர்வம் ஆக்தங்கரை வெங்கிடேசுவராவதானி எழுத்து.

Remarks—This Ms. contains 109 chapters.

॥ भारतम् ॥

354. BHĀRATAM.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—213. 10—11 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—5300.

Colophon:

इति महाभारते शतसहास्रिकायां संहितायां स्त्रीपर्वणि सप्तविंशोऽध्यायः । शुभमस्तु ।

Remarks—Variant readings are seen in the Ms.

॥ भारतम् ॥

355. BHĀRATAM.

Substance—Palm leaf. Size—13" × 1½". Leaves—100. 8 lines per page and 48 letters per line. Script—Grantha. No. of Granthas—2600.

Colophon:

इति स्त्रीपर्वणि सप्तत्रिंशोऽध्यायः ....

.......................नमः । हरिः ॐ शुभमस्तु ।

Remarks—The Ms. is very much decayed and hence almost unreadable.

॥ भारतम् ॥

356. BHĀRATAM.

Substance—Palm leaf. Size—19½" × 2". Leaves—216. 10 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—6900.

Colophon:

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां शान्तिपर्वणि राजधर्मे मित्रभुक्कृतघ्नोपाख्यानं नाम एकसप्ततितमोऽध्यायः । श्रीवेदव्यासाय नमः । हरिः ॐ । शुभमस्तु । गुरुभ्यो नमः । राजधर्म ... ...

Remarks—Śāntiparva contains 175 chapters against 130 in the printed book.

॥ भारतम् ॥

357. BHĀRATAM.

Substance—Palm leaf. Size—22½" x 2¼". Leaves—218. 7—8 lines per page and 66 letters per line. Script—Malayāḷam. No. of Granthas—6750.

Colophon :

इति मोक्षधर्मे नागवाभिगमनं नाम एकोनाशीतिशतत-मोऽध्यायः ।

Remarks—The Ms. is much decayed and begins only from the 21st chapter on Fol. 32. The last Fol. exists only in part and hence the end is taken from the penultimate Fol. There is a difference of 17 chapters between this and the printed book.

॥ भारतम् ॥

358. BHĀRATAM.

Substance—Palm leaf. Size—18¾" x 1¼". Leaves—262. 6—8 lines per page and 52 letters per line. Script—Tamil Grantha No. of Granthas—6000.

Colophon :

इति शान्तिपर्वणि मोक्षधर्मे त्रिषष्टिशततमोऽध्या(यः) ।

Remarks—The Ms. has lost many leaves owing to

decay and begins from chapter 362 of the Mokṣadharmaparva in Sāntiparva. Thereafter is seen the beginning of the same parva which extends to chapter 164. The first five verses seen in the printed work are omitted herein. The colophon given is the one seen at the end of chapter 163.

॥ भारतम् ॥

359. BHĀRATAM.

Substance—Palm leaf. Size—$20\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—424. 4 lines per page and 24 letters per line. Script—Tamil Grantha. No. of Granthas—2550

Colophon :

... ... मोक्षधर्मेऽष्टनवतितमोऽध्यायः ।

Remarks—The Ms. covers chapters 29--98 of the Moksadharmaparva. It is very much decayed. The letters are bold The closing chapter in the Ms corresponds to 105 in chapter the printed book.

॥ भारतम् ॥

360. BHĀRATAM.

Substance—Palm leaf. Size—28½" × 2". Leaves—235. 9—11 lines per page and 100 letters per line. Script—Grantha. No. of Granthas—15000.

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यां शान्तिपर्वणि मोक्षधर्मे उञ्छवृत्त्युपाख्यानं नाम चतुस्त्रिंशच्छततमोऽध्यायः ।

காகவௌரு ஆவணிமீ௴ கா தி பாரதகிரந்தம் எழுதி முடிந்தது.

श्रीमीनाक्षीसुन्दरेश्वरार्पणमस्तु । शुभमस्तु ।

Remarks—The Ms. is in good condition.

॥ भारतम् ॥

361. BHĀRATAM.

Substance—Palm leaf. Size—21½" × 2½". Leaves—102. 10 lines per page and 80 letters per line. Script—Grantha. No. of Granthas—4600.

Colophon :

इत्यानुशासनिके च्यवनकुशिकसंवादो नाम एकोननवतितमोऽध्यायः ।

Remarks—The Ms. contains 89 chapters. Some leaves in the middle are damaged. In the

पर्वाणि भीष्मस्वर्गारोहणं नाम द्विपञ्चाशद्द्विशततमोऽध्यायः ।
श्रीकृष्णार्पणमस्तु । श्रीकृष्णार्जुनाभ्यां नमः । शुभमस्तु ।

Remarks—The Ms. is very old.

॥ भारतम् ॥

364. BHĀRATAM.

Substance—Palm leaf. Size—{ 18″ × $1\frac{1}{2}$″. Leaves—125. / $19\frac{1}{4}$″ × $1\frac{1}{2}$″—Leaves—73.

7—8 lines per page and 46—54 letters per line.

Script—Tamil Grantha. No. of Grathas—4600.

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यामाश्वमेधिके पर्वणि वैष्णवधर्मशास्त्रे पञ्चाधिकशततमोऽध्यायः । इत्याश्वमेधिकः समाप्तः । हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । श्रीकृष्णाय नमः । श्रीरामाय नमः ।

கூ௯௨ ஞு பிங்கள ஞு வைகாசி மீ ௩௰௧ ௨ குருவாரம் பூரநட்சத்திரம் அவ எட்டுநாழிகை அ ..... லெ வைஷ்ணவ தர்மசாஸ்திரம் முகிந்தது. சங்கரலிங்கர்.

ग्रन्थोऽपि स्वकीय एव ।

Remarks—The Ms. is old and very much damaged. It is written in a beautiful and neat hand.

---

beginning are seen two verses belonging to some other *parva.*

। भारतम् ॥

362. BHĀRATAM.

Substance—Palm leaf. Size—21¾″ × 2¼″. Leaves —222. 8—10 lines per page and 60—64 letters per line. Script—Malayālam. No. of Granthas—7750.

Colophon :

इति श्रीमहाभारते आनुशासनिके पर्वणि शतमहास्रिकायां संहितायां वैयासिक्यां भीष्मस्वर्गारोहणं नाम द्विपञ्चाशदुद्विशततमोऽध्यायः । श्रीकृष्णाय परब्रह्मणे नमः ।

आनुशासनिकपर्व समाप्तम् ।

Remarks—The Ms. is decayed here and there. It is a continuation of No. 361.

॥ भारतम् ॥

363. BHĀRATAM.

Substance—Palm leaf. Size—16½″ × 1¼″. Leaves—362. 8—10 lines per page and 50—60 letters per line. Script—Malayālam. No. of Granthas —11250.

Colophon :

इति श्रीमहाभारते शतसहास्रिकायां संहितायामानुशासनिके

पर्वणि भीष्मस्वर्गारोहणं नाम द्विपञ्चाशद्द्विशततमोऽध्यायः ।

श्रीकृष्णार्पणमस्तु । श्रीकृष्णार्जुनाभ्यां नमः । शुभमस्तु ।

Remarks—The Ms. is very old.

॥ भारतम् ॥

364. BHĀRATAM.

Substance—Palm leaf. Size—{ 18′×1½″. Leaves—125. / 19¾″×1½″—Leaves—73.

7—8 lines per page and 46—54 letters per line.

Script—Tamil Grantha. No. of Grathas—4600.

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यामाश्वमेधिके पर्वणि वैष्णवधर्मशास्त्रे पञ्चाधिकशततमोऽध्यायः । इत्याश्वमेधिकः समाप्तः । हरिः ॐ । शुभमस्तु । श्रीगुरुभ्यो नमः । श्रीकृष्णाय नमः । श्रीरामाय नமः ।

கூ௱௨உ ௵ பிங்கள ௵ வைகாசி ௴ ௧௰௪ உ குருவாரம் பூரநட்சத்திரம் அவ எட்டுநாழிகை அ...... லெ வைஷ்ணவ தர்மசாஸ்திரம் முடிந்சது. சங்-காலிங்கம்.

ग्रन्थोऽपि स्वकीय एव ।

Remarks—The Ms. is old and very much damaged. It is written in a beautiful and neat hand.

॥ भारतम् ॥

365 BHĀRATAM

Substance—Palm leaf Size—14½ × 2 Leaves —36 10 lines per page and 46 letters per line Script—Malayālam No of Granthas—1035

Colophon

हरि ओम् । शुभमस्तु ।

इत्याश्रम(वास)पर्वणि पट्चत्वारिंशोऽध्यायः । हरिः ॐ । शुभमस्तु । आश्रमवासपर्व समाप्तं सम्पूर्णम् । हरिः । ओम् ।

Remarks—This Ms contains the Āsramavāsika-parva complete It contains 46 chapters, while the printed book comprises only 41 chapters One end of the Ms is worn out Three verses of the next *parva* are also seen after the colophon.

॥ भारतम् ॥

366 BHĀRATAM

Substance—Palm leaf Size—19" × 2½" Leaves—177 9—11 lines per page and 56 letters per line Script—Malayālam No of Granthas—6195

Colophon

इति श्रीमहाभारते शतसहस्रिकायां संहितायां महाभाष्या-

निके तृतीयोऽध्यायः । महाप्रस्थानिकं समाप्तम् । वेदव्यासाय नमः ।

स्वर्गारोहणपर्वणि चतुर्थोऽध्यायः ।

Remarks—This work comprises Aśvamedhika, Āśramavāsika, Mausala, and Mahāprasthānika *parvas*, and five chapters of the Svargārohanaparva. The numbers of chapters in Aśvmedhika and Āśramavāsa differ from those in the printed edition. The FF. comprising Aśvamedhikaparva are separately numbered.

॥ भारतम् ॥

367. BHĀRATAM.

Substance—Palm leaf. Size—12¾" × 2". Leaves—250. 8 lines per page and 50 letters per line. Script—Tamil Grantha. No. of Granthas—6250.

Colophon:

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यां स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः । हरिः ओम् । शुभमस्तु ।

Remarks—The Ms. begins from Aśvamedhika and ends with the Svargārohana *parva*. The readings differ much from those in No. 366. The numbering of pages is in order except in the Āśramavāsa *parva* the pages of which are numbered from 51 to 119. This portion seems

to be a later addition. The Nos. of chapters differ from those in the printed books as in 366.

॥ भारतम् (सनत्सुजातपर्व विवरणोपेतम्) ॥

368. BHĀRATAM.

Sanatsujātaparva with Vivarana.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—73. 6—8 lines per page and 48 letters per line. Script—Malayālam. No. of Granthas—1554.

Beginning :

हरिः। श्रीगणपतये नमः । अविघ्नमस्तु ।

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥

नम आचार्येभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । सनत्सुजातविवरणं संक्षेपतो ब्रह्म जिज्ञासूनां सुखावबोधायारभ्यते । स्वतश्चित्सदानन्दाद्वितीयब्रह्मात्मस्वरूपोऽप्यात्मा स्वाश्रययान्धविषयया अविद्यया स्वानुभवगम्यया स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मभावात् प्रच्युतोऽनात्मनि देहादौ आत्मभावमापन्नोऽप्राप्तात्मपुरुषार्थः साभासया प्राप्तानर्थोऽविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहारं चाकाङ्क्षन् लौकिकैर्वैदिकैः साधनैरनुष्ठितैरपि परमपु-

रूपार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाणः सुरनरतिर्यगादिभेदभिन्नासु नानायोनिषु परिवर्त्तमानो मोमुह्यमानः संसरन् कश्चित् पुण्यवशाद् वेदोदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलोऽनित्यत्वादिदर्शनोत्पन्नेहामुत्रार्थभोगविरागो वेदान्तेभ्यः प्रतीयमानब्रह्मभावं बुभुत्सुर्वेदोदितशमदमादिसाधनसम्पन्नो ब्रह्मविदमाचार्यमुपेत्याचार्यगुणानुसारेण श्रवणादिनाहं ब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो ब्रह्मस्वरूपोऽवतिष्ठत इति वेदान्तमर्यादा । एतत् सर्वं क्रमेण दर्शयिष्यति भगवान् सनत्सुजातः ।

वैशम्पायनः—

ततो राजा धृतराष्ट्रो मनीषी
सम्पूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥

धृतराष्ट्रः शोकमोहाभिसन्तप्तस्त'रति शोकमात्मविदि'ति वदतो वादमुपश्रुत्य ब्रह्मविद्यामृते शोकापनयनमशक्यं मत्वा—

"अनुक्तं यदि ते किञ्चिद् वाचा विदुर विद्यते ।
तन्मे शुश्रूषवे ब्रूहि विचित्राणीह भाषसे" ॥ ......

End

तथाच श्रुतिः तेषामनुभवं दर्शयति—"तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे" इति बृहदारण्यके । "एतत् साम गायन्नास्ते" इति तैत्तरीयके सामगानेन स्वानुभवो दर्शितः आत्मनः कृतार्थत्वद्योतनार्थम् । तथा छान्दोग्येऽपि । तलवकारे चाहमन्नमहमन्नमित्यादिना विदुषा भोक्तृभोग्यरूपं जगत् स्वात्मव्यति-

रेकेण नास्ति इति स्वानुभवो दर्शितः । तत्रैते श्लोका भवन्ति—

नित्यशुद्धबुद्धमुक्तभावमीशमात्मना
भावयन् षडिन्द्रियाणि सन्नियम्य निश्चलः ।
अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणं
ननश्वरं च तद्भरं तमस्तमोनुदं च यत् ।
तत्पदैकवाचकं सदामृतं निरञ्जनं
चित्तवृत्तिदृक्सुखं तदस्म्यहं तदस्म्यहम् ॥

Colophon:

इति श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतसनत्सुजातविवरणे भगवत्पादकृते चतुर्थोऽध्यायः ।

इदं सनत्सुजातीयं पद्मनाभेन लिखितम् ।

ശ്രീ കൃഷ്ണതപഞ്ഞമൂന്നാമാണ്ട് ഇടവമാസം മൂന്നാംതീയതി എഴുതിതീർത്തു. श्रीनारायणाय नमः ।

Author of the commentary—Śaṅkarācārya, as is evident from the colophon at the end of the first chapter.

Remarks—This work contains four chapters in Sanatsujātaparva with the commentary, Vivaraṇa. The commentary is elaborate elucidating the details of Brahmātmavidyā, and giving appropriate quotations from the Upaniṣads. (Refer to C. C. page 693—Sanatsujātiya by Śaṅkarācārya—Oppert II. 6467.) Though this work has been printed in Śaṅkaragranthavali series at Śrīraṅgam many useful readings are noteworthy in this Ms.

॥ भारतम् ॥ (विवरणोपेतम्) ॥

369. BHĀRATAM
with Vivarana.

Substance—Palm leaf. Size—19½"×2". Leaves—32. 10—12 lines per page and 72 letters per line Script—Malayālam. No. of Granthas—1600.

Colophon :

इति श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतसनत्सुजातविवरणे भगवत्पादकृते चतुर्थोऽध्यायः ।

इदं सनत्सुजातीयं शङ्करेण लिखितम् ।
गोविन्दाय मुकुन्दाय वासुदेवाय विष्णवे ।
नारायणाय रामाय हरये परमात्मने ॥
परब्रह्मणे नमः ।

Author—Remarks: Same as No. 368.

॥ भारतम् (भगवद्गीता पदयोजनोपेता) ॥

370. BHĀRATAM.
Bhagavadgītā with Padayojana.

Substance—Palm leaf. Size—14¾"×2". Leaves—84. 13 lines per page and 60 letters per line. Script—Malayālam. No. of Granthas—1100.

Beginning:

हरि: । श्रीगणपतये नमः ।

श्रीरामादिदशावतारसमये रक्षोवधं कुर्वता
कृष्णे जन्मनि राजगोपललनासक्तेन यद्दुष्करम् ।
तन्मोक्तुं हरिरेव जीवकलया मानन्दमाविर्बभौ
ब्रह्मानन्दसरस्वतीति यतिराण्णीलाद्रिसिंहासने ॥
श्रीमत्याकुचकुङ्कुमाङ्कितनिजश्रीवत्समाच्छादयन्
लीलानीलसरोरुहेण च लसद्बिम्बाधरोरुक्षतम् ।
वेणुक्वाणमिषेण तत्प्रकलने मद्वाचमभ्यान्मुदा
व्याकोचाननकञ्जमञ्जुकुहनागोपालभूपालकः ॥
नारायणं ब्रह्मवसिष्ठशक्तीन् पराशरव्यासशुकान् मुनीन्द्रान् ।
श्रीगौडपादान्वययोगिवर्यान् गोविन्दपूज्यानथ शङ्करार्यान् ॥
सुरेश्वरांस्त्रोटकपद्मपादान्नमामि हस्तामलकान् गुरून् मे ।
वन्दारुवृन्दमन्दारान् सनन्दकशुकोपमान् ।
चिदानन्दानहं वन्दे पूर्णानन्दसरस्वतीन् ॥
वृन्दारकपदं गत्वा मन्दारकुसुमान्यहो ।
येनानीतानि तं वन्दे पुरुषोत्तमयोगिनम् ॥
यस्मै प्रसन्ना कामाक्षी क्षीरान्नं कृपया ददौ ।
लब्धापदानं तं नौमि शिवरामसरस्वतीम् ॥
सर्वातिशायिने वीतमायिनेऽभीष्टदायिने ।
गोपालानन्दसंज्ञाय कस्मैचिन्महसे नमः ॥
स्वयंप्रकाशकानन्दश्रीपादगुरुपादयम् ।
अखण्डानन्दफलदं कृपामूलमुपाश्रये ॥
श्रीनीलाचलनाथपादयुगलीहेमाब्जनीलाभृता(?)
नाग्रह्माण्डजमद्बुद्धिजागतसुवर्णाच्छादनालेकृतान् ।

नानामस्तकुलहंसपक्षकलनात् सम्पोषितान् मद्गुरून्
ब्रह्मानन्दसरस्वतीपरमहाहंसान् प्रशंसाम्यहम् ॥

प्रालेयाचलसेतुमध्यनिवसच्छात्त्रोल्लसज्जूटिका
लोकालोकमहीध्रभूषितशिरोभूषामणीपेटिका ।
दीनानूननिधानदानतुलनासन्तानसद्वाटिका
ब्रह्मानन्दपदारविन्दयुगली पायाज्जयद्घाटिका ॥

अविघ्नशुभदं भूयाद् भूयो वैनायकं महः ।
गेयं ध्येयममेयं यदवाङ्मनसगोचरम् ॥
रामायणं तु व्याख्याय रामचन्द्रसरस्वती ।
करोति गीताव्याख्यां ममाख्येयां तत्त्वदीपिकाम् ।
भाष्यं पैशाचिकं दृष्ट्वा शाङ्करीयं च टिप्पणम् ॥
श्रीधरीयं समालोच्य लिख्यते पदयोजना ।

श्रियः पतिरखिलजगदुत्पत्तिस्थितिहेतुभूतः स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःसौशील्यापारकारुण्यप्रभृत्यसंख्येयकल्याणगुणरत्नरत्नाकरः सच्चिदानन्दात्माऽमनसगोचराखण्डैकरसस्वरूपो भगवान् वासुदेवः कुरुपाण्डवयुद्धे धनञ्जयसाहवो माहात्म्यादनव्याजेन लोकानुग्रहार्थं परमपुरुषार्थलक्षणतया ज्ञानयोगमवतारयामास । तमर्थमेवात्र भगवान् बादरायणः श्लोकसप्तशत्या विरचयन्नादौ तावत् तदुचितकथां प्रस्तौति—

"श्रीकृष्णरचितानेव श्लोकान् व्यासोऽत्र भूरिशः ।
विलिख्य तत्सङ्गतये कांश्चिद्रचितवान् स्वयम् ॥"
इत्युक्तेर्भगवत्प्रोक्तश्लोकानां गणनोच्यते ।
सर्वलक्षणया श्लोका गीता भगवतात्र हि ॥

15

श्लोकं पञ्चशतीं प्राह त्रिसप्तत्युत्तरां हरिः ।
पार्थश्चतुरशीतिं च त्रिंशतं सञ्जयोऽब्रवीत् ॥
धृतराष्ट्रः श्लोकमेकं नवश्लोकीं सुयोधनः ।
अष्टाचत्वारिंशदुक्ता अध्याये प्रथमेऽखिलाः ॥

* * * *

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

हे सञ्जय धर्मक्षेत्रे पुण्यभूमौ कुरुक्षेत्रे मामकाः मत्पुत्राः पाण्डवाः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तः समवेताः मिलिताः सन्तः किमकुर्वत किं चक्रुः ॥

End:

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥

हे राजन् अत्यद्भुतं हरेः श्रीकृष्णस्य तद् रूपं विश्वरूपं संस्मृत्य संस्मृत्य ध्यात्वा ध्यात्वा मे मम महान् विस्मयः आश्चर्यं भवति । पुनः पुनः हृष्यामि च । किमत्र बहुनोक्तेन ।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

यत्र यस्मिन् पक्षे योगेश्वरः योगमायेश्वरः कृष्णः, यत्र यस्मिन् पक्षे धनुर्धरो गाण्डीवधन्वा पार्थः तत्र तस्मिन् पाण्डवानां पक्षे श्रीः राज्यलक्ष्मीः ध्रुवा स्थिरा तत्रैव विजयः ध्रुवः तत्रैव भूतिः श्रियो विशेषविस्तारः ध्रुवा तत्रैव नीतिः नयः ध्रुतिर्वा इति मे मम मतिः निश्चयः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्यश्रीरामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनासमाख्यायां सकलशास्त्रपरमार्थतत्त्वनिर्णयमोक्षयोगो नाम अष्टादशोऽध्यायः । श्रीकृष्णाय नमः ।

यस्यच्छात्रनिशान्तशान्तशकुनैर्दान्तातिदान्तैर्मृगै-
ब्रह्माहं चिदहं चिदेकरस एवास्मीति वा पठ्यते ।
यस्यानुग्रहलेशमात्रविभवान्मूकोऽपि वाग्मी भवेद्
ब्रह्मानन्दसरस्वतीति यतिनां राजा स मे राजते ॥
श्रीकृष्णाय नमः । शुभमस्तु ॥

Author—Com. Sri Ramacandrananda Sarasvati

Remarks—The commentator propitiates his preceptor Brahmanandasarasvati both at the opening and at the close of his work The latter preceptor was a devotee of Śrī Nīlācalanātha The line "रामायण तु व्याख्याय रामचन्द्रसरस्वती" bears out that he had written a commentary on the Rāmāyana The Nilācala referred to here is a hill at Gauhati in Assam (Vide p 140, Geographical Dictionary) There is a shrine dedicated to Kāmākṣidevi, invoked by the author at the beginning of his work The commentary explains the meaning of all the words in the Gitā, and hence the title Padayojanā He acknowledges his indebtedness to the Sankara

Bhāṣya, Śrīdhariya etc. The commentary is short and clear. It is a recent work and is mentioned on p. 319 C. C. Oppert—7142.

॥ भारतम् (भगवद्गीता पदयोजनोपेता) ॥

371. BHĀRATAM.

Bhagavadgītā with Padayojanā.

Substance—Palm leaf. Size—$14\frac{5}{8}'' \times 2''$. Leaves—12. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—540.

Beginning:

धातराष्ट्रान् हन्तुं नार्हाः न योग्याः। ते स्वजनहननदोषमनादृत्य यथा युद्धोद्यताः। त्वया शोकं परित्यज्य योद्धव्यमित्याशङ्क्याह यद्यपीत्यादिश्लोकद्वयेन।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्॥

End:

अर्जुन उवाच—

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन।
तत् किं कर्मणि घोरे मां नियोजयसि केशव॥

जगज्जननोपलक्षितं जीवस्य संसारं मर्दयति हिनस्ति इति जनार्दनः तस्य सम्बुद्धिः हे केशव बुध्यतेऽनयेति बुद्धिः ज्ञानम्। कर्मणः सकाशात् ज्यायसी गुरुतरेति ते तव मता अभिमता चेत्, तत् तस्मात् कारणात् किं किमर्थं घोरे क्रूरे हिंसालक्षणे इति यावत्।

कर्मणि मां नियोजयसि प्रवर्तयसि । ननु धर्म्याद्धि युद्धादित्यादिना कर्मणोऽपि श्रेष्ठ्यमेवेत्याशङ्क्याह—

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥

व्यामिश्रेण क्वचित् कर्मप्रशंसा क्वचिद् ज्ञानप्रशंसेत्येवं ....

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्यरामचन्द्रानन्दसरस्वतीविरचितायां भगवद्गीताव्याख्यायां पदयोजनाममाख्यायाम् अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ।

Author—Same as No. 370.

Remarks—The Ms. contains the latter portion of chapter 1, the second chapter and two verses in chapter 3.

॥ भारतम् (भगवद्गीतापैशाचभाष्योपेता) ॥

372. BHĀRATAM.
Bhagavadgītā with Paiśāca Bhāsya.

Substance—Palm leaf. Size—14″×2″. Leaves—59. 8—10 lines per page and 52 letters per line. Script—Malayālam. No. of Granthas—1900. Complete.

Beginning:

ॐ हरिः । अविघ्नमस्तु ।

प्रणम्य परमात्मानं विष्णुं कृष्णं जगद्गुरुम् ।
परमात्मावबोधार्थं गीताव्याख्या मयोच्यते ॥

अस्य संबन्धाभि (धेय) प्रयोजनान्युच्यन्ते । मोक्षस्तावत् प्रयोजनं, स च गीताशास्त्रप्रतिपादितात् परमात्मसम्बोधादेवेति परमात्मस्वरूपमभिधेयम् । परमात्मस्वरूपावबोधकस्य शास्त्रस्य साध्यसाधकलक्षणः सम्बन्धः । एवं सम्बन्धाभिधेयप्रयोजनवद् गीताशास्त्रम् । अत्र चार्जुनस्य राज्यार्थं (श)त्रून् विजिगीषोर्धार्तराष्ट्रैः सह युद्धं सम्प्राप्तम् । तत्र साहाय्यार्थं वृतेन भगवता वासुदेवेन सह रथमारुह्य युद्धभूमिं प्रविष्टोऽर्जुन उभयोरपि (से) नयोर्योद्धुं व्यवस्थितानाचार्यपितृपितामहपुत्रमित्रादीन् दृष्ट्वा, एते मया हन्तव्या मदर्थं चैते मरिष्यन्तीति पर्यालोच्य शोकमोहाभिभूतः चिन्तया बहु प्रलप्य न योत्स्य इत्युक्त्वा युद्धादुपरराम । एवमुपरताय तस्मै तस्याविद्यामूल शोकमोहापनोदाय परमकारुणिको भगवान् भक्तवत्सलो वासुदेवो वेदान्तवाक्यैः समधिगम्यपरमार्थतत्त्वमुपदिदेश । (अ) त्र च "दृष्ट्वा तु पाण्डवानीक" मित्यारभ्य "नयोत्स्य इति गोविन्दमुक्त्वे" त्येवमन्तयो ग्रन्थः प्राणिनां शोकमोहः ससारोऽविद्यामूल इति दर्शनार्थः । धृतराष्ट्रः "धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः । मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय" ॥ इत्यारभ्य । " सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः" ॥ इदमिति वक्ष्यमाणं वचः ।

End:

तच्च रूपं विग्रहं अ(त्य)द्भुतम् अत्याश्चर्यं । हरेर्नारायणस्य विस्मयः कुतूहलं मे महान् । हृष्यामि च पुनः पुनः भूयो भूयः । किं बहुना । यत्र मम । यत्र यस्मिन् पक्षे योगेश्वरः कृष्णः स्थितः यत्र पार्थोऽर्जुन धनुर्धरः उद्यतगाण्डीवः तत्र तस्मिन् पक्षे श्रीर्देवता विजयार्थो विजय शत्रूणां धर्षणं भूतिर्विभूतिः ध्रुवा नित्या नीतिर्नयः । मतिः प्रज्ञा

जयमाधिका इतित्थं मतिर्निश्चयः, मम सञ्जयस्य। इति—
करणं गीताशास्त्रपरिसमाप्त्यर्थम्।

Colophon:

इति पैशाचभाष्ये भगवद्गीतोपनिषद्भाष्ये अष्टादशोऽध्यायः।
श्रीकृष्णाय परमात्मने नमः।

Remars—The commentary is written in very simple and lucid style, bringing home to the readers the dogmas of Vedāntic philosophy. In the revised edition of the Bhagavadgītā with eleven commentaries published from the 'Gujarati' Printing Press, Bombay, this work is ascribed to Hanumat. It differs much from the Ms.

भारतम् (भगवद्गीता भाष्यसंक्षेपोपेता)॥

373. BHĀRATAM.

Bhagavadgītā with Bhāsyasamksepa.

Substance—Palm leaf. Size—$17'' \times 2\frac{1}{2}''$. Leaves—112. 7—8 lines per page and 64 letters per line. Script—Malayālam. No. of Granthas—3500.

Beginning:

हरिः। श्रीगणपतये नमः। अविघ्नमस्तु।

श्रीमद्वारणशैलेन्द्रगुहामुखविजृम्भण।
जयत्यभ्यर्णविघ्नेशः परमात्मा नृकेसरी॥
मन्दानामपि गीतासु कश्चिदर्थोऽवबुध्यताम्।
इति श्रीभगवत्पादभाष्यं संक्षिप्यतेऽन्वयः॥

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

अथ स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुरग्रे मरीच्यादीन् प्रजापतीन् सनकादींश्च योगीश्वरान् सृष्ट्वा जगतः स्थितिकारणं वेदोक्तप्रवृत्तिलक्षणम् अभ्युदयसाधनमग्निहोत्रादिकं निवृत्तिलक्षणं च निःश्रेयससाधनज्ञानवैराग्यात्मकं धर्मं ग्राहयामास । तच्च गच्छता कालेनानुष्ठातॄणां कामोद्भवात् हीयमानविज्ञानहेतुकेनाधर्मेण।भिभवात् क्षीणप्रायमुपलभ्य पुनरादिकर्ता नारायणो ब्राह्मणस्य वर्णाश्रमभेदानिबन्धनस्य संरक्षणाय ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः त्रिगुणात्मिकां स्वां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि लोकानुग्रहाय देवक्यां वसुदेवात् अंशेन सम्भूतो मायया देहवानिव लक्ष्यमाणो धर्मसम्मूढचेतसं शोकमोहमहोदधिनिमग्नमर्जुनं तमुद्दिधीर्षुर्द्विविधमपि तं धर्मं वक्ष्यमाणक्रमेणाधिकारिभेदेन अवस्थितमुपदिदेश । तमेतं भगवता वासुदेवेन यथोपदिष्टं भगवान् वेदव्यासः गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध । तस्यास्य गीताशास्त्रस्य सकलवेदार्थसारसंग्रहात्मकस्य संक्षेपतः प्रयोजनं सहेतुकस....रे।स्य.... परमलक्षणं निश्रेयसं परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयं तदुभयाभिव्यञ्जकस्य प्रसिद्धमेव । इह भगवत्पादैः स्पष्टार्थतयोपेक्षितस्य अशोच्यानित्यतः प्राक्तनस्य श्लोकसन्दर्भस्य मन्दानामन्वयपरिज्ञानायाक्षरयोजनामात्रं क्रियते । कुरुराजः प्रज्ञाचक्षुः बाह्यचक्षुरभावेन बाह्यमर्थं प्रत्यक्षयितुमनीशानोऽभ्याशवर्तिनं व्यासप्रसादात् प्रत्यक्षीकृतपक्षद्वयव्यापारम् आत्मनो हितोपदेष्टारं सञ्जयं पृच्छन् धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

End:

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ इति ॥

यस्मिन् पक्षे योगानां सर्वेषां कर्मज्ञानविषयाणा... ... ... प्रभवतयेश्वरः कृष्णोऽस्ति । यत्र गाण्डीवधन्वा पार्थश्चास्ति । तत्रैव पक्षे युधिष्ठिराधिष्ठिते श्रीः विजयश्रीः विशेषो भूतिरव्यभिचारितया ध्रुवा नीतिश्चेति मम निश्चयः ।

इतिश्रीभगवत्पादभाष्यं संक्षिप्तमन्वयैः ।
आवर्तनीयं यत्नेन यतिभिर्मोक्षकाङ्क्षिभिः ॥
श्रीविद्याभारतीं वन्दे श्रीविद्याचक्रवर्तिनीम् ।
यदनुग्रहमात्रेण मूको वाचस्पतीयते ॥
प्रणमामि परानन्दं क.........णालयम् ।
अविद्यारण्यदावाग्निं विद्यारण्ययतीश्वरम् ॥
यत्कटाक्षेक्षिकाद्युत ज्ञानलक्ष्मीमिमां मयि ।
तस्मै गुरूणां गुरवे विद्यातीर्थात्मने नमः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकेशवात्मभगवत्पूज्यपादशिष्यस्य श्रीकेशवस्वामिभगवतः कृतौ श्रीगीताभाष्यसंक्षेपे अष्टादशोऽध्यायः ।

मलनिर्मोचनं पुंसां गङ्गास्नानं दिने दिने ।
सकृद्गीताम्भसि स्नानं संसारमलमोचनम् ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

श्रीकृष्णाय नमः चक्रग्राम... ... ...ना वेङ्कटजल्हर् शङ्करेण लिखितमिदं संक्षपभाष्यम् । विष्णवे नमः ।

.........गुरुरात्मेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

नमः शिवाय त्रिदशार्चिताय विनष्टदोषाय गुणार्णवाय ।
विमुक्तिमार्गप्रतिबोधनाय देवादिदेवाय... ...शिवाय ॥
शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम् ।
शिवमार्गप्रणेतारं प्रणतोऽस्मि सदाशिवम् ॥

ओं नमः शिवाय शिवायै नमः । शङ्कराय नमः । शिवं शिवं शिवम् ।

Author—Com: Keśavasākṣi Bhagavān.

Remarks—This Ms. is an abridgment of the Gītā-Bhāsya of Śaṅkarācārya. The commentator's preceptor was Keśavabhagavatpūjyapāda.

॥ भारतम् (भगवद्गीता सभाष्या) ॥

374. BHĀRATAM.

Bhagavadgītā with Bhāṣya.

Substance—Palm leaf. Size—18¾×2". Leaves—98. 11—13 lines per page and 80 letters per line. Script—Grantha. No. of Granthas—5900.

Beginning:

अस्य श्रीभगवद्गीतामहामन्त्रस्य । श्रीवेदव्यासो भगवानृषिः । अनुष्टुप् छन्दः । श्रीकृष्णः परमात्मा नारायणो देवता । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति शक्तिः । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः इति कीलकम् । श्रीभगवतो वासुदेव(स्य) प्रीत्यर्थे जपे विनियोगः । नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः इत्यङ्गुष्ठाभ्यां नमः । न चैनं क्लेदयन्त्यापो न शोषयति मारुतः इति तर्जनीभ्यां नमः । अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च इति मध्यमाभ्यां नमः । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः इत्यनामिकाभ्यां नमः । पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः इति कनिष्ठिकाभ्यां नमः । नानाविधानि दिव्यानि नानारूपाकृतीनि च इति करतलकरपृष्ठाभ्यां नमः । ओं ज्ञानात्मने श्रीकृष्णाय हृदयाय नमः । श्रीमदैश्वर्यात्मने छन्दसे शिरसे स्वाहा । श्रीमच्छक्त्यात्मने वेदव्यासाय शिखायै वषट् । बलात्मने बलभद्ररामाय कवचाय हुम् । श्रीमत्तेजसात्मने श्रीकृष्णाय नेत्रत्रयाय वौषट् । श्रीमद्वीर्यात्मने गाण्डीवधन्वने विजयाय अर्जुनाय अस्त्राय फट् । ॐ भूर्भुवस्सुवरोमिति दिग्बन्धः ।

आताम्रपाणिकमलप्रणयप्रतोद-
मालोलहारमणिकुण्डलहेमसूत्रम् ।
आविःश्रमाम्बुकणमम्बुदनीलमव्या-
दाद्यं धनञ्जयरथाभरणं महो नः ॥

करकमलनिदर्शितात्ममुद्रः परिकलितोन्नतबर्हिबर्हचूडः ।
इतरकरगृहीतवेत्रतोत्त्रो मम हृदि सन्निधिमातनोतु शौरिः ।

वन्दे कृष्णार्जुनौ वीरौ नरनारायणावुभौ ।
धार्तराष्ट्रकुलोन्मत्तगजारोहणवल्लभौ ॥
वाचकः प्रणवो यस्य क्रीडानस्त्वखिलं जगत् ।
श्रुतिगङ्गा वपुर्ध्यानं तं वन्दे देवकीसुतम् ॥
प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥
सारथ्यमर्जुनस्यादौ कुर्वन् गीतामृतं ददौ ।
लोकत्रयोपकाराय तस्मै कृष्णात्मने नमः ॥
जीवब्रह्मभिदामहामयजुषां जीवातुरत्यद्भुत-
स्वान्ताकारमदान्धवारणसृणिस्तच्चंपदव्याक्रिया ।
नानाकर्मकवाटिकाविघटनव्यापारसत्कुञ्चिका
चिन्मुद्रा जगतां गुरोर्भवतु मे जन्मार्तिविध्वंसिनी ॥
नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥
धृतराष्ट्र उवाच— श्रीसच्चिदानन्दगुरुभ्यो नमः ।
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

नारायणः परो व्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

स भगवान् सृष्ट्वेदं जगत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम् । ततोऽन्यांश्च सनन्दसनकादीनुत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यादिलक्षणं ग्राहयामास । ....

Colophon :

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा-र्जुनसंवादे मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः ।

॥ श्रीशङ्कराचार्यविरचितं गीताभाष्यं समाप्तम् ॥

॥ ओं तत् सत् ॥

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या चेयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥

Author—Com : Śaṅkarācārya.

Remarks—In this Bhāṣya Śaṅkarācārya refutes the arguments of all the other schools of philosophy and establishes his own school of Advaitavedānta. Nyāsa, Dhyāna and other practices preliminary to the recital of Gītā are included in the beginning column.

॥ भारतम् (भगवद्गीता सुबोधिनीसहिता) ॥

375. BHĀRATAM

Bhagavadgītā with Subodhinīvyākhyā.

Substance—Palm leaf. Size—13″×2″. Leaves—77. 11 lines per page and 64 letters per line. Script—Grantha. No. of Granthas—3500.

Beginning:

भजमानविघ्नभित्तिप्रभित्तिकुद्दालमिव करेणुरदम् ।
दधतं महागणेशं प्रणौमि सकलेष्टसम्पदं ददतम् ॥

नमो भगवते तस्मै वासुदेवाय माधुपे ।
येन पार्थोऽतरद् गीतामुधेवो भवचारिधिम् ॥
शेषाशेषमुखव्याख्याचातुर्यं चैकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥
श्रीमाधवं प्रणम्योर्वीसुरपुङ्गनमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ॥
भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ।
यथामति समालोच्य गीताव्याख्यां समारभे ॥
गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः ।
सेयं सुबोधिनी टीका सदा ध्येया मनीषिभिः ॥

इह खलु सकललोकहितावतारः परमकारुणिको भगवान् देवकीनन्दनः तत्त्वाज्ञानविजृम्भितशोकमोहभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिमन्धिनम् अर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्मात् शोकमोहसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबन्ध ।

... ...

वन्दे कृष्णार्जुनौ वीरौ नरनारायणावुभौ ।
धार्तराष्ट्रकुलोन्मत्तगजारोहणवल्लभौ ॥

श्रीगीताशास्त्रमहामन्त्रस्य वेदव्यासो भगवानृषिः । आर्षेणानुष्टुप् छन्दः । क्वचित् क्वचित् नानाविधानि छन्दांसि । गोपालकृष्णः परमात्मा देवता । अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषस इति बीजम् । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज इति शक्तिः । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि माशुच इति कीलकम् । ऊर्ध्वमूलमिति हृदयम् । धर्मार्थकाममोक्षज्ञानयज्ञेन

भगवत्ममाराधनार्थे जपे विनियोगः । ज्ञानात्मने श्रीकृष्णाय हृदयाय नमः । अमिदैश्वर्यात्मने छन्दसे शिरसे स्वाहा । शक्त्यात्मने श्रीवेदव्यासाय शिखायै वषट् । बलात्मने श्रीबलभद्राय कवचाय हुम् । तेजसात्मने श्रीकृष्णाय नेत्राभ्यां वौषट् । वीर्यात्मने श्रीबृहद्गाण्डीवधन्वने अर्जुनाय अस्त्राय फट् भूर्भुवस्स्वरोमिति दिग्बन्धः ॥

हृदि विकसितपद्मं सार्कसोमाग्निनेत्र
प्रणवमयविकारं यस्य रूपं प्रकल्प्य ।
अचलमिव सुसूक्ष्मज्योतिराकाशसारं
भगवति मनसो मे वासुदेवे प्रतिष्ठा ॥

वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥

अग्रे कृत्वा कमपि चरणं जानुनैकेन तिष्ठन्
पश्चात्पार्थं विच(प)लजुषा चक्षुषा प्रेक्षमाणम् ।
मध्ये तोत्रं करसरसिजे दक्षिणे ज्ञानमुद्रा-
मादधानो रथमधिवसन् पातु नः सूतवेषः ॥

गीतायाः श्रवणाद्यस्य मानसं परिवर्तते ।
तस्य वैवस्वतो राजा कुरुते लिपिमार्जनम् ॥

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-
मम्ब ! त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम्

मू—धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

व्या—हे सञ्जय! धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तः समवेताः सन्तः किं कृतवन्तः ।

End:

"देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे" "यमेवैष वृणुते तेन लभ्यः" इत्यादि श्रुतिस्मृतिपुराणवचनान्येवं सति समञ्जसानि भवन्ति । तस्माद्भगवद्भक्तिरेव मोक्षहेतुरिति सिद्धम् ।

तेनैव दत्तया भक्त्या तद्गीताविवृतिः कृता ।
स एव परमानन्दस्तथा प्रीणातु माधवः ॥
परमानन्दपादाब्जरजःश्रीधरिणाधुना ।
श्रीधरस्वामियतिना कृता गीतासुबोधिनी ॥

स्वप्रागल्भ्यबलाद्विलोड्य भगवद्गीतां तदन्तर्गतं
तत्त्वं प्रेप्सुरुपैति किं गुरुकृपापीयूषदृष्टिं विना ।
अम्बु स्वाञ्जलिना निरस्य जलधेरादित्सुरन्तर्मणी-
नावर्तेषु न किं निमज्जति जनः सत्कर्णधारं विना ॥

Colophon:

इति श्रीभगवद्गीताटीकायां सुबोधिन्यां श्रीधरस्वामिकृतौ परमार्थनिर्णयो नामाष्टादशोऽध्यायः । भगवद्गीताव्याख्यानं समाप्तम् ।

गुरुपादाम्बुजद्वन्द्वं मम हृत्पद्ममन्दिरे ।
नित्यज्ञानप्रबोधाय चिन्तयामि सुखप्रदम् ॥

श्रीसत्यवागीश्वरो रक्षतु ।

श्रीकृष्ण विष्णो नृहरे मुरारे प्रद्युम्न सङ्कर्षण वासुदेव ।
अजानिरुद्धामल विश्वरूप त्वं पाहि नः सर्वभयादजस्रम् ॥

श्रीगुरुभ्यो नमः । शुभमस्तु ।

Author—Com: Śrīdharasvāmin.

Remarks—The commentator follows Śaṅkara in advocating devotion (Bhakti) as superior to knowledge (Jñāna).

॥ भारतम् (विवरणोपेतम्) ॥

376 A. BHĀRATAM
with Vivaraṇam.

Substance—Palm leaf. Size—$16\frac{3}{4}'' \times 1\frac{1}{2}''$. Leaves—6. 8—9 lines per page and 60—68 letters per line. Script—Tamil Grantha. No. of Granthas—200.

Subject—Same as No. 295.

Beginning of the commentary:

... ...मनं प्राह ... .
न्मन्यसे सुहृद्गुरुवधात् प्रायश्चित्तीयत इति । मशानाढ्यः मन्नश्चमे-
धादिप्रायश्चित्तानुष्ठानसमर्थः किं परितप्यसे । यो ह्य-
नाढ्यः यः पुनरनाढ्यो दरिद्रः स पापानि कृत्वा पतति प्राय-
श्चित्तासमर्थत्वात् तस्य । कुतः । तदुच्छिष्टं तस्यानाढ्यस्योच्छि(ष्टं)

शरीरयात्राशेषं कल्पकं प्रायश्चित्ता पर्याप्तमिति यावत् । ...त्यपथ्ये अनेके अपथ्ये पापे बलवति गुरुतरं किञ्चिदाढ्यत्वाद् अन्यद् बलं सामर्थ्यं न त्रायते पुरुषम् । किञ्चाढ्यतैव यज्ञदानादिकारणतया त्रायत इत्यर्थः । तस्माद् राज्यमालम्ब्य अश्वमेधादिना पापहानिः कार्येत्याह ॥

End :

लोभादुद्भूतमज्ञानमित्यस्मिन् पक्षे । अवेक्षिणमिति पाठः । शेषः समानः ।

यच्च पैतामहं स्थानं ब्रह्मराशिसमुद्भवम् ।
गुहायां निहितं नित्यं तद्दमेनाधिगम्यते ॥

पैतामहं स्थानं इ...गतः पितॄणामपि पितुः परमो...णस्य नारायणस्य परस्य ब्रह्मणः स्थानं तस्य सर्वगतत्वे सत्यपि तत्र विशेषेणाविर्भवतीति यावत् । स्थानमित्युपचाराद् दृश्यते तद् गुहायां निहितं हृदयसरोजकोटर.... निहितं निगूढं तद् ब्रह्मराशिसमुद्भवं वेदराशिभिः समुद्भाव्यते प्रकाश्यत इति ब्रह्मराशिसमुद्भवं तद् दमेन मनोनिरोधेनाधिगम्यते ज्ञायत इत्यर्थः ।

Colophon :

इति यज्ञनारायणीये महाभारतविवरणे राजधर्मविवरणं समाप्तम् । हरि ॐ ।

Author—Com: Yajñanārāyaṇa.

Remarks—The Ms. begins on Fol. 16. It is much worn out but the script is legible.

॥ भारतम् (दीपिकोपेतम्) ॥

376 B. BHĀRATAM
with Dīpikā.

Substance—Palm leaf. Size—16¾" × 1½". Leaves—58. 8—9 lines per page and 60—68 letters per line. Script—Grantha. No. of Granthas—1850.

Beginning :

अथातो मोक्षधर्मेषु श्लोकान् स्वाशयशुद्धये ।
निगूढपदवाक्यार्थान् विवरिष्यामि कांश्चन ॥
मन्नो यद्यनुगृह्णीयुर्वृत्तिमेनां मयेरिताम् ।
कृत .... स्यामहं नो चेत् तेभ्यः श्रोष्यामि तत्त्वतः ॥
धर्माः पितामहेनोक्ताः ... ... र्मे ... शुभाः ।
धर्म .... श्रेष्ठं वक्तुमर्हसि भारत ॥

इति युधिष्ठिरो भीष्मं पृच्छति स्म । पितामहेन भवता धर्माः सर्वेषां वर्णानामाश्रमिणां च राजधर्माश्रिता उक्ताः । राज्ञा हि वर्णानां धर्मा .... रा ... ... परिपाल्या इत्युक्तानुभाषणं कृत्वा पूर्वार्धेन, अपरार्धेनापूर्वमर्थं पृच्छति स्म । धर्ममाश्रमिणां .... सर्वेषामुपदिष्टा धर्मास्ते ... ... पि श्रेष्ठ....धर्मम .... दीनां वक्तुमर्हसि । अथवा तेषामसाधारणधर्मा इति गुरुशुश्रूषाध्ययनयज्ञ- .. ... दीनि कर्माणि धर्मसाधन ... ... मत्राक्षि .... नीत्य- दो.... । सर्वे धर्माः शुभा एव न त्वशुभाः सन्ति शुभा इति ।

End :

प्राधानिकं प्रधानाज्जातमव्यक्तवत् सर्वतत्त्वं प्रधानमित्यभि-

प्रायः। महत्तत्त्वतश्चाप्यहङ्कारा... उत्पद्य ... ... नराधिप ... ... त्याहुरेतद् बुद्ध्यात्मकं स्मृतम्। बुद्ध्यात्मकं महत्तत्त्वात्मकं महत्तत्त्वज्ज्ञानात्मकमित्यभिप्रायः। अहङ्काराच्च सम्भूत.... .... नोद्यतगुणात्मकम्। .... इत्येप अहं .... उच्यते। भूतगुणात्मक .... शब्दादयः तदात्मकं विषयपरवशमिति यावत्।

Colophon:

इति श्रीनन्दविरचितायां मोक्षधर्मदीपिकायां त्रयस्त्रिंशच्छततमोऽध्यायः।

Author—Com: Nanda.

Remarks—Many leaves have been eaten away by white ants.

॥ भारतम् (भावदीपेपेतम्) ॥

377 A. BHĀRATAM
with Bhāvadīpa.

Substance—Palm leaf. Size—21¾"×2¼". Leaves—5. 11—12 lines per page and 58—70 letters per line. Script—Grantha. No. of Granthas—200.

Beginning—End—Author—Colophon—Same as No. 376 A.

Remarks—This seems to be a copy of No. 376 A. Vivarana and Bhāvadīpa are evidently one and the same commentary.

॥ भारतम् (दीपिकोपेतम्) ॥

377 B. BHĀRATAM
with Dipikā

Substance—Palm leaf Size—$21\frac{3}{4}'' \times 2\frac{1}{4}''$. Leaves—76 11—12 lines per page and 58—60 letters per line Script—Grantha No of Granthas—3450

Beginning—End—Colophon and Author—Same as No 376 B

Remarks—This work is a reproduction of No 376 B

॥ भारतम् ॥

378 BHĀRATAM

Substance—Palm leaf Size—$20\frac{3}{4}'' \times 1\frac{1}{4}''$ Leaves—31 7 lines per page and 58—66 letters per line Script—Malayālam No of Granthas—1000

Colophon

इत्युद्योगे भगवद्याने पञ्चत्वारिंशच्छततमोऽध्यायः ।

Remarks—This damaged Ms is a promiscuous collection of leaves from various works It comprises *interalia* fragments of *parvas* Bhagavadyāna Samyaniryāna and the Prajāgara The following lines in the first Fol. disclose

that this composition belongs to a different Purāna:

'यमुनायां स्वयं तोयं गङ्गातुल्यं भविष्यति ।'

'दक्षिणेनेह तपती प्रवहिष्यति ।'

"तथा पुष्पजया मार्धं मङ्गं प्राप्स्यति शोभना ॥'.

The Ms. is almost unreadable.

॥ भारतम् (भावदीपोपेतम्) ॥

379. BHĀRATAM
with Bhāvadīpa.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2\frac{1}{4}''$. Leaves—385. 9—12 lines per page and 54—64 letters per line. Script—Malayālam. No. of Granthas—13900.

Beginning:

हरिः ओं । अविघ्नमस्तु ।

युधिष्ठिर उवाच—

यया बुद्ध्या महीपालो भ्रष्टश्रीर्विचरेन्महीम् ।
कालदण्डविनिष्पिष्टस्तन्मे ब्रूहि पितामह ॥

भीष्म उवाच—

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासवस्य च संवादं बलेर्वैरोचनस्य च ॥
पितामहमुपागम्य प्रणिपत्य कृताञ्जलिः ।
सर्वानेव सुरान् हित्वा बलिं पप्रच्छ वासवः ॥

इन्द्रियनिग्रहोऽहंकर्तृत्वाभिमानत्यागश्च कार्य इत्यध्यायद्वयेनो-क्त्वा सम्पदां चाञ्चल्यात् तन्नाशिनाशयोर्हर्षशोकौ न कर्तव्याविति-त्याख्यायिकामुखेनाध्यायद्वयेनाह—यथा बुद्धेत्यादिना । कालद-ण्डविनिष्पिष्टो विपग्रस्तः । ३ ॥

End :

यदयं परमो धर्मो यन्मां पृच्छसि भारत ।
आसीद्वीरो ह्यनाकाङ्क्षी धर्मार्थकरणे नृप ॥

परकृतिं सरूपेणार्थवादेन निष्कामं स्वकर्मैव जितेन्द्रियेण कर्तव्यं तदेव यो...... रमित्याशयेनाहार्धेन—आसीदिति ।

स च किल कृतनिश्चयो द्विजो भुजगपतिप्रतिदर्शितात्मकृत्यः ।
यमनियमसहो वनान्तरं परिगणितोञ्छशिलाशनः प्रविष्टः ॥

उपसंहरति—स चेति । यमाः अहिंसादयः । नियमाः शौचादयः । वनान्तरं वनमध्यम् । प्रविष्टः । 'उञ्छः कणश आदानं कणिशा-द्यार्जनं शिलम्' । परिगणितम् उञ्छशिला(र्तिन ? र्जित)मन्नमश्नन् कणिपत्युक्तामुञ्छवृत्तेर्गतिं प्रापेति शेषः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणप्रमर्यादाधुरन्धरचतुर्धरवंशावतंस-श्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे मोक्षधर्मार्थप्रकाशे अष्टाशीत्यधिकशततमोऽध्यायः । शुभमस्तु ।

वक्ष्यन्ते ? लक्ष्मणार्यं क्रतुविधिविवृतौ नृसिंहनारायणार्य
तर्के धीरेशमिश्रान् फणिपतिभणितौ चोल्लगङ्गाधरार्यम् ।
वेदे गाङ्गं पितृव्यं शिवमथ पितरं दक्षिणामूर्त्युपार्न्तौ
श्रौते चिन्तामणिं यः शरणमुपगतो भूम्नि गोपालदेवम् ॥

व्याकरोन्मोक्षधर्मान् स नीलकण्ठः समासतः ।
अनेन प्रीयतां देवो गिरिजापतिरव्ययः ॥

सम्पूर्णेयं मोक्षधर्मटीका ।

Author—Com: Nilakaṇṭha.

Remarks—The Ms. breaks off after chapter 49 leaving a few blank leaves in the middle. Then it begins again with verse 3, chapter 50 and extends to its end. This has been printed at the Venkateśvara Press, Bombay.

॥ भारतम् (भावदीपोपेतम्) ॥

380. BHĀRATAM

with Bhāvadīpa.

Substance—Palm leaf. Size—19″ × 2¼″. Leaves—86. 14—17 lines per page and 64—72 letters per line. Script—Grantha. No. of Granthas—5500.

Beginning:

श्रीगुरुभ्यो नमः । श्रीगणपतये नमः ।
तरणिमुकुरनेत्रोत्तेजनाभां शरीर-
प्रतिकृतिमनमायी भूमिचन्द्रान्तराभम् ।
स्थिरदृगणुमसङ्गं यन्नयत्यन्यथात्वं
तदभयममृतं सत् प्रत्यगीडे गजेन्द्रम् ॥

कणभक्षमक्षचरणं जैमिनिकपिलौ पतञ्जलिं च नुमः ।
श्रीमद्व्यासवचोम्बुधिमधुसीकरवर्षिणो मुदिरान् ॥

सर्वविघ्नशतामावित्रिकीर्षू पूर्वपूरुषौ ।
श्रीनारायणधीरेशरूपौ हरिहरौ नुमः ॥

बहून् समाहृत्य विभिन्नदेशान्
कोशान् विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाचं
व्याकुर्महे भारतमोक्षधर्मान् ॥

उत्तानेऽपि ह कोशविग्रहबलं पद्येषु नैव श्रितं
गम्भीरेषु न सेतवो न विहिताः कूटा न न स्फोटिताः ।
न च्छिन्ना न तमश्चराननतिभिक्ता न नाह्लादिता
नो दीनाश्च विभीषणा न विहिताः श्रीलक्ष्मणार्यश्रुतः ॥

ननु मोक्षो नाम शरीरनाशादन्यो नास्ति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति श्रुतेः । स च स्वयमेवापनमतीति किं तदर्थं शास्त्रेणेति चेन्न ।

End:

अमात्मनः कर्तृत्वमुपपाद्योपसंहरति–स्वभावादेवेति । विद्यावद्या मुक्तिश्च मायिकैवेत्यर्थः । यथोक्तं श्रीमद्भागवते—

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ।
मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ॥

इति । मम माया... .. ...

Colophon:

इति नैलकण्ठीये भारतभावदीपे शान्तौ मोक्षधर्मेषु

पिङ्गलगीतार्थप्रकाशः । इति श्रीमहाभारते शान्तिपर्वणि मोक्ष-धर्मे पिङ्गलगीताप्रथमोऽध्यायः ।

Remarks—The script is legible and attractive.

॥ भारतव्याख्या ॥

381. BHĀRATAVYĀKHYĀ.

Substance—Palm leaf. Size—15⅜" × 1⅜". Leaves—26. 7—8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—585.

Subject—The teachings of the sage Sanatsujāta imparted to Dhṛtarāṣṭra.

Beginning:

ततो राजेत्यादि । ततः धृतराष्ट्रः सनत्सुजातं पप्रच्छेत्य-न्वयः । ततः त्रिवर्गश्रवणानन्तरमपवर्गजिज्ञासयेत्यर्थः । तदनुष्ठानाधिकारमस्ति वा न वेति चेत् तन्नास्त्येव । राजा रजस्वी । विरक्तस्य मोक्षेऽधिकारः । साधनचतुष्टयहीन इत्यर्थः । नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमदमादि-साधनसम्पत्तिः, मुमुक्षा इति साधनचतुष्टयम् । एभिर्गुणैर्वि-हीनत्वात् तस्यानुष्ठानत्वं न सम्भवतीत्यभिप्रायः ।

तन्नास्तीति वदति ज्योतिरित्यनेन । ज्योतिः प्रकाशकं प्रकृतेः प्रकाशकरत्वं जडत्वान्नास्तीत्यभिप्रायः । तर्हि प्रकाशकरत्वमा-दित्यादीनां विद्यते, तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति

वदति–दीप्यमानमित्यनेन । दीप्यमानं सदा द्योतनशीलम् । तदादित्यादीनां नास्तीत्यभिप्रायः । तर्ह्रीन्द्रियैः सर्वं प्रकाश्यते ,तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति साधयति–महदित्यनेन । महत् व्याप्तम् । इन्द्रियाणां तथा व्याप्तत्वं नेत्यभिप्रायः । तर्हि यश.... ..,.. ....दीनामपि व्यग्रह,गतो व्याप्तत्वमस्ति, तस्मात् तेषां कारणत्वमस्तीति चेत्, तन्नेति वदति यश इत्यनेन । यशः यशोरूपमनुभवरूपम् । शशविषाण... ......नां तथानुभवो नास्तीत्यभिप्रायः । यस्मै देवा उपासते । यस्मै यमित्यर्थः ।

Colophon :

सप्तचत्वारिंशः ।

॥ भारतव्याख्या ॥

382. BHĀRATAVYĀKHYĀ.

Substance—Palm leaf. Size—15½" x 1½". Leaves —27. 7 lines per page and 56 letters per line. Script—Malayālam. No. of Granthas—660.

Beginning—Same as No. 381.

End :

पितामह इति । पिता पुत्रश्चेत्यनुवादः । ममैवेति । यूयं ममात्मस्थाः, युष्माकमात्मस्थोऽहं चेति सिद्धम् । अथ एवं वा यूयं मे न । अहं युष्माकं च नेति । ममात्मैव स्थानं, ममाहमेवाधार इति यावत् जन्म चात्मा ममोपादानभूतश्चाहमेव । वेदप्रोक्तः वेदप्र-

तिपाद्यः अजरः जरारहितः अप्रतिघः नाशरहितः अणोः परमाणोरणीयान् सूक्ष्मः । सुमनाः प्रसन्नमनस्कः । सर्वभूतेषु जागृमीत्युक्तं विवृणोति—"आत्मानं सर्वभूतेषु पुष्करे निहितं विदु"रिति । सर्वभूतेषु पुष्करे हृदयकमले निहितमात्मानं मां विदुरिति । मामित्यध्याहारः । एवमूर्ध्वं धृतराष्ट्रं प्रति कथयतः सतः कुक्कुटाकोर्नादादिप्रभातलक्षणान्यासन् । ततश्च श्रीसनत्कुमारश्च प्रायात् । पुनर्धृतराष्ट्रो मुनेर्नादं नाश्रौषीत् ॥

Colophon:

इति सनत्सुजातव्याख्या समाप्ता ।

Remarks—The Ms. is very much damaged. The commentary covers all the five chapters of Sanatsujātīyaparva.

॥ भारतसंग्रहः ॥

383. BHĀRATASAMGRAHA.

Substance—Palm leaf. Size—16½" × 2¼". Leaves—459. 8—10 lines per page and 48 letters per line. Script—Malayālam. No of Granthas—12400. Complete.

Subject—An abbreviated account of the Mahābhārata.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।

ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥
नमः... ...
श्रीमान् पौराणिकः सूतः कदाचिद् रोमहर्षणिः ।
उग्रश्रवा नाम पुण्यं नैमिशारण्यमाविशत् ॥
वर्तमाने शौनकस्य सत्रे द्वादशवार्षिके ।
तत्रासीनान् मुनीन् सर्वान् प्राणमत् स प्रहृष्टधीः ॥
कथाश्चित्राः श्रोतुकामा मुनयः सूतनन्दनम् ।
परिवव्रुश्च तान् प्रीतान् पप्रच्छ स च कौशलम् ॥
तेऽभिनन्द्यासनासीनास्तमाहुः संश्रितासनम् ।
कुत आयाति को देशस्त्वया चरित इत्यपि ॥
विप्रान् स प्राह सुप्रीतांस्तत्रागच्छं यदृच्छया ।
सर्पसत्रं यत्र राजा चकार जनमेजयः ॥
या वैशम्पायनात् तत्र शुश्राव जनमेजयः ।
कथास्ता व्यासकथिताः प्रायोऽपि भारताश्रिताः ॥

End:

एतत् ते सर्वमाख्यातं विस्तरेण महामते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च धीमताम् ॥
एतच्छ्रुत्वा द्विजश्रेष्ठात् स राजा जनमेजयः ।
हृष्टस्तक्षशिलायास्तु पुरमागाद् गजाह्वयम् ॥
एतद् वः सर्वमाख्यातं व्यासशिष्येण धीमता ।
इतिहासं महापुण्यं पवित्रमिदमुत्तमम् ॥
य इदं शृणुयाद् विद्वान् पर्वसु द्विजसत्तमः ।
निधूतपापो निर्द्वन्द्वो ब्रह्मभावं स गच्छति ॥
एवं व्यासकृतं देव शृणुयाद् यः समाहितः ।
ब्रह्महत्याकृतं पापं तत्क्षणात् तस्य नश्यति ॥

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥
श्रीमद्वैशम्पायनः सर्पयागे
तस्मै राज्ञे प्राह पारीक्षिताय ।
सूतः प्राह श्रीमहाभारताख्यं
तत् पावनं शौनकायेतिहासम् ॥

Colophon:

इति सदाशिवकृते महाभारतसंग्रहे सम्भवपर्वणि खाण्डवदहनं नाम पञ्चविंशोऽध्यायः ।

इति श्रीमहाभारतसंग्रहे सदाशिवकृते सौप्तिकपर्वणि प्रथमोऽध्यायः । सौप्तिकपर्व समाप्तम् । गुरुभ्यो नमः । श्रीगणपतये नमः । श्रीकृष्णाय नमः । वासुदेवाय नमः । संकर्षणाय नमः । प्रद्युम्नाय नमः । अनिरुद्धाय नमः ।

इति श्रीमहाभारतसंग्रहे स्वर्गारोहणपर्व समाप्तम् । श्रीमहाभारतसङ्ग्रहः समाप्तः । हरिः । गुरुभ्यो नमः । इदं मध्यार्जुनं वेङ्कटपतिशास्त्रिणा लिखितम् । हरिः । कृष्णाय नमः ।

Author—Sadāśiva.

Remarks—The leaves are much damaged.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

384 BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—19″ × 2″. Leaves—

187. 10 lines per page and 64 letters per line. Script—Malayālam. No. of Granthas—8000. Incomplete.

Colophon :

इति भावार्थदीपिकायां श्रीधरस्वामिविरचितायां पञ्चमस्कन्धे षड्विंशोऽध्यायः । पञ्चमस्कन्धः समाप्तः । हरिः श्रीगुरुभ्यो नमः । श्रीकृष्णाय नमः ।

Author—Same as No. 283.

Remarks—This Ms. covers *skandhas* 1—5 of the Bhāgavata.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

385. BHĀVĀRTHADĪPIKĀ

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—$21\frac{1}{2}'' \times 2'$. Leaves—194. 9 lines per page and 84 letters per line. Script—Malayālam. No. of Granthas—10500.

Author—Same as No 283.

Remarks—This is a commentary on *skandhas* 5, 6 and 10 of the Bhāgavata

---

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

386. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—24″×1½″. Leaves—101. 9 lines per page and 90 letters per line. Script—Malayāḷam. No. of Granthas—5000.

Author—Same as No. 283.

Remarks—The Ms. is very old. The commentary begins from verse 9, chapter 1, *skandha* 7 and extends to verse 36, chapter 29, *skandha* 10.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

387. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—23″×1½″. Leaves—11. 7—9 lines per page and 85 letters per line. Script—Malayālam. No. of Granthas—500.

Remarks—The Ms. is worn out. It covers chapters 1—5 of the 1st *skandha*.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

388. BHĀVĀRTHADĪPIKĀ.
Bhāgavatavyākhyā.

Substance—Palm leaf. Size—18″×2″. Leaves—

85. 8—11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas —3500.

Remarks—This Ms. comprises *skandha* 4, and 18 chapters in *skandha* 5.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

389. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—14"×1½". Leaves—124. 10 lines per page and 50 letters per line. Script—Grantha. No. of Granthas—3500.

Remarks—The Ms. contains *skandhas* 1 and 2, and 12 chapters in *skandha* 3. The Ms. is in good condition.

॥ भावार्थदीपिका (भागवतव्याख्या) ॥

390. BHĀVĀRTHADĪPIKĀ.

Bhāgavatavyākhyā.

Substance—Palm leaf. Size—22½"×2". Leaves—97. 8—9 lines per page and 80—96 letters per line. Script—Malayāḷam. No. of Granthas —1300.

Remarks—The letters are legible. The Ms. is

damaged. It contains the commentary on *skandhas* 1 & 2 and 19 chapters in the 3rd *skandha*. From the colophon it is evident that the Ms. is 300 years old.

Colophon :

इति श्रीमद्भागवतव्याख्यायां पदभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वितीयस्कन्धे दशमोऽध्यायः । समाप्तश्चायं द्वितीयस्कन्धः ।

